नं० ७०४-घ

स्मृतितत्त्वे तिथितत्त्वम (धर्मशास्त्रम)

पत्राणि १३९ (अपूर्णम)

कर्ता रघुनन्दन भट्टाचार्य:

तिपितात १३१

ॐ नमो विघ्ननाशाय ॥ प्रणम्य सच्चिदानंदं रामं कामदमीश्वरं । तिथ्यादितत्त्वं तत्प्रीत्यै वक्ति श्रीरघुनंदनः । तत्र तिथिस्वरूप
माह हेमाद्रिकालमाधवीययोः स्कांदे प्रभासखंडे अमा षोडशभागेन देवि प्रोक्ता महाकला । संस्थिता परमा माया देहिनां
देहधारिणी । अमादिपौर्णमास्यंता या एव शशिनः कलाः । तिथयस्ताः समाख्याताः षोडशैव वरानने ॥ चंद्रमंडलस्य
षोडशभागेन परिमिता देहधारिणी । आधारशक्तिरूपाऽमानाम्नी महाकला प्रोक्ता क्षयोदयरहितत्वान्नित्या स्रक्
सूत्रवत् सर्वानुस्यूता तदन्याः पंचदश कलाः पौर्णमास्यंताः प्रतिपदादि तत्तत् तिथिविशेषरूपा इति षोडशैव कला ।
तिथय इति । तत्र प्रथमकला क्रियारूपा प्रतिपत् एवं द्वितीयादिकला क्रियारूपा द्वितीयादिः सा च वृद्धिरूपा चेच्छुक्ला
ह्रासरूपा चेत् कृष्णेति तथा च षट्त्रिंशन्मते तत्र पक्षावुभौ मासे शुक्लकृष्णौ क्रमेण च । चंद्रवृद्धिकरः शुक्लः कृष्णश्चंद्र
क्षयात्मकः । पक्षत्याद्यास्तु तिथयः क्रमात् पंचदश स्मृताः । दर्शांताः कृष्णपक्षे ताः पूर्णिमांताश्च शुक्लके । पक्षतिः प्र

१

तिथि०

तिपत्। एतत्सर्वं क्रियैव काल इति वादिमतानुसारादुक्तं तदतिरिक्तकालवादिमतेन तत्तत्क्रियोपलक्षितः का
ल इति। तथा च विष्णुपुराणे। कालस्वरूपं रूपं तद्विष्णोर्मैत्रेय वर्तते विष्णुधर्मोत्तरे अनादिनिधनः कालो रुद्रः संकर्ष
णः स्मृतः। कलनात्सर्वभूतानां स कालः परिकीर्तितः। कलनात् लयकारणात् तथा च विष्णुः ये समर्था जगत्यस्मि
न् सृष्टिसंहारकारिणः। तेऽपि कालेन लीयन्ते कालो हि बलवत्तरः। तत्र अष्टमांशे चतुर्दश्याः क्षीणो भवति चंद्रमाः।
अमावास्याष्टमांशे च ततः किल भवेदणुः॥ इति कात्यायनीयदर्शनात् चतुर्दश्याः शेषयामे पंचदश्याः कलायाः क्ष
यारंभात् एवं दर्शान्तयामे आद्यकलाया उत्पत्ते विरोध इति वाच्यं तस्य हि दर्शश्राद्धोपयुक्तपारिभाषिकक्षयोत्
पत्तिपरत्वं न तु वास्तवं स्मृतिज्योतिःशास्त्रविरोधात् तथा हि गोभिलः सूर्याचंद्रमसोर्यः परः सन्निकर्षः सामावस्येति
परः सन्निकर्षश्च उपर्यधोभावापन्नसमसूत्रपातन्यायेन राश्येकावच्छेदेन सद्भावस्थानं तथा चामावस्याघटकता

२

दृशावस्थानयुक्तार्कमंडलाच्चंद्रमंडलस्य अर्कोद्विनिःसृतः प्राची यद्यात्यहरहः शशी भागे द्वादशभिस्तास्याति
थिश्चांद्रमसं दिनं । इति सूर्यसिद्धांतोक्तेन । त्रिंशांशक स्तथा राशे भोग इत्यभिधीयते । आदित्याद्विप्रकृष्टस्तु भागं
द्वादशकं यदा । चंद्रमाः स्यात्तदा राम तिथिरित्यभिधीयते । इति विष्णुधर्मोत्तरे स्याच द्वादशभोगात्मक निर्गमरूप
वियोगेन प्रतिपदादितत्तत्तिथेरुत्पत्तिः एवं सूर्याचंद्रमसोर्यः परो विप्रकर्षः सा पौर्णमासीति गोभिलोक्त ।
पौर्णमासी घटक सप्तम राश्यवस्थानरूप परम वियोगानंतर मर्कमंडलाय चंद्रमंडलस्य राशि द्वादशात्मकप्रवे
शरूप सन्निकर्षेण कृष्णाया सात्त तिथेरुत्पत्तिः तत्र तिथिविशेषविहिते कर्मणि उभयदिने तिथेर्लोभे प्रश्नपूर्व
कं निर्णयमाह विष्णुधर्मोत्तरं । नक्षत्रं देवदेवेश तिथिं चाहं विनिर्गतां । दृष्टोपवासः कर्तव्य कथं शंकर जानता ॥०॥
शंकर उवाच । सा तिथिस्तदहोरात्रं यस्यामभ्युदितो रविः । तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणं । सा तिथिस्तदहो

२

तिथि०३

रात्रं यस्यामस्तमितो रविः। तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणं। शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः। कृष्णप
क्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः। अत्रामावस्यावत्तिथिक्षयवृद्धिभ्यां न व्यवस्था किंतु रवेरुदयास्तसंबंधात् शुक्लकृष्णा
भ्यां व्यवस्था सा च युग्माद्यनाघ्रात तिथिकर्मपरा सामान्यविशेषन्यायात् युग्मसाह गृह्यपरिशिष्टे निगमः। युग्माग्निकृत
भूतानि षण्मुन्योर्वसुरंध्रयोः। रुद्रेण द्वादशी युक्ता चतुर्दश्याथ पूर्णिमा। प्रतिपदाप्यमावस्या तिथ्योर्युग्मं महाफलं। एत
द्व्यस्तं महाघोरं हंति पुण्यं पुराकृतं। द्वितीया तृतीययोः चतुर्थीपंचम्योः षष्ठीसप्तम्योरष्टमीनवम्योः एकादशीद्वादश्यो
श्चतुर्दशीपौर्णमास्योः प्रतिपदमावास्ययोर्मेलनं युग्मं तत्तत्तिथिमात्रनिमित्तके कर्मणि महाफलं एतत्प्रयोजनं च ति
थिविशेषकर्मणि तिथिखंडविशेषनियमनं स्वतिथ्या कर्मनिर्वाहे सहायभावे नान्यतिथ्यनुप्रवेशः उपवासाद्याचरणं
च अत एव विष्णुधर्मोत्तरे सा तिथिस्तदहोरात्रमित्यनेन खंडतिथेरहोरात्रत्वकीर्तनं अहोरात्रसाध्योपवासादिकर्मोद्दे

त्वार्थे तत्र तिथ्यंतरसहायभावं विना प्रायो न संभवति । अतः प्रातःकाले तत्तत्तिथ्यलाभे तिथ्यंतरे प्युपवाससंकल्पः
३ अहोरात्राभोजनरूपस्य तस्य प्रातरारंभार्हत्वात्' संवत्सरप्रदीपेपि संध्यांततः कृत्वा संकल्पं बुध आचरेदित्युक्तं अत्रे
दं बीजं कर्मणस्तावत् पूर्वं जनकत्वेन विधेयत्वेन च प्राधान्यं तिथ्यादेस्तु गुणत्वेन क्वचिदुपलक्षणत्वं यदाह गर्गः
तिथिनक्षत्रवारादि साधनं पुण्यपापयोः । प्रधानगुणभावेन स्वातंत्र्येण न ते क्षमाः । प्रधानस्य विधेयकर्मणः गुण २
भावेन अंगत्वेन तदुक्तं कर्मसन्निहितं नैव बुद्धौ विपरिवर्तते । शब्दात्तु तदुपस्थानमुपादेये गुणो भवेत् । प्रमाणांत
रासन्निहितं कर्म बुद्धौ न प्रथमं विषयि भवति शब्दादेव तस्य कर्मण उपस्थितिरिति । उपादेये विधेयकर्मणि पूजादौ
चंद्रक्रियात्वेन तदवच्छिन्नकालत्वेन वा शुचिताकालमीविनः कर्माधिकारात् तस्मिन् प्रमाणांतरलभ्यत्वेनाविधेयत्वात् ।
तिथ्यादि गुणा इत्याकुरन्तस्तत्तिथिं विनापि प्रातःकाले संकल्पो नतु तिथ्यनुरोधादन्यत्रेति एवं च मासपक्षतिथीनां चोप

तुरोधेन वान्यतिथिकर्म्मणोऽन्यतिथ्यारंभेऽमुकतिथावारभ्यामुकं कर्म्म कर्त्तव्यमिति वक्तव्यं आरंभ एव तत्तिथेरनुप्र
वेशान्न दोषः। एतच्चास्तां युग्मविपरीतं प्रतिपद्द्वितीययोस्तृतीयाचतुर्थ्योरित्याघोर्मेलनं महाघोरं महापापजनकं।
अत्रापवादो वक्ष्यते। तेनोभयदिने कर्म्मयोग्यप्रशस्तकाले द्वितीयालाभे तृतीयायुतैव द्वितीया ग्राह्या न प्रतिपद्युता
तृतीयापि द्वितीयायुतैव ग्राह्या न चतुर्थीयुता एवमन्यत्र न त्वेकदिनमात्रे कर्म्मयोग्यप्रशस्तकाललाभेपि युग्मादरः
अत्रैव कर्म्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः। तया कर्म्माणि कुर्वीत ह्रासवृद्धी न कारणं। इति वृद्धयाज्ञव
ल्कीयेन संदेहनिरासात् संदेहविषय एव युग्मादिवचनप्रवृत्तेः। प्रधानस्य कर्म्मणो बोधकेन पूर्वोक्तादिशास्त्रेणावि
धिविशेषगुणस्य तिथ्यादेर्नियामकस्य युग्मादिशास्त्रस्य जेतव्यत्वाच्च व्यक्तानिंदार्थवादोपि संदेहे निर्णयपर एव विधि
शेषत्वात्तस्य। एवं च पूर्व्वदिने पूर्वोक्तयुग्मसंबंधिपरतिथेरप्राप्तौ परदिने च तत्प्राप्तौ तत्तत्तिथिविहितपूजादेः पूर्वोक्त

५

नुरोधात् परदिने कर्त्तव्यत्वं प्रतीयते तन्नु योग्यानुरोधात् पूर्वदिने अत्र च पंचमी सप्तमी चैव दशमी च त्रयोदशी प्रति
पन्नवमी चैव कर्त्तव्या सांमुखी तिथिरिति पैठीनसिवचनस्य सांमुख्यं नाम सायाह्न व्यापिनी दृश्यते यदेति स्कंदपुराणोन
सायाह्न व्यापितिथेः सांमुख्य विधानेन पूजादावनवकाशादुपवास परत्वं एवं त्रिसंध्य व्यापिनी यातु सैव पूज्या सदा ति
थिः तत्र युग्मादरणमन्यत्र हरिवासरादिति त्रिसंध्य व्यापित्वेन नियमाभिधानं तदपवादक सायाह्न व्यापित्वमपि मु
हूर्तान्यूनत्वेन ज्ञेयं व्रतोपवासस्नानादौ घटिकैका यदा भवेत्। सा तिथिः सकला ज्ञेया पित्र्यर्थे चापराह्निकीति देवलवचना
त् न नूहोरात्र साध्योपवासादौ कृत्स्न रात्रि युग्म ग्रहणं भैवं तत्रापि कर्मार्थे दिवा तदंग स्नान देवता पूजादीनां कर्मणां कर्त्त
व्यत्वात् रात्रौ च तन्निषेधात् दिवा युग्मस्यैव ग्रहणमिति तिथिविवेकः अत एव जाबालः अहःसु तिथयः पुण्याः कर्मानुष्ठान
तो दिवा। नक्तादि व्रत योगे तु रात्रि योगो विशिष्यते। दिवा कर्मानुष्ठाने कर्त्तव्ये अहःसु तिथयस्तिथ्यन्तर संयोगात् पुण्या अतः

४

तिथि०

कर्म्मानुष्ठानेन ग्राह्या अन्यथा अहर्विहिते कर्म्मणि अहर्विधानमनर्थकं स्यात् नक्तादिव्रतयोगे त्विति निशासाध्यकर्म्मो
पलक्षणं ननु नक्तोपवासमात्रपरं अत्र रात्रियोगो विशिष्यते रात्रौ तिथ्यन्तरसंयोगो विशेष्यत इत्यर्थः वस्तुतस्तु पंच
मीत्यादिना विशेषतः सायाह्नव्यापितिथिग्रहणादुपवासेपि नरात्रियुग्मादरः अन्यथा तदभिधानमनर्थकं स्यात् एत
च्च जयन्ती शिवरात्र्यादिविशेषितेतरपरं । यद्यपि स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने । आसुरी रात्रिरन्यत्र तस्मात्तां
परिवर्जयेदिति पर्युदस्तेतरकालोऽपि कर्म्मयोग्यस्तथापि पूर्वाह्णो वै देवानां मध्यंदिनं मनुष्याणामपराह्णः पितृणा
मिति श्रुत्युक्तकाललाभे स एव नियामकप्रशस्तत्वात् अत एव ययास्तं सविता याति पितरस्तामुपासते । तिथिं तेभ्यो
ऽपराह्णो हि स्वयं दत्तः स्वयंभुवा । इति गृह्यपरिशिष्टीये अस्तगामिन्यास्तिथेः प्रायेण पराह्णसंबन्धेनापराह्णहेतुतया
निर्द्दिष्टः ननु पर्युदस्तेतरकालः प्रशस्तकोलालाभे तु सामान्यकालमादाय युग्मादिना व्यवस्था क्वचिद्विशेषवचनादेव

5

रात्रियुग्मादरः। यथा मध्याह्नव्यापिनी ग्राह्या एकभक्ते सदा तिथिः। नक्तादिव्रतयोगे तु रात्रियोगो विशिष्यते। अत्र यु-
ग्मेतर कृष्णप्रतिपदुभयपक्षदशमीत्रयोदशी कृष्णचतुर्दशी द्वैधे तु प्रागुक्ते शुक्लपक्षे तिथिर्ग्राह्या यस्यामित्यादिवच-
सां प्रतिपत्सद्वितीया स्यादित्यादिवचनाद्व्यवस्थितिः। तिथेः पूज्यकालापेक्षा तु विधेयकर्मण्येव निषेध्यकर्मणि तु ति-
थिमात्रापेक्षा न तत् पूज्यकालमात्रापेक्षेति। तदाह कालमाधवीये वृद्धगार्ग्यः: निमित्तं कालमादाय वृत्तिर्विधिनिषे-
धयोः विधिः पूज्यतिथौ तत्र निषेध कालमात्रके। तिथीनां पूज्यता नाम कर्मानुष्ठानतो मता। निषेधस्तु निवृत्यात्मा काल-
मात्रमपेक्षते। एतद्वचनद्वयं कालनिर्णयाधिकरणन्यायमूलमिति विवृतमेकादशीतत्त्वे। वृत्तिः पालनं कर्मानुष्ठानतः
कर्मानुष्ठाने कर्तव्ये गार्ग्यवचनोक्तनिमित्तमित्यत्र विधिनिषेधयोरनुष्ठानाननुष्ठानरूपापालने कालस्य निमित्तत्वेनाभिधा-
नात्। अतः कालं प्रवक्ष्यामि निमित्तं कर्मणामिहेति भविष्यपुराणाच्च आवश्यकपर्वादिक्रियमाणस्य नित्यनैमित्तिकत्वं

५

तिथि०

व्यक्तमाह मार्कण्डेयपुराणे नित्यं नैमित्तिकं श्रेयं पर्वश्राद्धादि पण्डितैरिति । एवं चाशौचान्तद्वितीयेऽह्नीत्यादेः कालविशेष
निमित्तत्वेनोल्लेख संगच्छते । मासपक्षतिथीनां च निमित्तानां च सर्वशः उल्लेखनमकुर्वाणो न तस्य फलभाग्भवेदिति ब्रह्मा
उभविष्यपुराणोक्तेः । निमित्तानामुत्पत्तिविधिसमभिव्याहृतानियतानां तत्प्राशस्त्येनोक्तानां । अत्र च कारद्वयश्रुतेर्मासा
दीनां पृथङ्निमित्तानां चोल्लेखः न तु मासपक्षतिथीनां निमित्तीभूतानामेव । अत्र च वैदिकक्रियानिमित्तस्य कालविशेष
स्य श्रुतिविनाकालनीवित्वेनाधिकारि विशेषणीभूतस्यांते यासप्तमी सानाधिकरणे योजटाभिः सभुङ्क्ते इतिवत् काल
स्य विशेषणत्वेन न तद्बोधकतृतीयाप्राप्तिः किन्तु काले भावयोः सप्तमीत्यनेन न तद्बाधिका पुनः सप्तमी विधीयते शरदि पु
ष्पाणि सप्तच्छदा इतिवत् अतः कर्तृविशेषणीभूतस्यापि कालस्य सप्तम्या वैदिकक्रियायां निमित्ततयोल्लेखः क्रियैव काल
इति मते तु सुतरां नाधिकरणता सूर्य्यादिक्रियायाः कर्त्तव्यस्य कर्म्मणोऽधिकरणतानुपपत्तेरिति । पूर्वोक्ताद्देः प्रशस्तत्वे

6

नानियतनिमित्तत्वान्नोल्लेख इति युग्मादरस्तु देवकार्य एव न पितृकार्ये तथा च व्यासनिगमो द्वितीयादिकयुग्मानां पू
ज्यता नियमादिषु। एकोद्दिष्टादि वृद्धादौ ह्रासवृद्ध्यादि दर्शनेति। नियमादिषु व्रतादि देवकार्येषु एकोद्दिष्टादि वृद्ध्यादौ
एकोद्दिष्टादिश्राद्धनिमित्तीभूततिथिविशेषस्य वृद्ध्यादौ वृद्ध्यादावित्यादिशब्दात् क्षयसंभितत्वे ग्राह्ये तथा च सति श्राद्धक
रणस्य संदेहे ह्रासवृद्ध्यादि दर्शनात् ह्रासवृद्ध्यादि विधायको नियामक इति यावत् अत्र वृद्धिह्रासौ चंद्रस्य ताभ्यां शुक्ल
कृष्णपक्षौ लक्ष्येते शुक्लपक्षे तिथिर्ग्राह्या यस्यामित्यादि विरुद्धधर्मोत्तरैकवाक्यत्वात् तेन तिथिद्वैधे आपराह्णिकेतर।
पितृकार्ये शुक्लकृष्णपक्षयोरेव रवेरुदयास्ताभ्यां व्यवस्था अपराह्णिके तु सपिंडीकरणादौ ह्रासवृद्ध्यादीत्यादिशब्दा
त् प्रागुक्त यया सं सविता याति इत्यादिना व्यवस्था एतद्विषय एव कालमाधवीय धृतं स्मृतं तु वचनं। द्व्यहं तु व्यापिनी चेत्
स्यात् मृताहस्य तु या तिथिः। पूर्वस्यां निर्वपेत् पिंडमित्यंगिरस भाषितं। तिथिविवेकेपि पितृकार्ये च पूर्वोक्त मध्याह्नवि

६

तिथि०

हिते संशये विष्णुधर्मोत्तरवचनात् शुक्लकृष्णपक्षभेदेन व्यवस्था एवं च प्रागुक्तविष्णुधर्मोत्तरवचने उपवासः कर्त-
व्यः कथमित्यत्र उपवासपदं अपराह्णविहितेतरदैवकृत्यपितृकृत्योपलक्षणं उत्तरवचने उपवासमित्यनविधा-
य कर्ममात्रनिर्देशात् कर्मणीति बहुवचननिर्देशाच्च गम्यते अपराह्णविहितं तु यथासंभवं विना यातीत्यस्य विषयो
हेतुवन्निगदस्वरसादित्युक्तं। एतच्चोभयदिनापराह्णलाभे ज्ञेयं यत्रोभयदिनेऽपि न तल्लाभस्तत्र दर्शेतरतिथिषु अप-
राह्णे तु संप्राप्ते अभिजिद्रोहिणोदये यदत्र दीयते जंतोस्तदक्षयमुदाहृतमिति मत्स्यपुराणात् परदिने गौणापराह्णे
श्राद्धं अभिजिदष्टमघटिकारोहिणं नवमघटिका मुख्यापराह्णस्तु पंचधा विभक्तदिनचतुर्थांशो यथा प्रातःकालो मु-
हूर्तास्त्रीन् संगवस्तावदेव तु। मध्याह्नस्त्रिमुहूर्तः स्यादपराह्णस्ततः परं। सायाह्नस्त्रिमुहूर्तः स्याच्छ्राद्धं तत्र न कारये-
त्। राक्षसी नाम सा वेला गर्हिता सर्वकर्मसु। ननु सपिंडीकरणस्यापराह्णिकत्वे किं मानमिति चेदपराह्णे तु पैतृक

7

सिंपुत्सर्गे वचनात्। किंच यद्यप्यदंतकः पूषापेष्ट मति सद्गचरुं। अग्नीद्भ्वरसामान्यात्तु लोपत्रविधीयते इति छंदो
गपरिशिष्टे यथा वेहूनामनुरोधात् तंडुलचरूनैकानुरोधात् पैष्टकचरुः विरुद्धधर्मसमवाये भूयसां स्यात् सधर्मक
त्वमिति जैमिनिसूत्रात् तद्वदत्रापि बहुदेवताकपार्वणानुरोधात् सपिंडीकरणं वक्ष्यमाणे पूर्णे वृतत्सयेहनि। सपिंडी
करणं कुर्य्युरपराह्णेपि पूर्ववत् इति गोविंदानंदधृतगरुडपुराणवचनाच्च एकोद्दिष्टकालबाध इति। एवं संवत्स
रमधिकृत्य सपिंडीकरणं तस्मिन्काले यागेंद्रतत्कृत्यं। एकोद्दिष्टविधानेन कार्य्यं तदपि पार्थिव। इति विष्णुपुराणी

७

यमेकोद्दिष्टांशे तदिति कर्त्तव्यतापरं न तु तत्कालपरं। तथाच परिशिष्टप्रकाशधृतं श्राद्धद्वयमुपक्रम्य कुर्वीत स
हपिंडतां। तयोः पार्वणवत् पूर्व्वमेकोद्दिष्टमथापरमिति। तथाच वचनद्वयस्वरसात् उभयात्मकत्वं लब्धं। एवंचप्र
थमषण्मासाभ्यंतरे मलमासपातेपि षष्ठमासिकपूर्वतिथिरेव प्रथमस्य षाण्मासिकस्य कालः एकाहन्यूनषण्मा

तिथिं

से विधानात् द्वितीयस्य तु त्रयोदशमासिकं पूर्वेतिथिरेव एकाहन्यूनसंवत्सरे विधानात्। यदाह छंदोगपरिशि
ष्टे एकाहेन तु षण्मासा यदा स्युरपि रात्रिभिः। न्यूनाः संवत्सरश्चैव स्यातां षाण्मासिके तदा। संवत्सरस्य त्रयोद
शमासैरपि भवति तथा च श्रुतिः द्वादशमासाः संवत्सरः क्वचित् त्रयोदशमासाश्च संवत्सर इति। अत्र काल
माधवीयधृतेन षाण्मासिकाब्दिके श्राद्धे स्यातां पूर्वेद्युरेव तौ। मासिकानि स्वकीयेषु दिवसे द्वादशेऽपि चेति पैठी
नसिवचनेनैकवाक्यत्वात् एकाहन्यूनपदेन मृततिथिपूर्वतिथेर्ग्रहणं एतच्च पूर्वं मृततिथिं विहाय परमृ
ततिथिमादाय मासवर्षगणनयासिद्धं एतेन पूर्वमृततिथिमादाय मासवर्षगणनया मृततिथिपूर्वतिथिं विहा
य तत्पूर्वदिने मैथिलानां षाण्मासिकद्वयकरणं तद्द्वयमेव। अत्र स्यातां षाण्मासिके इति द्वादशप्रतिमास्यानि
आद्यषाण्मासिके तथा। सपिंडीकरणं चैव इत्येतत् श्राद्धषोडशमिति छंदोगपरिशिष्टगणनायामपि षाण्मासि

४

कट्युपादानात् प्रथमद्वितीयषाण्मासिकत्वेनोल्लेखः। ननु न्यूनषाण्मासिकत्वेन न्यूनसांवत्सरिकत्वेन वेति। एवं च द्वितीयषा
ण्मासिकस्यापि ठेनसिना यदावृत्तिकत्वमुक्तं ननु आवृत्तिकेऽपार कृच्छ्रः स्यादेकाहः पुनरावृत्तिके। इति शंखोक्तप्रायश्चित्तविशेषज्ञा
पनार्थं तत् परदिने कर्तव्यप्रेतश्राद्धस्य पुनरावृत्तिकत्वार्थं च अत एव पूर्वेद्युरावृत्तिकं श्राद्धं परेद्युः पुनरावृत्तिकमिति शंखव
चनान्तरं। एतेन द्वितीयातृतीयप्राप्तपितृत्वसंप्रदानकश्राद्धान्नभोजनेऽपि मूलपाठ्युक्तं प्रायश्चित्तं हेयमिति। नन्वेवं परत्रः स
प्तमे मासि क्रियमाणस्य कथं षाण्मासिकत्वमिति चेदुक्तं उत्तरषण्मासे मलमासपातेऽपि तथात्वस्यावश्यकत्वात्। अथ
यत्रापकृष्य सपिंडनं कृतं तत्र वृद्ध्युपस्थितौ का गतिरिति चेत् यथाऽपकृष्य सपिंडीकरणं जन्मा पूर्वे पूर्णे संवत्सरकाले
प्राप्यपितृत्वप्रापकं। कृते सपिंडीकरणे नरः संवत्सरात्परं। प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते इति विष्णुधर्मोत्तरी
यात् तथा वृद्ध्यारंभकालेऽपि कल्प्यते। अर्वाक् संवत्सराद्वृद्धौ पूर्णे संवत्सरेऽपि वा। ये सपिंडीकृताः प्रेता न तेषां तु पृथक्क्रिया

ति०पि०

इति शातातपीये पूर्णसंवत्सर वृद्धिकालयोस्तुल्यत्वाभिधानात् । यत्र तु यदहर्वो वृद्धिरापद्येत इति गोभिलोक्तसूत्रे स्या
पकर्षो विधीयते । तत्र प्रागावर्तनादह्नः कालं विद्यादिति गोभिलसूत्रान्तरेण चूडादिरूप वृद्धेर्योमद्ध्यान्तविधानात् स
पिंडीकरणस्यापराह्णे विधानात् तयोर्बाधया आसन्नपूर्वदिने / पकर्षः । एवं च शुद्धितत्त्व लिखितस्य मतं तत्कोपाख्या
नवद्वृद्धिं निक्षिप्य कृतं सपिंडीकरणं तदानीं विघ्नेन वृद्ध्यभावेपि वृद्ध्यारंभकालान्तरं संवत्सरं वा प्राप्यापि तत्त्व प्रा
पकमितिन सपिंडनान्तरं । अत्र श्वः कर्तास्मीति निक्षिप्य दाताविप्राद्विमंत्रयेदितिवन्निक्षिप्येति उत्कटकोटिकसंभा
वनोपलक्षणं भविष्यन्निमित्तस्य कर्मणः प्रत्यूहार्हत्वात् एवं च वृद्धिश्राद्धं यदर्थं कृतं तत्कर्म चेत् विघ्नात् हिने न क्रिय
ते तदादिनान्तरे तत्कर्मणि क्रियमाणे तदंगत्वेन पुनर्वृद्धिश्राद्धं कर्तव्यमेव । प्रधानस्याक्रिया यत्र सांगं तत्र क्रियते पुनः
। तदंगस्याक्रियायां तु नावृत्तिर्नैव तत् क्रियेति छंदोगपरिशिष्टेन सांगप्रधानकरणाभिधानात् । हेमाद्रिधृतं पूर्णसंवत्स

७

रे श्राद्धं षोडशं परिकीर्तितं तेनैव च सपिंडत्वं तेनैवाब्दिकमिष्यते। अत्र पूर्णे संवत्सरे क्रियमाणषोडशश्राद्धानां यथो
भयनिर्वाहस्तथापकृष्टानुष्ठानादप्युभयनिर्वाहान् पूर्णे संवत्सरे आब्दिकानन्तरं। एवं पंचादशश्राद्धे कृते पुनर्द्वयं गोभि
लेन पूर्णे संवत्सरे सपिंडीकरणमभिधाय अत ऊर्द्ध्वं संवत्सरे प्रेतायान्नं दद्यात् यस्मिन्नहनि प्रेतः स्यादिति सूत्रेणाद्यवृ
द्धं सांवत्सरिकविधानाच्च। यानि तु मुख्यश्राद्धं मासि मासि अपर्यावृत्ते प्रति। द्वादशाहेन वा कुर्यादेकाहे द्वादशा
थवा। इति मारीचवचने एकाह कर्तव्यतया द्वादशमासिकश्राद्धान्युक्तानि तानि सूत्रेणापि आद्यमासिकदिन एव का
र्याणि नत्वाद्यमासिकं कृत्वा तत् परदिने एकादशमासिकानीति ज्ञेयं एवं च तेषामपकर्षे तन्मध्ये तदंत काल कर्तव्य
तया षाण्मासिकद्वयसपिंडनापकर्षः सिध्यतीति सुधीभिर्बोध्यं। सपिंडनेति कर्तव्यतायां ब्रह्मपुराणे चतुर्भ्य अर्घ्य
पात्रेभ्य एकं वामेन पाणिना गृहीत्वा दक्षिणेनैव पाणिना च तिलोदकं। सम्मार्जयित्वा पृथिवीं ये समाना इति स्मरन्।

ति० थि०

प्रेतविप्रस्य हस्ते तु चतुर्भागं जलं क्षिपेत् । ततः पितामहादिभ्यस्तन्मंत्रेण पृथक् पृथक् येसमाना इति द्वाभ्यां तज्जलं तु
समर्पयेत् । अर्घ्यं तेनैव विधिना प्रेतपात्राच्च पूर्ववत् । तेभ्यश्चार्घ्यं निवेद्यैव पश्चाच्च स्वयमाचमेत् । एकं प्रेतपात्रं वा
मेनानंतरं दक्षिणोन्नच गृहीत्वेति संबंधः । येसमाना इति मंत्रद्वयं पठन् प्रेतपात्रस्थमुत्सृजलं । कुशरेखात्रयेण च
तुर्धा विभज्य भागमेकं प्रेतब्राह्मणहस्ते क्षिपेत् दद्यात् उत्सृजलपिंडयोः संविभागे मंत्रस्य करणात्वं व्यक्तमाह शा
तातपः निरूप्य चतुरः पिंडान् पिंडदः प्रतिनामतः । येसमाना इति द्वाभ्यां साद्यं तु विभजेत् त्रिधा । एष एव विधिः पू
र्वे मध्ये पात्रचतुष्टये । ततः तदनंतरं तन्मंत्रैः पितामहादिभेदेन त्रिरावृत्तैर्योदिव्या इति मंत्रैः पिकारात् पितामहाद्युत्
सर्गवाक्योक्तत् सृज्य येसमाना इति द्वाभ्यां मंत्राभ्यां अर्घ्यं तज्जलं प्रेतपात्रस्थजलं तेनैव विधिना प्रत्येके पूर्ववच्चतुर्भाग
रूपं प्रेतपात्रात् समर्पयेत् । पितामहादिपात्रेषु मिश्रयेत् तेभ्यः पितामहादिभ्यः क्षिप्येत्तान् मिश्रितपुष्पतिलोदकरूपमर्घ्यं

१०

निवेद्य तत्र ब्राह्मणहस्ते निःक्षिप्य पश्चाद्वामे दिग्पर्थः। तेन प्रेतब्राह्मणहस्ते उत्सृज्य दत्तस्यैवार्घ्यजलस्य तद्वशि
ष्टजलस्य भागत्रयं पितामहादिब्राह्मणार्घ्यजलेषु मिश्रीकर्तव्यमिति प्रतीयते। अतएव दत्तस्यैव प्रेतपिंडस्य मिश्रीभा
व इति श्राद्धविवेकः एवं च चत्वारि पात्राणि सतिलगंधोदकानि त्रीणि पितॄणामेकं प्रेतस्य प्रेतपात्रं पितृपात्रेष्वासिं
चति ये समाना इत्यादिना इति गोभिलसूत्रे पाठिकक्रमदर्शनात् सर्वत्र छंदोगानां सपिंडीकरणे प्रेतकर्म करणपितृ
कर्मपूर्वकं किंत्वर्घ्यदानमात्रेन पितृपूर्वकं पाठिकक्रमाच्छाब्दक्रमस्य बलवत्वात् ब्रह्मपुराणे प्रेतार्घ्यदानानंतरं
ततः पितामहादिभ्य इति शाब्दक्रमस्याबाधेनार्घ्यपात्रेषु गंधपुष्पदानपर्यंतं पितृपूर्वकता उत्सर्गे तु प्रेतपूर्वक
ता यथाचमने अक्षिणी नासिके कर्णौ चेति गोभिलसूत्रस्थपाठक्रममुल्लंघ्य छंदोगैरपि अंगुष्ठेन प्रदेशिन्याद्या
नं पश्चादनंतरं। अंगुष्ठानामिकाभ्यां च चक्षुःश्रोत्रे पुनः पुनः इति दक्षोक्तशाब्दक्रमो ग्राह्यः अतएव छंदोगपरिशिष्टेन

१०

तिथि०

सूत्रक्रमस्यान्यथात्वं स्पष्टीकृतं । यथा त्रिः प्राश्यापो द्विरुन्मृज्य मुखमेतान्युपस्पृशेत् । आस्यनासाक्षिकर्णांश्च नाभिवक्षः
शिरोंऽसौ कान् एतेनानुन्मृष्टजलेनानुन्मृष्टजलसमन्वयोत्तरोत्सर्गः पितृदयिताया मुक्तो निरस्तः ब्रह्मपुराणेये समाना इति
स्मरणानंतरं जलप्रक्षेपणमात्राभिधानेन पूर्वमुत्सर्गप्रतीतेः एवं संश्रव जलसमन्वयस्तु मैथिलोक्तानयुक्तः प्रागुक्तव
चनेषु समन्वयोत्तराध्ये निवेदनोक्तेः स्वयमाचमेदित्येव पाठः कल्पतरौ तथा दर्शनात् आचमनं कुर्यादिति वाचस्पति
मिश्रव्याख्यानाच्च आचमेदिति हस्वग्रंथादर्शः आचरेदिति तु लेखकप्रमादः अत्रच शेषमन्त्र मनुराप्य सर्वे मन्त्रमे
कत्रोद्धृत्य उच्छिष्टसमीपे दर्भेषु मध्यमध्ये न्यस्तन्नमीमदंतेति जपित्वा त्रीत्रीन् पिंडान् दद्यादिति गोभिलसूत्रेणासवेस्मा
त् प्रकृतात् दत्तान् पिंडान् मधुतिलान्विता नित्यनेनच श्राद्धशेषद्रव्येणैव पार्वणे पिंडदानविधानात् तद्धि कृतावपिस
पिंडीकरणोत्तन्नियमात् यद्यपि शेषाभावे पिंडनिवृत्तिरायाति तथापि यथोक्तवस्तुसंप्राप्तौ प्राप्तं तदनुकारियत् । यवा

॥ नामिव गोधूमा व्रीहीणां मिव शालयः। इति छंदोगपरिशिष्टात् मुख्यालाभे प्रतिनिधिः शास्त्रार्थ इति न्यायाच्च मध्याघमा
वे गुडादि ग्रहणावत् द्रव्यांतरेणापि पिंडदाने शेषद्रव्यनियमेस्तु तत्संभवे द्रव्यांतरस्यायोगाय अन्यथा तदंगाभावे कर्म्म
वैगुण्यस्यात् सह पिंडक्रियायामिति मनूक्तेः पिंडस्य प्रेतपिंडेन सह करणं मिश्रीकरणं यत्रेति सपिंडीकरणास मा
ख्यासिद्ध्यर्थं सुतरामेव तत्र तथाचरणं प्रतिपत्तिरूपकर्मांग एव प्रतिपाद्याभावे तन्निवृत्तिः पशुयागे लोहितं निरस्यति ११
सकृन्निरस्यतीत्यादावुक्ता अत एव यत्र वास्तु रूपप्रतिपत्ति यागेपि यज्ञो विघ्नं यस्मिन् वसतीति यत्र वास्तु समाख्यानुरो
धेनाहृत कुशविरहेपि कुशांतर प्रतिनिधि भट्टनारायणो गोभिलभाष्य उक्तः प्राक् स्विष्टिकृत आवाप इति गोभिलो
क्तसूत्रव्याख्यानेपि आउप्यत इति आवापः प्रधानहोमः स तु स्विष्टिकृद्धोमात् प्राक् न पश्चादित्यर्थः एवं च मोक्षहोमे
त्वकृते यदि चरुर्नेष्टो दुष्टो वा भवति तदान्यः पाच्यः मुख्यकृते नाशदुष्टे तदाज्येनैव स्विष्टिकृद्धोम इति नारला एतेनशे

षनाशेऽपि पिंडनिवृत्तिरिति वाचस्पतिमिश्रोक्तं हेयं । अत्र च भविष्यपुराणं गंधोदकतिलैर्युक्तं कुर्यात्पात्रचतुष्टयं ।
अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत् ये समाना इति द्वाभ्यामेतत्सेयं सपिंडनं । नित्येन तुल्यं शेषं स्यादेकोद्दिष्टं ।
स्त्रिया अपि । नित्येनेति नित्यपदमात्रात्पक्षपकपरं तेन सपिंडीकरणास्योभयात्मकत्वात् शेषमंगजातं पार्वणांशे पा-
र्वणेन तुल्यं एकोद्दिष्टांशे एकोद्दिष्टेन तुल्यं बोध्यं । एकोद्दिष्टमिति एकोद्दिष्टं तद्धर्म्याहित्वात् सपिंडीकरणं चेत्युभ-
यपरं एतत्सपिंडीकरणमेकोद्दिष्टं स्त्रिया अपि इति याज्ञवल्क्यवचनैकवाक्यत्वात् तेन श्राद्धेषु मध्य एतत् श्राद्ध-
द्वयमेव स्त्रियां कर्त्तव्यं न त्वाभ्युदयिकश्राद्धादि अत्र च स्त्रिया इति वा कर्त्तरि कृत्य इति कर्त्तरि षष्ठीति कर्तृत्वनियम
: वृद्धिश्राद्धादौ स्त्रीणां भोजनदर्शनात् नात्र भोक्तृत्वनियमः अत्र मातुः पत्न्या सह सपिंडने श्वशुरार्घ्ये श्वशुरयोः
पिंडौ कुशे राक्षाद्यौ । तथा च गार्ग्यः पतिनैकेन कर्त्तव्यं सपिंडीकरणं स्त्रियाः । सा गता हि मृतैकत्वं कुशैरंतरयन् पितृ

न श्वशुरस्याग्रतो यस्माच्छिरः प्रच्छादना क्रिया। पुत्रैर्दर्भैस्तता सा कार्या मातुरभ्युदयार्थिभिः। अंतरयंतीत्यर्थेऽन्त
रयन्निति लिंगव्यत्ययेन पुंस्त्वमिति हलायुधः। अपरे वचनं गोभिल श्राद्धसूत्रभाष्यकृतापि लिखितं अत एव
पत्यतीते पतिते वा पितरि मृते न पितामहादिभिर्मातुः सपिंडीकरणं किंतु पितामह्यादिभिरेव। स्वेन भर्त्रा सहैवा
स्याः सपिंडीकरणं स्त्रियाः। एकत्वं सा गता यस्माच्चरुमंत्राहुतिव्रतैः। तस्मिन्सति सुतैः कार्यं पितामह्या सहैव
हि। अन्यत्र तस्मिन् सतीति श्राद्धानंदे भर्तुरूपलक्षणं अत एव तस्यां चैव तु जीवंत्यां तस्याः श्वश्र्वेति निश्चयः इ
ति लघुहारीतेन श्वश्रूजीवने तस्याः श्वश्र्वा सपुक्तं न तु श्वशुरेणेति क्वचिदप्युक्तं एवं पितामह्यादिभिर्मातुः सपि
डीकरणे सामगेन येचात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधेति मंत्रो न पाठ्यः मंत्रलिंगविरोधात् अत एवाभ्युद
यिके मातृपक्षे श्रीदत्तादिभिर्मंत्रांतरं लिखितं न येचात्रेति वक्तव्यं तस्मात् आभ्युदयिके छंदोगानां मातृपक्ष एव ना

णीति एवं च अर्घार्थे पितृपात्रेषु प्रेतपात्रं प्रसेचयेत् ये समाना इति द्वाभ्यां शेषं पूर्ववदाचरेत् एतत्सपिंडीकरणमेको
द्दिष्टं स्त्रिया अपि इति याज्ञवल्क्यात् न पार्वणो को द्दिष्ट विकृती भूत पुंसपिंड नातिदेशात् तद्विकृतिभूते स्वश्रूादिभिः स्त्री
सपिंडने ये समाना इति मंत्रद्वयस्य पार्वणोक्त ये चात्र त्वामिति मंत्राणां च लिंगासमवेतत्वेपि प्रकृतिसमवेतार्थत्वात् ।
पाठः एवं च मातामहानामप्येवं श्राद्धं कुर्याद्विचक्षणः मंत्रोहेन यथान्यायं शेषाणां मंत्रवर्जितमित्यनेन शेषाणां म्रा
त्रादीनां यन्मंत्रवर्जनमुक्तं तत् शुद्धं तां । पितरः पितामहा इत्यादि प्रकृत्यूहयोग्यमंत्रवर्जनपरं नतु लिंगोऽह योग्यमं
त्रवर्जनपरं । सर्वाभावे स्त्रियः कुर्युः स्वभर्तॄणाममंत्रकमित्यादि मार्कंडेयपुराणीयं चैतदाङ्गुरोपन व्याख्यातं शुद्धित
त्वे श्राद्धतत्त्वेच ॥ ७ ॥ अथ विघ्नपतित मृताहाविदितश्राद्धकालः लघुहारीतः श्राद्धविघ्ने समुत्पन्ने मृताहाविदितेत
था । एकादश्यां प्रकुर्वीत कृष्णपक्षे विशेषतः । अत्र मृताहाज्ञाने यच्छ्राद्धमुक्तं तद्दिनकरणयोग्यं मासिकं सांवत्सरिकं

13

च तदेव श्राद्धविघ्न इत्यत्राप्यनेनैतिउपस्थितत्वात् तावमावस्यादि विहितं एवं चेत् कथं मृताहेतरक्रियमाणानां श्रा
द्धपाक्षमासिकद्वय श्राद्धानांग्रहणमिति चेत् तदोदितदंतन्यायात् यथाक्रमेण पुत्रेणकार्य्या प्रेतक्रियासदा। पतिता
पतिता वापि एकोद्दिष्टविधानतः इति गालववचनात्। व्युत्क्रमप्रेतश्राद्धानि यो नरो धर्म्ममोहितः ददाति नरकं याति
पितृभिः सह शाश्वतमिति वचनाच्च अन्यथा तेषामकरणे तदंतभूतश्राद्धानामकरणप्रसंगात् एवंच पतितप्रेतश्रा
द्धं यदि कृष्णैकादश्यां न कृतं तदा परश्राद्धकाले कर्तव्यं ननु पतितश्राद्ध गौणैकादशीकालानुरोधेन परश्राद्धकाल
बाधः। एतन्न्यायमूलं हेमाद्रिधृतदेवलवचनं एकोद्दिष्टेतु संप्राप्ते यदि विघ्नः प्रजायते। मासेऽन्यस्मिं स्तिथौ तस्मिन्
तदा दद्यात् प्रयत्नतः। अत्र मृताहश्राद्धस्य विघ्नेपि देयत्वावधारणात् कृष्णशृंगवचने देय इति विशेषणं सार्थकं त
द्यथा देये पितृणां श्राद्धेतु अशौचं जायते यदि तदशौचे व्यतीतेतु तेषां श्राद्धं विधीयते। शुचीभूतेन दातव्यं यातिथिः

१२

तिथि०

देवल ५

प्रतिपद्यते । सा तिथिस्तस्य कर्त्तव्या न त्वन्या वै कदाचन । देये विघ्ने प्रवर्धं देये अत्र कृष्णैकादशी प्रतीक्षणीया न वेत्या
ह शुचीभूतेनेत्यादि । दातव्यमित्यत्र शयनीयवत् श्राद्धं दातुमर्हत्यस्मिन्काले इति कृत्यपुटो अन्यत्रापि चेत्यनेनाहेता
वित्यवधि कृत्यशाकिच कृत्या इत्यनेन चार्हनीयाधिकरणो कृत्यप्रत्ययः । अन्यथा पूर्ववचनपरार्द्धे न पौनरुक्त्याप
त्तेः ततश्च दातव्यं श्राद्धं पूर्व्यकालं मध्याह्नादिकं प्राप्य या तिथिः शुचीभूतेन प्राप्यते सा तिथिस्तस्य श्राद्धस्य कर्तव्या
करणाहा न त्वन्या कृष्णैकादशी अशौचविघ्ने प्रतीक्षणीया । अत शुचीभूता यावहितदिवसीय श्राद्धप्रशस्तकाल
प्राप्त तिथिखंड नियमात् प्रशस्तकालेपि तत्तिथिखंड एव श्राद्धं न तु शुक्लपक्षीय तद्वितीयखंडे/तुपस्थितेः ए
वं चाशौचांते संगवाभ्यंतर समाप्ततिथौ न श्राद्धं किंतु मध्याह्नादि प्राप्त तिथौ श्राद्धं प्रशस्तकालत्वात् यथा खंड तिथौ
प्रशस्तकाललाभे तत्कालएव कर्म न तु युग्मादिना सामान्यकाललाभ इति मध्याह्नेपि कुतपस्य पूर्वोत्तरभागयोरे

१५

कोद्दिष्टारंभकालत्वेन तत्प्राप्तिराद्दरणीया यथाकालमाधवीये धृतो व्यासः कुतपप्रथमे भागे एकोद्दिष्टमुपक्रमे
त्। आवर्तनसमीपे वा तत्रैव नियतात्मवान्। आवर्तनं पश्चिमदिगवस्थितच्छायायाः पूर्वदिगवस्थानकालः तत्स
मीपे कुतपशेषं दंडे। गतमोपि। आरंभकुतपे श्राद्धं कुर्याद्रौहिणं बुधः। विधिज्ञो विधिमास्थाय रौहिणं तु न लं
घयेत्। एतद्वचनद्वयं मुजबलभीमे भोजदेवेन धृतं। बौधायनः यो यस्य विहितः कालः कर्मणस्तदुपक्रमे। तिथि
र्योभिमता सा तु कार्या नोपक्रमोज्झिता। अत एव मदनपारिजाते लोकाक्षिः। गणितात् ज्ञायते कालो यत्र तिष्ठति देवताः
। वरमेकाहुतिः काले नाकाले लक्षकोटयः। अथैवं षोडशश्राद्धानां यथाक्रमस्यावश्यकत्वे प्रांत्याकस्यापकरणेन तदा
दिश्राद्धानां पुनः करणप्रसंगः। प्रवृत्तमन्यथा कुर्यात् यदि मोहात्कथंचन। यतस्तदन्यथा भूतं तत एव समापयेदिति छंदो
गपरिशिष्टादिति चेन्न क्रमरूपांगानुरोधेन प्रधानीभूतश्राद्धानां तरणमावृत्तेरयुक्तत्वात् किंतु यत्पतितं तदेव कर्त्तव्यं तुल्य

तिथि०

कस्यारां षोडश्याः श्राद्धानामेकतरासिद्धौ षोडशानामपूर्व्वाणामनुदये प्रधानापूर्वोसिद्धिदोषो पूर्ववत् नचांगासिद्धाव
पि समानमेतदिति वाच्यं तेषां कथं स्यादित्याकांक्षायामुत्पत्तस्य मानतया प्रधानविषयोत्पत्तिवाक्यविषयत्वाभावात्
अत एव सर्वेशान्त्यधिकरणे अंगासिद्धावपि नित्ये क्वचित् प्रधानसिद्धिरिति सिद्धान्त प्रधानैकतमासिद्धौ तु प्रधा
नसिद्धिः सर्वतन्त्रविरुद्धैव अत एव छन्दोगपरिशिष्टं । समाप्ते यदि जानीयान्मयैतद् यथाकृतं । तावदेव पुनः कुर्य्या
न्नावृत्तिः सर्वकर्म्मणः । प्रधानस्याक्रिया यत्र सांगं तत् क्रियते पुनः तदंगस्याक्रियायां तु नावृत्तिर्नैव तत् क्रियेति । नावृत्तिर्न
सांगप्रधानावृत्तिः नचेति न च तावन्मात्रस्यांगस्य करणं किं तु तद्वैगुण्यसमाधानार्थं विष्णुस्मरणमाह योगियाज्ञवल्क्यः अ
ज्ञानाद्यदि वा मोहात् प्रच्यवेताध्वरेषु यत् । स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः । एवं च प्रवृत्तमिति प्रागुक्तव
चनं प्रयोगमध्य एव तु करणत्वेन बोध्यं न च सपिण्डनानन्तरं पतितमासिककरणे पुनः सपिण्डीकरणप्रसंगः सपिण्डी

15

करणे वृत्ते पृथक्त्वं नोपपद्यते । पृथक्त्वे तु कृते पश्चात् पुनः कार्या सपिण्डतेति लघुहारीतवचनादिति वाच्यं । एत
द्वचनस्याप्राप्तपितृलोकप्रेतस्य शास्त्रोक्तमयनपूर्वकमासिकादिकरणपरत्वात् तथा च प्रेतानामिह सर्वेषां ये मन्त्रैश्च
नियोजिताः कृतार्थास्ते हि संवृत्ताः सपिण्डीकरणे कृते । प्रेतत्वान्नेह निर्मुक्ताः प्राप्ताः पितृगणं तु ते । यः सपिण्डीकृ
तं प्रेतं पृथक् पिण्डे नियोजयेत् । विधिघ्नस्तेन भवति पितृहा चोपजायते इति शातातपवचनेन पितृत्वप्राप्त्यनन्त
रं पृथक्करणं निषिद्धं । अत्र तु योऽत्र शास्त्राज्ञासंपत्त्या तदसिद्धेः पृथक्करणेऽपि न दोषः । छन्दोगपरिशिष्टवचना
च्च तद्यथा । सपिण्डीकरणादूर्ध्वं न दद्यात् प्रतिमासिकं । एकोद्दिष्टविधानेन दद्यादित्याह शौनकः । न दद्यात् प्रतिमा
सिकमेकोद्दिष्टविधानेनेति संबन्धात् दद्यादित्याह शौनक इत्यनेन एकोद्दिष्टस्यैवापकृष्टसपिण्डीकरणादूर्ध्वं विकल्पो
दर्शितः स चाप्राप्तप्रेतभावविषय इति श्राद्धविवेककारः वद्भ्रमपतितमासिकविषयकोऽपीति । लघुहारीतवचने विशे

१५

तिथि०

यत इत्यमावस्यापेक्षया तस्या अपि विघ्ने विधानात्। यथा हेमाद्रिधृतं षट्त्रिंशन्मतं। मासिके चाब्दिके वृद्धि संप्राप्ते
मृतसूतके। वदंति शुद्धौ तत्कार्यं दर्शे चापि विचक्षणाः। रागमार्तण्डे। श्राद्धविघ्ने समुत्पन्ने अंतरा मृतसूतके। एका
दश्यां प्रकुर्वीत कृष्णपक्षे विशेषतः। श्राद्धविघ्ने समुत्पन्ने मृतस्याविदिते दिने। अमावस्यां प्रकुर्वीत वदंत्येके मनी
षिणः। अत्र मृतसूतकयोरुपादानादृष्यशृंगवचने अशौचपदमेतत्परं। यत्तु अंतरा मृतसूतके अप्येकादश्यां
श्राद्धविधानं तत्र त्वन्यावैकदाचनेति शृंगवचनविरोधात् अशौचांतदिने मलमासादिरूपविघ्नांतरेण तदकरणे
बोध्यं अत एव श्राद्धविवेके अपाट वाघेशौचाघामपि पतितमेकोद्दिष्टमेकादश्यामशौचांते च मलमासेन कर्त्तव्यं।
किंतु मलमासाव्याप्तकृष्णैकादश्यामेवेत्युक्तं। यत्तु ज्ञानकर्म्मेणि यच्छ्राद्धं नवश्राद्धं तथैव च। प्रतिसंवत्सरं श्राद्धं मल
मासेपि तत्स्मृतं। प्रतिसंवत्सरं श्राद्धमशौचात् पतितं च यत्। मलमासेपि तत्कार्य्यमिति मागुरिभाषितमिति ज्योति वे

१६

वचनद्वयं तत्र पूर्ववचनशेषाद्धस्य असंक्रान्तेपि कर्तव्यमाब्दिकं प्रथमं द्विजैरिति लघुहारीतवचनैकवाक्यतयाऽ
ताधिमासविषयकत्वात्। मलमासमृतानां तु श्राद्धं यत् प्रतिवासरं मलमासेपि कर्तव्यं नान्येषां तु कदाचन इति
कालमाधवीयधृतपैठीनसिवचनेन मलमासमृतविषयकत्वाच्च। परवचनेनापि तदुभयश्राद्धस्याशौचपतित
स्य मलमासाभ्यन्तरे कर्तव्यतोक्ता ननु तद्विलम्बत्वेनानुपस्थितस्य तस्य च राजमार्तण्डे नैकादश्यां कर्तव्यतोक्तेः। प्रचे
ताः अविज्ञातमृतेऽमावस्यायां श्रवणादिवसे वा यत्रामावस्यामपि मृताहाविदित श्राद्धविधानेनैकादश्यां प्रकुर्वी
त कृष्णपक्षे विशेषत इत्यमावस्यापेक्षये वोपपत्तौ विशेषत इति श्रवणात् शुक्लैकादश्यां मैथिलोक्तं तत्केरणमयु
क्तं एकादशीमात्रे कुर्वीत कृष्णपक्षे विशेषतः कुर्वीतेति वाक्यभेदापत्तेः अस्मन्मते तु कृष्णपक्ष एकादश्यां अमाव
स्यापेक्षया विशेषतः कुर्वीतेत्येकं वाक्यं श्रवणादिवस इति मरणास्येति शेषः। मृतमासेऽत्र मृताहपरोऽ निश्चितमृत।

१६

तिथि० २

स्योर्द्धदैहिकाभावादिति श्राद्धविवेकः। मृताहनीत्येव सूत्रे पाठो मैथिलपाश्चात्यदाक्षिणात्यानां अत्रामावस्यायामिति ग
मनमाससंबंधिन्यां प्रवासवासरे ज्ञेयं तन्मासे दुःक्षयेऽथवेति स्मरणादिति मिताक्षरा। एतच्च मृतदिनमासयोरज्ञानेव
स्यभाषणा बृहस्पतिवचनात् मृतमासे ज्ञाते मरणदिनाज्ञाते तु तदीयामावस्यायां तथा च हेमाद्रिकालादर्शनिर्णयामृ
तनव्यवर्द्धमानधृतानि वचनानि। बृहस्पतिः न ज्ञायते मृताहश्चेत् प्रोषिते संस्थिते सति। मासश्चेत् प्रतिविज्ञातस्त
द्दर्शे स्यान्मृताहनि। मृताहनीत्यत्र याकर्त्तव्यमिति शेषः। प्रोषित इत्यज्ञातमरणोपलक्षणं। मासाज्ञाने तिथिज्ञाने तु
सएव यदि मासो न निर्णीतो विज्ञातं दिनमेव तु। तदा मार्गशिरे मासि माघे वा तद्दिनं भवेत्। कालादर्शे निर्णयामृतयो
र्मार्गेशिर इत्याषाढ क इति पाठः। भविष्यपुराणे दिनमेव तु जानाति मासं नैव तु यो नरः। मार्गशीर्षेऽथवा भाद्रे मा
घे वा तद्दिने भवेत् एवं मृताहावधारणासान्निध्यान्मासविशेषो ग्राह्यः। मृतदिनमासयोरज्ञाने तु बृहस्पतिः॥

दिनमासौ न विज्ञातौ मरणस्य यदा पुनः। प्रस्थानदिनमासौ तु ग्राह्यौ पूर्वोक्तया दृशेति यथा मरणदिनमासज्ञाने त
दुभयहरणं नयोरेकतरज्ञाने यथा व्यवस्थापितं तथाऽत्रापीति तेन प्रस्थानदिनमासज्ञाने तदुभयहरणं प्रस्थानमासमात्र
ज्ञाने तदीयामावस्या ग्राह्या प्रस्थानतिथिमात्रज्ञाने तु मार्गशीर्षादेस्तत्तिथिर्ग्राह्येति। संदेहे त्वाह यमः गतस्य नभवे
द्वार्ता यावद्द्वादशवार्षिकी। प्रेतावधारणं तस्य कर्त्तव्यं सूत्रबांधवैः। यन्मासि यद्दहे योत तन्मासि तद्दहः क्रियादिन
ज्ञाने कुहूस्तस्य आषाढस्याथवा कुहूः। एवं च मरणप्रस्थानदिनमासाज्ञाने श्रवणादिवसस्य विषयः। प्रभासखंडे।
मृतस्याहो न जानाति मासं वापि कथंचन। तेन कार्य्यममावस्या श्राद्धं माघेऽथ मार्गके। कथंचनेति। मरणप्रस्थानदि
नमास श्रवणादिनरूपेणाकेनाप्यज्ञाने। अत एव तेषां मृततिथ्यादीनामज्ञाने यस्यां तिथौ मृतिः श्रूयते तस्यामेव त
तिथेरपि विस्मरणे तन्मासैकादश्यां अमावस्यायां वा एकोद्दिष्टं श्रवेणमासस्यापि विस्मरणे न कार्य्यं मानाभावादिति

वाचस्पतिमिश्रोक्तं हेयमिति । अवरादिन विस्मरणो तन्मासीयैकादश्युपवासावश्यकत्वग्रहणं यदुक्तं तदपि प्रमाणशून्यं
। इत्थं च सर्वत्र तन्मासीयकृष्णैकादश्युपवासस्यावश्यकत्वे भावस्याप्राप्ता श्राद्धविघ्ने इति वचनात् अन्यथा तद्वचनस्य मृताहावि
दित इत्यस्य विषयानुपपत्तेः तस्याप्राधान्यं तद्वचने विशेषेण इत्यभिधानात् ननु शौचे तु व्यतीते वै इति वचनादशौ
चांत इत्युल्लेख इति वक्तव्यमिति श्राद्धचिंतामणिः । मैवं यथा मृताहनि तु कर्तव्यमित्यादिना मृताहादेरेव निमित्त
त्वेपि तत्तत्तिथिविशेषस्यैवोल्लेखः न तु मृताहत्वेनोल्लेखः । यथा वा तत्र विघ्ने एकादश्यादिविधानात् एकादश्यादि
रूपेणोवोल्लेखः तथात्रापि शुचीभूतेन दातव्यमित्यादिना श्राद्धप्रशस्तकालप्राप्ततिथिविशेषस्यैव निमित्तत्वेनोल्लेख
: न त्वशौचांतस्यैवोल्लेखः । अन्यथा मृताहादिनानाश्रुतिकल्पनास्यात् व्यवहारोपि न तथेति ॥०॥ अथ जन्मतिथिकृ
त्यं । तन्मलमासे न कर्तव्यं चांद्रमासीयत्वेन सावकाशत्वात् । न च तस्य सौरमासीयत्वं तथात्वे तन्मासे तत्तिथेः कदाचिद

१४

प्राप्नोति दुर्षेत्ता कृत्यतो पापतेः तन्मासे उभयतिथि प्राप्तौ च संशयः स्यात् न चेत्प्रापतिः प्रतिसंवत्सरं तद्विधानात् य
था ब्रह्मपुराणे गर्गेश्च सर्वैश्च जन्मदिवसे स्नाते मंगलपाणिभिः। गुरुदेवाग्निविप्राश्च पूजनीयाः प्रयत्नतः स्वनक्षत्रं च
पितरो तथा देवः प्रजापतिः। प्रतिसंवत्सरं चैव कर्तव्यश्च महोत्सवः। स्नाते तिल स्नातेः तथा च तत्तिथिमधिकृत्य ति
लोद्वर्तीति तत्स्नायी तिलहोमी तिलप्रदः। तिलभुक् तिलवापी च षट्तिली नावसीदति। मंगलपाणिभिः। अभिप्रेतार्थ
सिद्धिमंगलं तद्हेतु तया गोरोचनादिकमपि मंगलं तेन घृतगुग्गुलादि पाणिभिरित्यर्थः। तथा च कृत्यचिंतामणौ। गु
उदुम्बतिलान् दूर्वा जन्मग्रंथेश्च बंधनं। गुग्गुलुं निंब सिद्धार्थ दूर्वा गोरोचनायुतं। संपूज्य भानुविघ्नेशौ महर्षिं प्रार्थयेदि
दं। चिरजीवी यथा त्वं भो भविष्यामि तथा मुने रूपवान् वित्तवांश्चैव श्रियायुक्तश्च सर्वदा। मार्कंडेय महाभाग सप्तकल्पां
तजीवन। आयुरिष्टार्थसिद्ध्यर्थमस्माकं वरदो भव। स्वनक्षत्रं चेति स्वनक्षत्रं अश्विन्याद्यंतर्गतजन्मकालीननक्षत्रं। वस्पे

१८

तिथि०)

तथा ब्रह्मपुराणोक्त प्रमाणादि तन्मे। तेन नान्नैव पूजाविधानाद्बु तदन्ते स्वनक्षत्रायनेन इत्युक्तेः स्वं पूजायामर्घ्यानंतरं।
पाद्यमाह ब्रह्मपुराणे अर्घ्यपाद्यादिकं तत्र मधुपर्कं नियोजयेत्। पाद्यानंतरमर्घ्यमाह नृसिंहपुराणे पाद्यं चैव तृती
यया चतुर्थ्यार्घ्यं प्रदापयेत्। तृतीयया पुरुषसूक्तीयया कृत्वा एतदुभयक्रमदर्शनादिच्छाविकल्प इति श्रीपतिव्यवहार
निर्णये नवांबरधरो भूत्वा पूजयेद्वा चिरायुषं। तथा द्विभुजं जटिलं सौम्यं सुवृद्धं चिरजीवितं। मार्कंडेयं नरो भक्त्या पूजयेत्
प्रयतस्तथा। ततो दीर्घायुषं व्यासं रामं द्रौणिं कृपं बलिं। प्रह्लादं च हनूमंतं विभीषणं तथार्चयेत्। रामोऽत्र परशुराम
:द्रौणिरश्वत्थामा। स्वनक्षत्रे जन्मतिथिं प्राप्य संपूजयेन्नरः। षष्ठीं च दधि भक्तेन वर्षे वर्षे पुनः पुनः। योगियाज्ञवल्क्यः।
ध्यायेन्नारायणं नित्यं स्नानादिषु च कर्मसु। तद्विष्णोरिति मंत्रेण स्नायादप्सु पुनः पुनः। गायत्री वैष्णवी ह्येषा विष्णोः सं
स्मरणाय वै। ध्यायेत् स्मरेत् सर्वमंत्रः ॐ तद्विष्णोः परमं पदं सदा पश्यंति सूरयः दिवीव चक्षुराततम्। वामनपुराणेस

१७

वै मंगल मंगल्यं वरेण्यं वरदं शुभं। नारायणं नमस्कृत्य सर्वकर्म्माणि कारयेत्। संकल्पाकरणे निंदा मात्स्यविष्णु
पुराणे संकल्पेन विना राजन् यत् किंचित् कुरुते नरः। फलं चाल्पाल्पकं तस्य धर्मस्यार्द्धक्षयो भवेत्। ब्रह्मपुराणे। ॐ
कारादि समायुक्तं नमस्कारांत कीर्तितं। स्वनाम सर्वसत्वानां मंत्र इत्यभिधीयते। अनेनैव विधानेन गंधपुष्पं निवेदयेत्
एकैकस्य प्रकुर्वीत यथोद्दिष्टं क्रमेण तु गंधपुष्प मात्रे पंचोपचाराद्यसंभवे। तथा मंत्राक्षतगुणं प्रोक्तं भक्त्या लक्षगुणो
त्तरं। भक्तिमंत्रसमेतं तु कोटि कोटि गुणोत्तरं। सर्वत्र कर्म्मोपदेशकं दक्षिणादिभिरर्च्चयेत्। यथोपदेष्टारमपि पूजये
त्त्वं ततो गुरुं। न पूज्यते गुरुर्यत्र नरैस्तत्राफला क्रिया। इति मात्स्यपुराणात्। तिलहोमस्तु पूजितदेवतानामभिः कार्यः
एकैकां देवतां नाम समुद्दिश्य यथाविधि। चतुर्थ्यंतेन धर्म्मज्ञ नाम्ना च प्रणवादिना। होमद्रव्यमथैकैकं शतसंख्यं होमये
दिति विष्णुधर्मोत्तरवचनात्। स्वाहांतता च मंत्रस्य स्वाहावसाने जुहुयाद् ध्यायन् वै मंत्रदेवतामिति स्मृतेः। अशक्तौ तु

१९

देवीपुराणे। होमोग्रहादिपूजायां स्नानमभ्यन्तरं भवेत्। अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते। स्कान्दे। खण्डनं नख
केशानां मैथुनाध्वानमेव च। आमिषं कलहं हिंसां वर्षवृद्धौ विवर्जयेत्। अध्वानं अध्वगमनं कलहमित्यत्र संगरमि
ति क्वचित् पाठः संगरं युद्धं वर्षवृद्धौ जन्मदिने। वृद्धमनुः मृते जन्मनि संक्रान्तौ श्राद्धे जन्मदिने तथा। अस्पृश्यस्पर्शने चै
व न स्नायादुष्णवारिणा। जन्मनि पुत्रजन्मनि। ज्योतिषे स्नात्वा जन्मदिने स्वीयं परिहरन् प्राप्नोत्यभीष्टफलं मास्यान्मो
चयतो द्विजाय ददतो ह्यायुश्चिरं वर्द्धते। सक्तून् खादति यश्च तस्य रिपवो नाशं प्रयान्ति ध्रुवं भुंक्ते यश्च निरामिषं स हि भ
वे जन्मान्तरे पण्डितः। दीपिकायां जन्मर्क्षे युक्ता यदि जन्ममासे यस्य ध्रुवं जन्मतिथिर्भवेद्वा। भवन्ति संवत्सरमेव तावद्वैरू
प्यसम्मानसुखानि तस्य। कृतान्तकुजयोर्वारे यस्य जन्मतिथिर्भवेत्। अनुक्तयोगसंप्राप्तौ विघ्नस्तस्य पदे पदे। कृतान्तकु
जयोः शान्तिमंगलयोः तस्य सर्वौषधिस्नानं ग्रहविप्रसुराह्वनं। सौरारयोर्दिने मुक्ता देयात् सेतु काञ्चनं। सौरारयोः शान्ति

२०

मंगलयोः। मुरामांसी वचा कुष्ठं शैलेयं रजनीद्वयं। शठी चंपकमुस्तं च सर्वौषधिगणाः स्मृताः। रजनीद्वयं हरिद्रा दारु
हरिद्रे। एषां पत्रादीनां ग्रहणं कषायावयवग्रहणो मत्स्यपुराणविष्णुधर्मोत्तरयोस्तथा दर्शनात्। तद्यथा एषां पत्रा
णि सारा णि मूलानि कुसुमान्यपि। एवमादीनि चान्यानि कषायाख्यो गणाः स्मृताः। तत्र क्रमः। तिलोद्वर्तनं तिलयुक्तज
लेन स्नानं नववस्त्रपरीधानं गुग्गुलु निंब श्वेतसर्षप दूर्वा गोरोचना युक्तजन्मग्रंथिं दक्षिणपाणौ बध्नीयात् गुरु देवाग्नि
विप्राः पूजनीयाः स्वनक्षत्रं पूजनीयं। अत्र च हस्ता स्वाती श्रवणा क्लीब मृगशिरा न पुंसि स्यात् पुंसि पुनर्वसु पुष्यो मूलं
त्वष्ट्री स्त्रियां शेषा इत्यनेन लिंगनिर्णयः। जन्मनक्षत्रादीनां गोपनमाह विष्णुधर्मोत्तरे गोपयेज्जन्मनक्षत्रं धनसारं गृ
हे मलं। प्रभोरप्यवमानं च तस्य दुश्चरितं च यत्। धनसारं धनश्चैवं मलं छिद्रं पितरौ प्रजापतिः सूर्यो गणपतिर्मार्कं
डेयश्च पूजनीयाः। अत्र प्रार्थनमंत्रो चिरंजीवी यथा त्वं भो भविष्यामि तथा मुने। रूपवान् वित्तवांश्चैव श्रिया युक्तश्च सर्वदा।

२०

तिथिः

मार्कंडेय महाभाग सप्तकल्पांतजीवन । आयुरारोग्यसिद्ध्यर्थमस्माकं वरदो भव । ततो व्यास परशुरामाश्वत्थाम कृप
बलि प्रह्लाद हनूमद्विभीषणाः यष्टव्यापि पूजनीयाः । त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च । ब्रह्म विष्णु शिवैः सार्द्धं
रक्षां कुर्वंतु तानि मे इति मात्स्यपुराणीयं रक्षार्थं पठेत् । पितृ मातृ पद ग्रहणात् क्रमस्तु विष्णुपुराणादुक्तो यथा कृष्णोपि
वसुदेवस्य पादौ जग्राह सत्वरः देवक्याश्च महाबाहु र्बलदेव सहायवान् । एवं च सहस्रं तु पितृन् माता गौरवेणातिरि
च्यत इति मनुवचनं सहस्रं पितृन् पैत्र्य पदे गौरव मुक्तं तत् पोषणार्थं रक्षार्थं । अत एव मनुः । मृते भर्तरि पुत्रस्तु वाच्यो मा
तुररक्षिते ति । वाच्योगर्हणीयः । गुडदुग्ध तिलपानेन तु मंत्रः । सतिलं गुड संमिश्रं अंजल्यर्द्ध मितं पयः । मार्कंडेय वरं ल
ब्ध्वा पिबाम्यायुष्यहेतवे । अत्र वैदिकेतर मंत्र पाठे शूद्रादेरप्यधिकारः । वेदमंत्रवर्जं शूद्रस्येति छंदोगाह्निककारः विता
नमणिधृतस्मृतौ वेदेति विशेषणात् एवं च पुराणमधिकृत्य अध्येतव्यं नचान्येन ब्राह्मणं क्षत्रियं विना । श्रौतव्यमिह शूद्रेण

२१

नाध्येतव्यं कदाचनेति भविष्यपुराणोक्तवचनं मंत्रेतरपुराणपरं। पंचयज्ञस्नानश्राद्धेष्वपौराणिकमंत्रोपि निषिद्धः
।शूद्रमधिकृत्य नमस्कारेण मंत्रेण पंचयज्ञान्न हापयेदिति याज्ञवल्क्यवचनेन ब्रह्मयज्ञविशामेव मंत्रवत्स्नाननिषिध्य
ते। तूष्णीमेव हि शूद्रस्य सननमस्कारकं मतमिति याज्ञवल्क्येन श्राद्धमधिकृत्य अयमेव विधिः प्रोक्तः शूद्राणां मं
त्रवर्जितम्। अमंत्रस्य तु शूद्रस्य विप्रो मंत्रेण गृह्यत इति वराहपुराणे तच्च नमस्कारेणेति तूष्णीमिति तु मंत्रवर्जित इति वा मं २१
भिधानात्। एतत्परं वैदिकपरं च शूद्राधिकारे गौतमवचनं। अनुमतोऽस्य नमस्कारो मंत्र इति। अनुपनीतस्यापि शू
द्रसमत्वेन श्राद्धातिरिक्ते वेदपाठनिषेधमाह मनुः। नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते। शूद्रेण हि समस्तावद्या
वद्वेदे न जायते। स्त्रीणामपि वेदमंत्रनिषेधमाह नृसिंहतापनीये। सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्रयोर्नेच्छंतीति सावि
त्रीं लक्ष्मीं यजुः प्रणवं यदि स्त्रीशूद्रो जानीयात् स मृतोऽधो गच्छतीति तेच्छंतीति पंच्यते परशार भाष्येपि लिखितं। तन्म

तिथि०

तिथेः प्रागुक्त ब्रह्मपुराणीयत्वात् पौषो मासं तन्मासादरः । इत्यपरिशिष्टं । उपाकर्मेत ... थोत्सर्गः प्रसवाहोष्टका
दयः । मानवृद्धौ पराः कार्य्या वर्जयित्वा तु पैतृकमिति । प्रसवाहो जन्मदिनं । अत्राष्टकासाहचर्य्याज्जन्माष्टम्यां तथा दर्श
नात् । द्वादश मासाः संवत्सरं क्वचित् त्रयोदश मासाः संवत्सर इति श्रुत्या वर्षे मासवृद्धिरूपा मानवृद्धिरुक्ता सैवात्र
ग्राह्या न तु सौरे मासि तिथिद्वयलाभान्मानवृद्धिर्जीमूतवाहनोक्ता ग्राह्या तिथिद्वयलाभस्य मानवृद्धित्वे मानाभावात् ।
मानवृद्धावित्यत्र मासवृद्धावितिहेमाद्रिणा लिखितं । पैतृकं सपिंडीकरणं मलमासमृतस्य प्रत्याब्दिकं च तयोर्मल
मासे विधानात् ज्योतिः पराशरोपि उपाकर्म तथोत्सर्गः प्रसवाहोष्टकादयः । मासवृद्धौ पराः कार्य्या वर्जयित्वा तु
पैतृकमिति वचने मासवृद्धावित्याह । जन्मतिथेरुभयदिने लाभे तु देवीपुराणं युगाद्या वर्षवृद्धिश्च सप्तमी पार्वती
प्रिया । रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता । यत्र द्वये जन्मतिथिर्यदि स्यात् पूर्व्वा तदा जन्मभसंयुता च । असंयुता मे

२२

न दिनद्वयेपि पूज्या परा याभवतीत्युक्तत्वात् । अं नक्षत्रं परवचनं बृहद्ब्रह्म मार्कंडेपि पूर्व्वोक्ते नक्षत्र लाभ एवेदं । नक्ष
त्रे खंडिते येन प्राप्तः कालस्तु कर्म्मणः । नक्षत्र कर्म्मण्यप्येवं तिथिकर्म्म तथैव चेति बृहस्पति वचनात् । खंडिते खंड द्वययु
क्ते येन नक्षत्रखंडेन विहितः कालः प्राप्तः । नक्षत्र द्वैधे तु बौधायन मार्कंडेयौ तन्नक्षत्र महोरात्रं यस्मिन्नस्तंगतो रविः ।
यस्मिन्नुदेति सविता तन्नक्षत्र दिनं स्मृतं । पूर्वार्द्ध महोरात्र साध्योपवास नक्तैकभक्तेषु । तत्रैवोपवसेदृक्षे यन्निशीथा
द्ध्वो भवेत् । उपवासे यदृक्षं स्यात्तद्दिन नक्तैकभक्तयोः । इति स्कंद पुराणात् निशीथादध इत्यनेनार्द्ध रात्र पूर्व काल
त्वेन सूर्य्यास्तमय कालस्यापि लाभात् । उपोषितव्यं नक्षत्रं येनास्तं याति भास्करः । यत्र वा युज्यते राम निशीथे शशि
नासह । इति विष्णुधर्म्मोत्तर वचनाच्च उपवासवन्नक्तव्रतादीना महोरात्र साध्यता अहोरात्र साध्य भोजन द्वयस्यै
कतरपरित्यागसहित कालविशेष नियमितत्वात् । यस्मिन्नुदेतीति तद्दिन कर्त्तव्य स्नानादाविति । पितृकार्य्ये शुक्लप

२२

तिथि०)

र्त्तं कृष्णपक्षाभ्यां व्यवस्था साह बोधायनः। सा तिथिस्तावन्नक्षत्रं यस्यामभ्युदितो रविः। वर्द्धमानस्य पक्षस्य हीनेत्वस्तमयं
प्रति। वर्द्धमानस्य पक्षस्य चंद्रस्य वर्द्धमानत्वेन शुक्लस्य। हीने चंद्रस्य हीनत्वात् कृष्णपक्षे कालसाधकीयोप्येवं। भोजराजः
योजन्ममासे क्षुरकर्म्म यात्रां कर्णस्य वेधं कुरुते च मोहात्। नूनं स रोगं धनपुत्रनाशं प्राप्नोति मूढो वधबंधनानि। जातं दि
नं दूषयते वशिष्ठश्चाष्टौ च गर्गो यवनो दशाहं। जन्माख्यमासं किल भागुरिश्च चूडे विवाहे क्षुरकर्णवेधे। एतद्विषयमे
दस्तु राजमार्त्तण्डे उक्तानि प्रतिषिद्धानि पुनः संभावितानि च। सापेक्षनिरपेक्षाणि श्रुतिवाक्यानि कोविदैः। क्षुरेति क्षुर
कर्म्म यथा राजमार्त्तण्डे देवकार्ये पितृश्राद्धे रवेरंशपरिक्षये। क्षुरकर्म्म न कुर्वीत जन्ममासेऽथ जन्मभे। एवं च चूड
इति चूडाकरणेऽधिकदोषाय। नारदस्तु जन्ममासे विवाहमाह श्रीपतिरत्नमुच्चये स्नानं दानं तपो विद्या सर्वं मंगलव
र्द्धनं। उद्वाहश्च कुमारीणां जन्ममासे प्रशस्यते। एवं जन्मोदये जन्मसु तारकासु मासेऽथवा जन्मनि जन्मभे वा। व्रतेन वि

23

प्रोन बहुश्रुतोपि विद्याविशेषैः प्रथितः पृथिव्यां। इति व्यासवचनेन जन्ममासे उपनयनविधानात् तदंगसशिखवप
नेपि न दोषः। उदये लग्ने मेराशौ। न बहुश्रुतोपि अल्पविद्योपि। अत्र जन्ममास कृ[illegible] कृत्ये सौरादरौ यात्रादि सालवर्ष्याद्
व्यवहारोपि तथा। जन्मनक्षत्र कर्तव्य माह विष्णुधर्मोत्तरे जन्मनक्षत्रगे सोमे शिरःस्नानेन यत्नतः। पूजा सोमस्य कर्तव्या
नक्षत्रस्य तथात्मनः। श्राद्धं कुर्यात् प्रयत्नेन वह्निब्राह्मणपूजने। वाहनायुधरत्नाद्यं पूजनीयं प्रयत्नतः। सुरासामर्व
तं कार्य्ये केशवस्य विशेषतः। आत्मनश्च पूजावश्यकत्व माह कालमाधवीये देवलः। आत्मैव परमो धर्म्मो आत्मैव परमा
गतिः। आत्मना परितुष्टेन तुष्टा भवति देवता॥ ०॥ अथ प्रतिपत्॥ सा च कृष्णा द्वितीयायुता ग्राह्या प्रतिपत् सद्वितीया
स्यादित्यापस्तंबीयात् न चैतस्य शुक्लापरत्वं प्रतिपदाप्यमावस्येति शुक्लापरेत्यासंकोचात्। ततश्च शुक्ला अमावास्यायु
ता ग्राह्या त्रिसंध्यव्यापि चेत्तु सर्वत्र न युग्मादरः। तथा च पराशरः त्रिसंध्यव्यापिनी या तु सैव पूज्या सदा तिथिः। ततत्र युग्मा

२२

तिथि०

द्रष्टव्यमन्यत्र हरिवासरादिति वचनात् कृत्वोपवासे द्वितीयायुतान ग्राह्या तथा च बृहद्वसिष्ठः। द्वितीया पंचमी वेधा
कृष्णाष्टमी च त्रयोदशी चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे तिथी। द्वितीया वेधाद्योगात् प्रतिपत्तृतीये हंत्यपर्थः। एवमन्यत्र
न्यत्र। अत्रोपवासपरेण विशेषविधिना आपस्तंबीय सामान्यस्य संकोचात्। कर्मादौ नवग्रहपूजा मात्स्यपुराणे
नवग्रहमखं कृत्वा ततः कर्म समाचरेत्। अन्यथा फलदं पुंसां न काम्यं जायते क्वचित्॥ अथ द्यूतप्रतिपत्। वामनपुरा
णे। कार्तिकशुक्लपक्षमधिकृत्य बलिं प्रति भगवद्वाक्यं। वीरप्रतिपदा नाम तव भावी महोत्सवः। अत्र त्वां नरशार्दूल
हृष्टाः पुष्टाः स्वलंकृताः। पुष्पदीपप्रदानेन पूजयिष्यंति मानवाः। तत्र मंत्रः। बलिराज नमस्तुभ्यं विरोचनसुत प्रभो भवि
ष्येंद्र सुराराते पूजेयं प्रतिगृह्यतां। प्रतिपदा प्रतिपत्तिथ्या अत्र प्रतिपदि ब्रह्मपुराणोक्त बलिराजेति मंत्रस्य पूर्वं मंत्रे।
यानेन राजेंद्र समंत्री सपुरोहितः। इत्यर्द्धं पश्चादपि एवं पूजां नृपः कृत्वा रात्रौ जागरणं ततः। इत्युक्तमिति पुनर्ब्रह्मपुरा

गो शंकरश्च पुरा द्यूतं ससर्ज सुमनोहरं । कार्त्तिकशुक्लपक्षे तु प्रथमेऽहनि भूपते । जितश्च शंकरस्तत्र जयं लेभे च पार्वती
अतोऽर्थो शंकरो दुःखी गौरी नित्यं सुखोषिता । तत्र द्यूतं प्रकर्तव्यं प्रभाते तत्र मानवैः । तस्मिन् द्यूते जयो यस्य तस्य संवत्स
रः शुभः । पराजयो विरुद्धस्तु लब्धनाशकरो भवेत् । द्यूतं वा प्राणिभिः क्रीडनं यथाऽह मनुः अप्राणिभिर्यत् क्रियते तल्लो
के द्यूतमुच्यते । तत्तिथिमधिकृत्य भविष्योत्तरे यो यादृशभावेन तिष्ठत्यस्यां युधिष्ठिर । हर्षदैन्यादिना तेन तस्य वर्षं
प्रयाति हि । तथा ब्रह्मपुराणे तिथिरियं बलिराज्यप्रवर्द्धिनी स्नानं दानं शतगुणं कार्त्तिकेऽस्यां तिथौ भवेत् । भविष्योत्तरे हि
रण्यप्रतिपद्युक्ता मार्गमासि सितेतरा । गंगायां यदि लभ्येत सूर्यग्रहशतैः समा । कल्पतरौ वामनपुराणे नंदायां तु नाभ्यंग
मुपाचरेच्च क्षौरं च रिक्तासु जयासु मांसं । पूर्णासु योषित् परिवर्जनीया भद्रासु सर्वाणि समाचरेच्च । नंदादिक्रममाहज्योति
षे । नंदा भद्रा जया रिक्ता पूर्णा प्रतिपदः क्रमात् । प्रतिपदादि पंचदशतिथिषु कृष्णाद्यादि पंचदश द्रव्यं भक्षणे क्रमेणाह देव

माह स्मृतिः। कुष्मांडे चार्थहानिः स्याद्बृहत्यां न स्मरेद्धरिं। बहुशत्रुः पटोले स्याद्धनहानिस्तु मूलके। कलंकी जायते वि
ल्वे तिर्य्यग्योनिश्च निंबके। ताले शरीरनाशः स्यात् नारिकेले च मूर्खता। तुम्बी गोमांसतुल्या स्यात् कलंबी गोवधात्मिका
। शिंबी पापकरी प्रोक्ता पूतिका ब्रह्मघातिका। वार्त्ताकौ सुतहानिः स्याच्चिररोगी च माषके। महापापकरं मांसं प्रतिप
दादिषु वर्ज्जयेत्। अत्र सप्तम्यामेव तालभक्षणनिषेधादन्यत्र तालभक्षणं प्राप्तं। अत एव तालं श्वेतां च वार्त्ताकीं न खादेद्द्वि
जो नरः। उत्पन्नेन तालमपि श्वेतं निषिद्धं तालवर्ज्येण श्वेतानुषंगात् एवं अलाबुं वर्त्तुलाकारं वार्त्ताकीं कुंदसन्निभा
मिति। यदपि कुसुंभं नालिका शाकं वृंताकं पूतिकां तथा। भक्षयन् पतितस्तु स्यादपि वेदांतगो द्विज इत्युशनसा सामान्य
तो निषिद्धं। तत्र नालिका श्वेतकलंबीति कल्पतरुः पूतिका च द्वादशपामधिकदोषाय शूद्रविषयिका वा वार्त्ताकी वर्त्तुला
कारेति समुद्रकरभाष्यं तत्रेदं बीजं वर्त्तुलाकारामित्यस्यानुषंगकल्पनं। व्याधितस्यौषधभक्षणक्रियायामपवादमाह स्मृ

25

मंत्र । लशुन पलाण्डु गृञ्जन कुंभी श्राद्ध सूतिका / भोज्यान्न मधुमांस मूत्र रेतो मेध्यामक्ष्य भक्षणे । गायत्र्यष्टसहस्रेण शु-
द्धिं संपातान् समवनयेदुपवासश्च एतान्येव भिषक् क्रियायां मप्रतिषिद्धा भवंति यानि चान्यान्येवं प्रकाराणि तेष्वप्य
दोष इति । कुंभीपानाद्दीति ख्यातात् संपातानुदकबिंदून् शिरसि पातयेदिति प्रायश्चित्तविवेकः । प्रायश्चित्तं वचनांतरै
कवाक्यतया यथायोग्य मूहनीयं । कल्पतरौ नाभ्यंग मर्के न च भूमिपुत्रे क्षौरं च शुक्रे/थ कुजे च मांसं । बुधे च योषां न स
माचरेच्च शेषेषु सर्वो हि सदैव कुर्यात् । चित्रास्व हस्ता श्रवणासु तैलं क्षौरं विशाखा प्रतिपत्सु वर्ज्यं । मूले मृगे भाद्रपदा
सु मांसं योषिन्मघाकृत्तिकसोत्तरासु । स्वधनिष्ठा । मृगे मृगशिरसि मघाकृत्तिकाभ्यां सहोत्तरासु कृती या समासश्छन्-
दसः स्मृतिः घृतं च सार्षपं तैलं यत्तैलं पुष्पवासितं । अदुष्टं पक्वतैलं च स्नानाभ्यंगेषु नित्यशः । प्रचेताः तैलाभ्यंगनिषेधे
गु तिलतैलं निषिध्यते । वारे प्रतिप्रसवमाह स्मृतिः । रवौ पुष्पं गुरौ दूर्वां भूमिं भूमिजवासरे भार्गवे गोमयं दद्यात्तैलदोषो

२५

ति॰चि॰

पक्षांतये। दद्यात्तैलं इति शेषः॥ ० ॥ अथ द्वितीया। सा च कृष्णा पूर्वयुता ग्राह्या प्रतिपत्सद्वितीयास्या द्वितीया प्रतिपद्युतेत्या
पस्तंबवचनात्। तन्नोक्तयुक्तेः प्रतिपत्कृष्णेतत्साहचर्याद्द्वितीयापि तथेति। शुक्लातु परयुता युग्मात् एवं वक्ष्यमाणयोरु
पवासविधायकयोर्विरुद्धवचनयोर्व्यवस्था ज्ञेया। यथा नारदः द्वितीयैकादशी षष्ठी तथा चैवाष्टमी तिथिः। वेधाद्धस्ताद्
न्युक्ताउपवासे तिथीस्त्विमाः। अत्र द्वितीयाद्यास्तृतीयायुता नोपोष्या इत्यर्थः। विष्णुरहस्ये एकादश्यष्टमी षष्ठी द्वितीया
च चतुर्दशी त्रयोदश्यमावास्या उपोष्याः स्युः परान्विताः। तस्मात् पूर्ववचनं कृष्णपक्षविषयं परवचनं शुक्लपक्षविषयं
मनोरथद्वितीयायां दिवा वासुदेवार्चनं। चंद्रोदये ऽर्घ्यदानं नक्तं भोजनादिकं। यथा विष्णुधर्मोत्तरे देवमभ्यर्च्य पुष्पैस्तु धू
पदीपानुलेपनैः उद्गतस्य ततश्च बालेंदोर्दद्यादर्घ्यं समाहितः। नक्तं भुंजीत च नरो यावत्तिष्ठति चंद्रमाः। अस्तंगते न भुंजीत व्रत
भंगभयान्नरः। अस्तंगते चंद्रे यथा वायुपुराणे दिवारात्रौ व्रतं यत्र एवमेव तिथौ स्मृतं। तस्मादुभययोगिन्यामाचरेत्तद्व्रतं व्रती।

एवमेव तिथौ दिवा रात्रि संबंधि तिथौ स्मृतं मुनिभिः। अत एव तस्यामित्यादि स्कांदे पुराणे आषाढस्य सिते पक्षे द्वितीया
पुष्यसंयुता। तस्यां रथे समारोप्य रामं मां भद्रया सह यात्रोत्सवं प्रवृत्याथ प्रीणयेच्च द्विजान् बहून्। तथा कृष्णा माघे तिथौ
कार्यो सदा सा प्रीतये मम। मां जगन्नाथं सा यात्रा। लिंगपुराणे कार्त्तिके तु द्वितीयायां शुक्लायां भ्रातृपूजने। यानकुर्याद्वि
नश्यंति भ्रातरः सप्तजन्मानि। तस्या इति शेषः। महाभारते कार्त्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर यमो यमुनया पू
र्वं भोजितः स्वगृहे स्वयं। तस्यां निजगृहे पार्थ न भोक्तव्यमतो बुधैः यत्नेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनं। दानानि च प्र
देयानि भगिनीभ्यो विशेषतः। तथा यमं च चित्रगुप्तं च यमदूतांश्च पूजयेत् अर्घ्यश्चात्र प्रदातव्यो यमाय सहजद्वयैः। स
हजद्वये भगिनी भ्रातृभिः अर्घमंत्रः एह्येहि मार्त्तंड जपाश हस्त यमांतकालोकधरामरेश। भ्रातृद्वितीयाकृतदेवपूजां
गृहाण चार्घं भगवन्नमस्ते प्रणाममंत्रस्तु धर्मराज नमस्तुभ्यं नमस्ते यमुनाग्रज पाहि मां किंकरैः सार्द्धं सूर्यपुत्र नमोस्तु ते।

२९

तिथि०

यमुनां च संपूज्य नमस्कुर्य्यात् । यमस्वसर्नमस्तेऽस्तु यमुने लोकपूजिते । वरदा भव मे नित्यं सूर्य्यपुत्रि नमोऽस्तु ते । अन्नं दत्वा
पठति भ्रातस्तवानुजाताहं भुंक्ष्व भक्तमिदं शुभं । प्रीतये यमराजस्य यमुनाया विशेषतः । ज्येष्ठा चेदग्रजाताहमिति
वदेत् । अत्र भोक्तव्यं पुष्टिवर्द्धनमिति विधिसमभिव्याहृत फलश्रुत्वा भोजननियमस्य प्राधान्यात्तस्य स्वकालोऽपृथाविभ
क्तदिन पंचमांशो ग्राह्यः । यथा दक्षः पंचमेव तथा भागे संविभागो यथार्हतः । पितृदेवमनुष्याणां कीटानां चोपदिश्यते ।
। संविभागं ततः कृत्वा गृहस्थः शेषभुग्भवेत् इतिहासपुराणाद्यैः षष्ठं च सप्तमं नयेत् । संविभागो विभज्यान्नस्य प्रतिपादनं
देवोऽत्र वैश्वदेवकर्म्म संवेधी पंचमांशश्चालाभेतु । नभुंजीतोद्धृतस्नेहं नातिसौहित्यमाचरेत् । नातिप्रगे नातिसायं न नि
शीथे न चोषसीति मनुना पर्य्युदस्त सूर्य्योदयास्तान्तरकालोपि ग्राह्यः । सौहित्यं तृप्तिः । तत्र भोजनस्य रागप्राप्तत्वेपि
तत्कालस्य मुनिभिर्द्विरशनं प्रोक्तं विप्राणां मर्त्यवासिनां नित्यं । अहनि च तथा तमस्विन्यां सार्द्धप्रहरयामान्तरिति

कात्यायनीयेन नियमितत्वादि भोजनकालस्य वैधत्वेन शास्त्रीयत्वात् न सामान्यशास्त्रप्राप्तमुपजीवि पर्य्युदासासंगतिः। अ
त्रानध्ययनं प्रोक्तानां राजमार्त्तण्डे प्रकोटे चा द्वितीयाः कार्त्ताः प्रेतपक्षगते तृया। यानुक्ता नागरे प्रोक्ते चैत्रावन्याः पेरे पिच। चातु
र्मास्ये समाप्ते च द्वितीयायां भवेत् तिथिः। पराख्येनाख्यानध्यायः पुराणैः परिकीर्त्तितः। ज्योतिषे। तथा यमद्वितीयां यात्रायां सर
र्गां भवेत्॥ * ॥ अथ तृतीया॥ सा च चतुर्थीयुता रंभाव्रतेतर दैवकर्म्मसु ग्राह्या। रंभाभ्यां वर्जयित्वा तु तृतीयां मुनिसत्तम। अ
न्येषु सर्वकार्य्येषु गणयुक्ता प्रशस्यते इति ब्रह्मवैवर्त्तात्। गणो गणपतिस्तत्तिथिश्चतुर्थी ततश्च युग्मवाक्यं रंभाव्रतमात्र
परं। भविष्योत्तरे भद्रे कुरुष्व यत्नेन रंभाख्यं व्रतमुत्तमं। ज्येष्ठ शुक्ल द्वितीयायां स्नाता नियमतत्परा। रंभया कृतमिति रंभा
व्रतं। स्मृतिः वैशाखे मासि राजेंद्र शुक्लपक्षे तृतीयिका। अक्षया सा तिथिः प्रोक्ता कृत्तिकारोहिणीयुता। तस्यां दानादिकं पुराण
मक्षयं समुदाहृतं। भविष्ये या शुक्ला कुरुशार्दूल वैशाखे मासि वै तिथिः। तृतीया साक्षया लोके गीर्वाणैरपि वंदिता। योऽस्यां

२७

२७

तिथि० ३

ददाति कारकान् वारि राजसमन्वितान्। स याति पुरुषो वीर लोकान् वै हेममालिनः। करकान् कुंभान राजसमन्नं हेममालि
नः सूर्यस्य। ब्रह्मपुराणे। यः पश्यति तृतीयायां कृष्णं चंदनचर्चितं। वैशाखस्य सिते पक्षे स यात्यच्युतमंदिरं। स्कंदपुरा
णे वैशाखस्य सिते पक्षे तृतीयाक्षयसंज्ञिता। तत्र मां लेपयेद्गंधलेपनैरतिशोभनैः। ब्रह्मपुराणे वैशाखशुक्लपक्षे तु तृती
यायां जनार्दनः। यवानुत्पादयामास युगं चारब्धवान् कृतं। ब्रह्मलोकात् त्रिपथगां पृथिव्यामवतारयेत्। तस्यां कार्यो यवै
र्होमो यवैर्विष्णुं समर्चयेत्। यवान् दद्याद्द्विजातिभ्यः प्रयतः प्राशयेद्यवान्। पूजयेच्छंकरं गंगां कैलासं च हिमालयं। भ
गीरथं च नृपतिं सागराणां सुखावहं। स्नानं दानं तपः श्राद्धं जपहोमादिकं च यत्। श्रद्धया क्रियते तत्र तदानंत्याय कल्प
ते। सागराणां सगरवंशोद्भवानां। अत्रानंत्यश्रुतेः पूर्ववचनेन स्वत्र योगः फलातिशयार्थः॥*॥ अथ चतुर्थी। सा च पंच
मीयुता ग्राह्या युग्मात्। एकादश्यष्टमीषष्ठी अमावस्या चतुर्थिका। उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुता इत्यग्निपुराणा

२८

वचनाच्च। भविष्ये अमावै सोमवारे स्या रविवारे स्या सप्तमी। चतुर्थी भौमवारे स्या अक्षयादपि चाक्षया। यत्तु चतुर्थी संयु
ता कार्या तृतीया च चतुर्थिका। तृतीयया युतायां नैव पंचम्या कारयेत् क्वचिदिति ब्रह्मवैवर्त्त वचनं पंचमी युता निषेधकं
तद्भिनायकव्रतपरमिति गुरुचरणाः। तृतीया युता निषेधकत्वे क्वचिदित्यनुपपत्तेः सर्वत्रैव पंचमी युतायाग्रहणात्
सारस्वत्यादि प्रदोषमाह स्मृतिः। त्रयोदश्यां चतुर्थ्यां च सप्तम्यां द्वादशी तिथिः। प्रदोषेऽध्ययनं धीमान् न कुर्वीत यथा
क्रमं। सारस्वतो गाणपतः सौरश्च वैष्णवस्तथा। प्रदोषशब्दोऽत्र प्रथमः प्रहर इति हेमाद्रिः रात्रिपर इति निर्णया
मृते। भोजदेवः शुक्लपक्षे चतुर्थ्यां तु सिंहे चंद्रस्य दर्शनं। मिथ्याभिशापं कुरुते न पश्येत्तं तु यत्नतः। चतुर्थ्यां दर्शननि
षेधात् तत्रोदितस्य चंद्रस्य पंचम्यां दर्शनेऽपि दोषः। अतः पंचाननगते भानौ पक्षयोरुभयोरपि। चतुर्थ्यामुदितश्चंद्रो ने
क्षितव्यः कदाचन। इत्यत्र चतुर्थ्यां नेक्षितव्यः। उदितः उक्तो मुनिभिरित्यर्थः। अथवा चतुर्थ्यां मित्रस्य प्रधान क्रियानुयस्या

२८

तिथि०

स्पर्हि न त्वान्वेक्षित व्याङ्व्यपेतेनान्वयो न तूदिति ङ्व्यपेतेन। तथा चाव्यक्तशब्द प्रधानगामीति सूत्रे अव्यक्तशब्दस्य प्रधानेन सं-
बंध इति भट्टनारायणव्याख्यानमिति उदितशब्द स्वव्र्ङ्दित व्यावृत्तिपरैः स्वरूपाख्यानपरो वा ब्राह्मणीनु शुनादृष्टापि बु-
कोपेक्षणा वा गवा। उदितं सोमनस्तत्र दृष्ट्वा सद्यः शुचिर्भवेदिति पराशरोक्तोदितवत्। ननु एकपदस्य कथमनेकार्थतेति चेन्न
यावन्तोऽर्थाः स्मार्यन्ते पदानीति तथा चोक्तं। यावतामेव धातूनां लिंगं रूढिगतं भवेत्। अर्थश्चैवाभिधेयस्तु तावद्भिर्गुणविग्र-
हः। लिंगं सामर्थ्यं रूढिगतं प्रसिद्धं तत्र प्रसिद्धं हन हिंसागत्योरित्यादौ गमनादिकं अभिधेयो वाच्यः तावद्भिर्धातुभि-
र्गुणविग्रहः। गुणो गौणानामपि विग्रहो ग्रहणं यत्रार्थे स तथा। तेन धातुसमसंख्यार्थग्रहणं पदस्य ब्रह्मपुराणोक्तं सिंहाकोऽधि-
कारे नारायणोऽभिसम्प्रस्तु निशाकर मरीचिषु। स्थितश्चतुर्थ्यां सघापि मनुष्याय पतेत्रुसः। अतश्चतुर्थ्यां चंद्रं तु प्रसादाद्वीक्ष्य
मानवः। पटेज्ञात्रेयिकावाक्यं प्राङ्मुखो वाप्युदङ्मुखः। अभिसम्प्रः परिवादविषयीभूतः सोऽभिशापः धात्रेयिकावाक्यं।

विष्णुपुराणे। सिंहः प्रसेनमवधीत् सिंहो जांबवता हतः। सुकुमारक मारोदीस्तव ह्येष स्यमंतकः। अनेन मिमंत्रितं जलं
पेयं माचारात् स्यमंतकोपाख्यानं च श्रोतव्यं। माघशुक्लचतुर्थ्यां गौरी पूज्या वस्यमोसा वचनात्॥*॥ अथ पंचमी। सा तु
चतुर्थीयुता ग्राह्या युग्मात्। अत्र पंचमी तु प्रकर्तव्या चतुर्थीसहिता प्रभो इति स्कंदपुराणाच्च। अत्र पंचमी तु प्रकर्तव्या ष
ष्ठ्या युक्ता तु नारद इति ब्रह्मवैवर्ते वचनं नागशुक्लापरं शुक्लपक्षे तिथिग्राह्ये ह्युपकवाक्यत्वादिति केचित् तद्विषयं चतुर्थीसंयुता
कार्या पंचमी परया न तु। दैवे कर्मणि प्रत्ये च शुक्लपक्षे तथा सिते। इति कालमाधवीयधृतहारीतवचनात्। यद्यपि पि
त्र्येतन्निषेधो निरर्थको युग्मवचनस्य दैवकृत्यमात्रपरत्वात् तथापि यथापराह्णिके पितृकृत्ये तत्परविद्धा न ग्राह्या तथा दै
वेपीति विवक्षया दैवपित्र्ययोः सहोपन्यासः। ब्रह्मवैवर्तवचनं तु स्कंदोपवासविषयकमिति माधवाचार्याः। अत्र पंचम्या
मुपवासः षष्ठ्यां स्कंदोपासनाय षष्ठीसमेता कर्तव्या सप्तमी नाष्टमीयुता। पारणे गोपासना येह षष्ठ्या मातुरूपो षष्ठ्यामिति मवि

२९

तिथि०

ष्य पुराणोक्त व्रत पतंगः सूर्य्यः। तथाच वशिष्ठः कृष्णाष्टमी स्कंदषष्ठी शिवरात्रि चतुर्दशी। एताः पूर्वयुताः कार्य्यास्ति
थ्यंते पारणं भवेत्॥ स्कंदषष्ठी वक्ष्यते। वस्तुतस्तु पंचमी पर्याने त्विति वचनांतरैकवाक्यतया षष्ठ्यां युक्तेत्यकारप्रश्ले
षः। देवी पुराणे सुप्ते जनार्दने कृष्णे पंचम्यां भवनांगने। पूजयेन्मनसां देवीं स्नुहीविटपसंस्थितां। पद्मनाभे गतेशय्यां देवै
: सर्वैरनंतरं। पंचम्यामसिते पक्षे समुत्तिष्ठति पन्नगी। मनसा देवी विषहरी स्नुहीसंजवृक्षः। देवैरिति सहार्थे तृती
या। तथा देवीं संपूज्य नत्वा वन सर्पभयमाप्नुयात्। पंचम्यां पूजयेन्नागाननंताद्यान् महोरगान् क्षीरं सर्पिस्तु नैवेद्यं दे
यं सर्वविषापहं। एवं गारुडेपि। तत्रैव नागानाह अनंतं वासुकिं शंखं पद्मं कंबलमेव च। तथा ककोटकं नागं धृतराष्ट्रं
घनंजयं। कालीयं तक्षकं चैव पिंगलं मासि मासि वै। यजेत्तान सितान्नागान् दष्टो युक्तो दिवं व्रजेत्। दष्टयुक्तः दष्टेन दंशेन यु
क्तः पुराणांतरेपि। अनंतो वासुकिः पद्मो महापद्मोऽथ तक्षकः। कुलिकः कर्कोटः शंखोह्यष्टौ नागाः प्रकीर्तिताः। पुराणांत

३०

रेपि शेषः पद्मो महापद्मः कुलिकः शंखपालकः वासुकीतक्षकश्चैव कालियो मणिभद्रकः ऐरावतो धृतराष्ट्रः कर्कोटक
धनंजयौ। अत्र च योसावनंतरूपेण ब्रह्मांडं सचराचरं। पुष्पवद्धारये मूर्ध्नि तस्मै नित्यं नमो नमः। इत्यनेनोंकार पूर्वेण मंत्
स्य पुराणोक्तेनानंतं पूजयेत्। रत्नाकरे पिचुमर्द्दस्य पत्राणि स्थापयेद्भवनोदरे। स्वयं चापि तदश्नीयाद्द्विजसंघांश्चैव भोजयेत्
पिचुमर्दस्य निंबस्य। भविष्यान्तरे माघशुक्लपक्षमधिकृत्य। चतुर्थी वरदा नाम तस्यां गौरी सुपूजिता। सौभाग्यमतुलं कुर्या
त् पंचम्यां श्रीरपि श्रियं। संवत्सरप्रदीपे। पंचम्यां पूजयेल्लक्ष्मीं पुष्पधूपान्नवारिभिः। मस्याधारं लेखनीं च पूजयेन्न लिखेत्त
तः। माघे मासि सिते पक्षे पंचमी या श्रियः प्रिया। तस्याः पूर्वाह्न एवेह कार्यः सारस्वतोत्सवः। सारस्वतोत्सव इत्युपादानात् श्रि
यः सरस्वत्याः। तथा च व्याडिः लक्ष्मी सरस्वती धी त्रिवर्ग संपद्विभूति शोभासु। उपकरणावेशरचनाविधासु च श्रीरिति प्र
थिता। तथा चोक्तं गांदघ्यादित्यादौ नानार्थशब्दस्यापि प्रसिद्धार्थे न व्यवहारः। विपरीतार्थे ग्राहकवाक्यशेषसत्वेन प्रसिद्धार्थेन

२०

तिथि०)

व्यवह्रियते। सर्वथा नानार्थे शब्दव्यवहारस्तु श्लेषकाव्यादाविति। तरुणशकलमिंदोर्विभ्रती शुभ्रकांतिः कुचभरनमितां-
गी सन्निषण्णा सिताब्जे निजकरकमलोद्यल्लेखनीपुस्तकश्रीः सकलविभवसिद्ध्यै पातु वाग्देवता न इति सारदां ध्यायेत्
पाद्यादिभिः पूजयित्वा ॐ भद्रकाल्यै नमो नित्यं सरस्वत्यै नमो नमः। वेदवेदांतवेदांगविद्यास्थानेभ्य एव च स्वाहेति ब्रह्मपुराणो-
क्तेन त्रिः पूजयेत्। मात्स्यसूक्ते बंधुजीवं च द्रोणांच सरस्वत्यैन दापयेत् सरस्वतीं संपूज्य यथा न देवो भगवान् ब्रह्मा लोकपितामह-
ः त्वां परित्यज्य संतिष्ठे तथा भव वरप्रदा वेदाः शास्त्राणि सर्वाणि नृत्यगीतादिकं च यत् न विहीनं त्वया देवि तथा मे संतु सि-
द्धयः। लक्ष्मीर्मेधा धरा पुष्टिर्गौरी तुष्टिः प्रभा धृतिः। एताभिः पाहि तनुभिरष्टाभिर्मां सरस्वति। इति मात्स्यपुराणोक्तैः प्रार्थ-
येत् ॥ अथ षष्ठी। सा च सप्तमियुता ग्राह्या युग्मात्। राजमार्तंडे ज्येष्ठे मासि सिते पक्षे षष्ठी चारण्यसंज्ञिता। व्यजनैककरास्ता-
स्याभटंति विपिने स्त्रियः। तां विंध्यवासिनीं स्कंदषष्ठीमाराधयंति याः। कंदमूलफलाहारा लभंते संततिं शुभां। कंदं सूरणादि

३।

मूलं तद्दिनरन्मूलकारि । भविष्ये । येयं मार्गशिरे मासि षष्ठी भरत सत्तम । पुण्या पापहरा धन्या शिवा शान्ता गुहप्रिया । देवीपु
राणे चैत्रमधिकृत्य षष्ठ्यां स्कन्दस्य कर्त्तव्या पूजा सर्वोपचारिका इहैव सुखसौभाग्यं अंते विष्णुपुरं व्रजेत् । इयमेव स्कन्दषष्ठी
कृष्णा चैत्रस्य पंचमीयुते वोपोष्या । कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिचतुर्दशी । एताः पूर्वयुताः कार्यास्तिथ्यन्ते पारणं भवेदिति ।
ब्रह्मवैवर्ते विष्णुधर्मोत्तरे अष्टमी च तथा षष्ठी नवमी च चतुर्दशी । शिरोऽभ्यंगं न कुर्वीत पर्वसंधौ तथैव च ॥*॥ अथ स
प्तमी सा च षष्ठीयुता ग्राह्या युग्मात् पेठीनसिवचनाच्च । यथा पंचमी सप्तमी चैव दशमी च त्रयोदशी प्रतिपन्नवमी चैव क
र्त्तव्या सन्मुखी तिथिः । सन्मुख्या मुक्तं स्कांदे । सम्मुख्यं नाम सा या तु व्यापिनी दृश्यते यदा । अत एव परदिने त्रिसंध्यकाला
व्यापित्वे षष्ठीयुक्तसप्तम्यामुपवासमाह भविष्यपुराणं । षष्ठीसमेता कर्त्तव्या सप्तमी नाष्टमीयुता । पतंगोपासनाये तु षष्ठ्यामा
हुरूपोषणमिति यथोपोषणे तथा कर्म्मोत्तरे । तथा षष्ठ्यां युता सप्तमी च कर्त्तव्या तात सर्वदा । षष्ठी च सप्तमी यत्र तत्र सन्निहितो हरि

२१

तिथि०)

रिति स्कंदपुराणात्। तथा शुक्लपक्षस्य सप्तम्यां सूर्यवारो यदा भवेत् सप्तमी विजया नाम तत्र दत्तं महाफलं। भविष्ये। शालि
तंडुलप्रस्थस्य कुर्यादन्नं सुसंस्कृतं। सूर्याय चरुकं दत्वा सप्तम्यां च विशेषतः। यावंतस्तंडुलास्तस्मिन् नैवेद्ये परिसंख्यया।
तावत् वर्षसहस्राणि सूर्यलोके महीयते। गोपथब्राह्मणं द्वात्रिंशत् पलिकं प्रस्थमुक्तं स्वयमथर्वणा। ज्योतिषे। पलं तु लौ
किकैर्मानैः सार्धरत्ति द्विमासकं। तोलकत्रितयं तैर्ज्योतिर्वैः स्मृतिसम्मतं। तेन चतूरत्तिकाधिकमाषकपंचाधिकषड
धिकशततोलकमिताः प्रस्थतंडुला इति। एवं चैतन्न्यूनाधिकयोः फलतारतम्यं बोध्यं। एवं देवतांतरेपि तत्तल्लोकमहित
त्व फलेन कल्पयितुं युक्तं अत एव शिवेप्येवं वक्ष्यते। वराहपुराणे। अथापरं महाराज व्रतमारोग्यसंज्ञकं। कथयामि परं
पुण्यं सर्वपापप्रणाशनं। तथैव माघमासस्य सप्तम्यां समुपोषितः पूजयेद्भास्करं देवं विष्णुरूपं सनातनं। आदित्य भास्कर र
वे भानो सूर्य दिवाकर। प्रभाकरेति संपूज्यो देवः सर्वेश्वरो रविः। षष्ठ्यां चैव कृताहारः सप्तम्यामुपवासकृत्। अष्टम्यां चैव भुंजी

३२

न एष एव विधिः स्मृतः। अनेन विधिना पूर्णो वत्सरं योऽर्च्चयेद्रविं। तस्यारोग्यं धनं धान्यमिह जन्मनि जायते। परत्र च शुभं
स्थानं यस्मान्नाभिनिवर्त्तते। सप्तम्यां समुपोषित इत्यादि कर्म्मारिणः तेन समुपवस्तु मारब्धव्य वेत्यर्थः। ततश्च सप्तम्यामेवो
पवास संकल्प रविस्तु विष्णुरूपतया ध्येयः अभिलाषेतु तिथावित्युक्ता आरभ्येति ऐहिकारोग्य धनधान्य पारलौकिकशु
भस्थान कामः संवत्सरं यदारोग्यव्रतमिति शेषः। ततश्च प्रतिसप्तम्यामुपवासं कुर्वन् उं आदित्य भास्कर रवे भानो सूर्य्य दि
वाकर। प्रभाकर नमस्तुभ्यमिति मंत्रेण पूजयेत्। अत्र षष्ठ्यादिषु तत्तत्कर्म्मविधानात् षष्ठीसमेतत्वस्य न विषयः कालि
कापुराणे भक्तं प्रति सूर्य्यवाक्यं अदृष्ट्वा मां न भुंजीत विन्मूत्रे नैव दर्शयेत्। तथा मद्बद्धो धृत निर्म्माल्यं शरीरे न च धारयेत्। अत्रो
प्रतिमा। कृत्यचिंतामणौ। अर्कोग्रं शुचिगोमयं सुमरिचं तोयं फलं चाश्नुते मूलं नक्तमुपोषणं च विधिवत् कृत्वैकभक्तं नरः।
क्षीरं वाय्वशनं हुताशनमिति प्रोक्तान्यमूनि क्रमात् भोजनस्य वाग प्राप्तत्वेन विधित्वाभावात् परिसंख्यातश्च अत एव शूद्रस्य

२२

तिथि०

कपिलाक्षीरपानाभावेपि नव्रतवैगुण्यं कृत्वा द्वादशीसप्तमीदिनकृतः प्राप्नोत्यभीष्टं फलं। अत्र चाकोपादीनरभोजन नि-
वृत्तिरवसीयते तपस्त्वात्। तथा च मत्स्यपुराणे तपोभिः प्राप्यतेभीष्टं नासाध्यं हि तपस्यतः। दुर्भगत्वं वृथा लोको वहते स-
ति साधने। तपसः क्लेशस्वभावत्वं तच्चैवोक्तं यथा उमेति चपला पुत्रि तस्मान्नारकं वपुः। सोढुं क्लेशासमर्थस्य तपसः सौ-
म्यदर्शने। व्यक्तमुक्तं यथा। अर्कपत्राङ्कुरमात्रं मतरीक्ष्ण गृहीतकं। कपिलाविड्यवमात्रं मंजुनं मरिचं नलं। कदलीफल-
मध्यं तु करणमात्रमपक्वकं। कुशमूलं यवमात्रं स्वच्छायाद्विगुणोक्षयो। मत्स्यमितो दन्तं नक्तं मुद्गोपवसनं तथा। एकभ-
क्तं मयूराण्ड प्रमाणं भोजनं मतं। अर्द्धप्रसृतिमात्रं तु कपिलादुग्धभक्षणं। स्नात्वा संपूज्य मार्तण्डं प्राङ्मुखो वायुमाशयेत्।
घृतं स्वल्पं पौषमासे मध्याह्ने समाचरेत। ब्राह्मणान् भोजयेत्पश्चात् गुडक्षीरनिरामिषैः विप्राय दक्षिणां देया विभवस्यानु-
रूपतः। अपूपां पारणां कुर्यात् कटुम्लरहितेन च। मुद्गमाषतिलादीनि घृतं चैव विवर्जयेत्। एकसिद्धं भक्ष्यमुक्तमकेतं त्रा

३३

नुसारतः। एतद्व्रतस्य माघादिविशेषविहितकर्म्मत्वेन मलमासेतरत्र कर्त्तव्यत्वमाह वशिष्ठः लिंगपुराणं। प्रारब्धेयनुव्रते
पश्चात्संप्राप्तेत्वधिमासके। पूर्वमानेन तं त्यक्त्वा कार्य्यं द्वादशमासिकं। पूर्वमानेन मलिम्लुचशून्यावृमानेन तं मलमासं
त्यक्त्वा द्वादशमासिक द्वादशमासेष्वेव कर्त्तव्यं न मलमास इत्यर्थः। यत्तु मासे मलिम्लुचे प्येवं यजेद्देवीं सशंकरां। किंतु नोद्याप
नं कार्य्यमित्याह भगवांश्चिव इति विष्णुरहस्यवचनं तन्मासविशेषानं कित मासमात्रकर्त्तव्यामावस्यादि कर्त्तव्यतापरं।
उद्यापनं प्रतिष्ठा। एवमारंभोपि निषिद्धः। गार्ग्यः अस्तंगते गुरौ शुक्रे बालवृद्धे मलिम्लुचे। उपायनमुपारंभं व्रतानां नैव
कारयेत्। संपूर्णे च व्रते चैव प्रतिष्ठा तदनंतरं। न कालनियमस्तत्र तत्र विघ्ने पराधिके इति वचननिषेधस्तु प्रकृतकालाकृत
परः। उपायनं प्रतिष्ठा उपारंभ आरंभः। एतच्च कालाशुद्धिमात्रपरं। तत्तन्मात्रविधिकल्पने गौरवात् भविष्ये माघे मासि सिते
पक्षे सप्तम्यां नियमेन या। स्नात्वा शिवं लेखयित्वा मंडले च सहांबिकं। पूजयेच्च तदा तस्या दुःखं प्राप्नैव विद्यते। इदं कुक्कुटीव्र

२२

तिथि०

नत्वेन स्नातं । भविष्ये सूर्यग्रहणतुल्या हि शुक्ला माघस्य सप्तमी । अरुणोदयवेलायां तस्यां स्नानं महाफलं । माघे मा
सि सिते पक्षे सप्तमी कोटिभास्करा । दद्यात्स्नानार्घ्यदानाभ्यामायुरारोग्यसंपदः अरुणोदयवेलायां शुक्लामाघस्य स
प्तमी । गंगायां यदि लभ्येत सूर्यग्रहशतैः समा । कोटिभास्करा कोटिसप्तमीतुल्या । सूर्यग्रहणजं फलं स्नानजं सन्निहिते बुद्धि
रंतरंगेति न्यायात् । तेन बहुशत सूर्यग्रहणकालीन गंगास्नानजन्यफलसमफलप्राप्तिः फलमत्र ज्ञेयं । अत्र बहुशत ।
सूर्यग्रहणानां प्रत्येकाधिकरणतासंसर्गेणान्वयात् । कालानां स्नानानां तत्फलानामपि बहुत्वं लभ्यते अतो नाप्रसिद्धिः
। पूर्णासप्तम्यां पूर्वोपरयोर्येनारुणोदयकाले सप्तमी तत्र पूर्वेतात्काले स्नानं । चतस्रो घटिकाः प्रातररुणोदय उच्यते । यामी
नां स्नानकालोयं गंगांभः सदृशाः स्मृताः । त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यंतचतुष्टयं । नाडीनां तदुभे संध्ये दिवसाद्यंतसंज्ञिते ।
इति कालमाधवीयधृतब्रह्मवैवर्तीये येन पूर्वेतात्कालस्य पूर्णतिथिसंबंधिदिनकर्मांगत्वेन ज्ञातस्य चेतरांगत्वेनाभिधा

नात् अत एव दृष्टेन नाकालमारभ्याह्निककृत्यमभिहितं। अत्रारुणोदयकाले मुहूर्तोन्यूनतिथिलाभ एव स्नानं। व्रतो
पवासस्नानादौ घटिकैका यदा भवेत् उदये सा तिथिर्ग्राह्या श्राद्धादावस्तगामिनीति विष्णुधर्मोत्तरोक्त। अत्र घटिकामु
हूर्तः आद्युपयोग्यकालानुरोधात्। ब्रह्मवैवर्त्तवचने घटिकाद्वंद्वरूपापरवचने नाडीनामाद्यन्तवर्त्तुपूर्वमित्येकवाक्यत्वात्
। येन्तु सूर्योदयात् प्रागपि प्रातःस्नानविधानात् तत्रैव माघसप्तम्याख्यगुणफलविधिलाघवादित्याहुस्तच्चिंत्यं। प्रकरणा
न्यत्वे प्रयोजनान्यत्वमिति जैमिनिसूत्रेण प्रकरणभेदे गुणविध्यसिद्धेः अत एव कल्पतरुरत्नाकरयोः। यदुक्तं हि पुलान्
मोगान् चंद्रसख्ये ग्रहोपमान्। प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्गुनाविति विष्णुस्मृतौ नित्यस्नानप्रकरणात्प्रक
रणांतराधिकरणन्यायेन काम्यस्नानांतरमिदमुक्तं। न तु गुणफलविधिः किंतु काम्यकरणे प्रसंगान्नित्यसिद्धिरिति। अत्र
माघमासनिमित्तकमाघसप्तमीनिमित्तकनित्यकाम्यस्नानयोस्तु प्रातविधानात् नैमित्तिकत्वेन प्रायश्चित्तवत् सकृदनुष्ठानं

२४

तिथि०

प्रधानस्याक्रियायत्र साँगंततत् क्रियते पुनः। तदंगस्याक्रियामात्रं नावृत्तिर्नेवततत् क्रियेति कात्यायनवचनात्। नस्नानमा
चरेद्भुक्त्वा नातुरोन महानिशि। नवासोभिः सहाजस्रं नाविज्ञाते जलाशये इति मनुवचने नैकदा(?) सूत्रस्नाननिषेधात्। धर्म्मे
विन्नाचरेत् स्नानमाह्निकं तु पुनः पुनरिति वचनाच्च। अत एव नांदीमुखप्रकरणशेषे एवं च प्रधानानामपि काम्यानां तत्त
द्देशकालविहितानां तत्रैव सिद्धिरिति श्राद्धचिंतामणौ। निष्कामविष्णुप्रीतिकामयोः सुतरां सकृदनुष्ठानं गुणानादरत
स्यात् फलतारतम्यमितिन्यायेन फलं बोध्यं। तत्तु इक्षुक्षीरगुडादि माधुर्य्यभेदवन्निर्दिष्टमशक्यं। पक्षांतरेपि कन्यास्थेर
वौ श्राद्धं प्रशस्यते। कन्यांगते पंचमेतु विशेषेणैव कारयेत् इति हेमाद्रिधृतादित्यपुराणोक्तवत्। एतद्वचन प्रागुक्तं तु।
कार्तिकमलमासावृ विषयं देशकालाश्रमक्षेत्रद्रव्यदानमनोगुणाः। सुकृतस्यापि दानस्य फलातिशयहेतव इति ब्र
ह्मपुराणोक्तवच्च। तीर्थभेदे त्वेकदापि नानास्नानं। विषुवद्दिवसे प्राप्ते पंचतीर्थीविधानतः इति ब्रह्मपुराणादिपुराणवचना

तीर्थभेदेन तत्र प्रसंगयोरसंभवात्। अत एव गंगावाक्यावली तीर्थचिंतामण्योः। यत्तु प्रयागे अहःस्नानं कोटीकृतेऽपि मा
घसप्तमीस्नानादावसाधारणसंकल्पेन पुनस्तथैव प्रातःस्नानाचरणं। तदयुक्तं तदा सकृत्स्नानस्यैव विहितत्वात् अन्य
था अहःस्नानफलकामनायां तदानंत्यापत्तिरित्युक्तं। स्नानपरिपाटी माह कृत्यकल्पलतायां विष्णुः सप्तबदरपत्राणि
सप्तार्कपत्राणि च शिरसि निधाय ॐ यद्यज्जन्मकृतं पापं मया सप्तसु जन्मसु। तन्मे रोगं च शोकं च माकरी हंतु सप्तमीत्यु
च्चार्य्य स्नायादिति शेषः। रोकं छिंद्रं। तिथिकृत्यस्य पौर्णमास्यंत मासांगीकारान्माकरीपदं मकरस्थार्को रवधचांद्रमासी
यतिथिपरं। तिथिकृत्ये व कृष्णादिं ब्रुते शुक्लादि मे वच। विवाहादौ च सौरादिं मासं कृत्ये विनिर्दिशेदिति ब्रह्मपुराणात् म
न्वंतरादित्वेन तथायुक्तत्वात्। यथा मात्स्यपुराणे यस्मान्मन्वंतरादौ तु रथमापुर्दिवाकराः। माघमासस्य सप्तम्यां तस्मात्सा
रथसप्तमी। अरुणोदयवेलायां तस्यां स्नानं महाफलं। अत एव नारसिंहे रथाख्या यामित्युक्तं। यथा महानवम्यां द्वादश्यां म

रत्यामपि चैव हि । तथास्त्रय तृतीयायां शिष्यान्नाध्यापयेद्बुधः । माघमासे तु सप्तम्यां रथाख्यायां च वर्जयेत् । द्वादश्यां शयनो
त्थाने द्वादश्यां भरण्यां शक्रध्वजपाते भरण्यामिति कल्पतरुः । अत्र महानवम्यादिसाहचर्याच्छुक्लत्वं प्रतीयते अतएवच
तुर्दशा मन्वंतरादिगणनेन क्वापि राश्युल्लेखः । तथा च भविष्यमात्स्ययोः । अश्वयुक् शुक्लनवमी द्वादशी कार्त्तिकी तथा । तृतीया चै
त्रमासस्य तथा भाद्रपदस्य च । फाल्गुनस्याप्यमावस्या पौषस्यैकादशी तथा । आषाढस्यापि दशमी तथा माघस्य सप्तमी । श्रावणा
स्याष्टमी कृष्णा तथाषाढस्य पूर्णिमा । कार्त्तिकी फाल्गुनी चैत्री ज्यैष्ठी पंचदशी सिता । मन्वंतराद्यस्त्वेता दत्तस्याक्षयकारिकाः
अत्रामावस्याष्टमी व्यतिरिक्ताः शुक्लाः । पुनः पुनस्तयोपादानात् उपक्रमोपसंहारयोः शुक्लत्वकीर्त्तनाच्च । अत्र कामधेनौ
तृतीया चैत्रमासस्येति । कल्पतरौ तु तृतीया माघमासस्येति लिखितं । अत्र पाठद्वैधे श्रीपतिरत्नमालायां अश्वयुजि शुक्लनव
मी द्वादश्युर्जे मधौ तृतीया चेति पाठाच्चैत्र तृतीयैव ग्राह्या । श्रीदत्तोप्येवं । माघसप्तम्याश्चाङ्गत्वं सौरागमेपि । अर्कपत्रे सवद

३६

रे दूर्वाक्षतसचंदनैः। अर्घांगविधिनार्घ्यं च दद्यादादित्यतुष्टये। माघे वा फाल्गुने वापि भवेद्वै माघसप्तमी। सा करीति
वर्यते प्रोक्तं तत् प्रायो वृत्तिदर्शनात्। अर्घांगविधिना। योऽर्घांगमर्घ्यमापूर्य भानो मूर्ध्नि निवेदयेत्। ताम्रपात्रार्घ्यदानेन पुण्यं
दशगुणं स्मृतमिति भविष्यपुराणीयेन। आदित्यपुराणे कृष्णराशिविशेषेण यत्कर्म विहितं नरैः। दैवं वाप्यथवापित्र्यं तदत्र
त्रापि दृश्यते। अर्घ्यमंत्रस्तु जननी सर्वभूतानां सप्तमी सप्तसप्तिके सप्तव्याहृतिके देवि नमस्ते रविमंडले। प्रणाममंत्रस्तु आदि
त्यपुराणे सप्तसप्तिवह प्रीत सप्तलोकप्रदीपन। सप्तम्यां हि नमस्तुभ्यं नमोऽनंताय वेधसे। सप्तिरश्वः॥*॥ अथाष्टमी।
सा तु शुक्ला नवमीयुता ग्राह्या युग्मात्। कृष्णा सप्तमीयुता। यथा निगमः कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी। पूर्वविद्धै
व कर्तव्या परविद्धा न कुत्रचित्। उपवासादिकार्येषु एष धर्मः सनातनः। भविष्यपुराणे। चतुर्दश्यां तथाष्टम्यां पक्षयोः शुक्ल
कृष्णयोः। योऽष्टम्येकं न भुंजीत शिवार्चनपरो नरः। यत्पुण्यमक्षयं प्रोक्तं सततं सत्रयाजिनां। तत्पुण्यं सकलं तस्य शिवलोकं च

२६

तिथि० २

गच्छति । एतत्तं सत्रसार्यपक्षाय पुण्यं समं पुण्यप्राप्तिः शिवलोकगमनं च फलं । फाल्गुनाष्टमी चतुर्दश्योरारभ्य वर्षं यावत्
प्रत्यष्टमि प्रति चतुर्दश्युपवासव्रतं । कालिकापुराणे । येषा ललितकांताख्या देवी मंगलचंडिका वरदाभयहस्ता च द्वि
भुजा गौरदेहिका रक्तपद्मासनस्था च मुकुटकुंडलमंडिता रक्तकौशेयवस्त्रा तु स्मितवक्त्रा शुभानना । नवयौवनसंप
न्ना चार्वंगी ललितप्रभा । उभयाभासितं मंत्र यत् पूर्वे त्वेकमक्षरं । मंत्रमस्यास्तु तत्त्रेयं तेन देवी प्रपूजयेत् । एकमक्षरं
शक्तिबीजरूपं । अष्टम्यां च नवम्यां च पूजा कार्या विवृद्धये । पटेषु प्रतिमायां वा घटे मंगलचंडिकां । यः पूजयेद्दौमदि
ने शुभे दूर्वोक्तैः शिवां । एतत्तं साधकः सोपि काममिष्टमवाप्नुयात् । शनैश्चरस्य वारे वा वारे वा मंगलस्य च । कृष्णाष्टमी
चतुर्दश्यौ पुण्यात् पुण्यतरे स्मृते । तथा सोमवारे पमावस्या आदित्ये हेच सप्तमी । चतुर्थ्यां गारवारे च अष्टमी च बृहस्पतौ
अत्र यत् क्रियते पापमथवा धर्म्मसंचयः । षष्टिवर्षसहस्राणि प्रतिजन्मन दक्षयं ॥*॥ प्रणम्य जगतामीशं वसुदेवसुतं हरिं

२७

तज्जन्मतिथितत्त्वानिवृत्तिःश्रीरघुनंदन ॥ अथ जन्माष्टमी ब्रह्मपुराणे अथ भाद्रपदे मासि कृष्णाष्टम्यां कलौ युगे । अष्टा
विंशतितमे जातः कृष्णोसौ देवकीसुतः । अष्टाविंशतितमे सावर्णिकमन्वंतरप्रथमयुगापेक्षयेति शेषः । विष्णुपुराणेऽम
हामायां प्रति भगवद्वाक्यं प्रावृट्काले च नभसि कृष्णाष्टम्यामहं निशि । उत्पत्स्यामि नवम्यां च प्रसूतिं त्वमवाप्स्यसि ॥
त्यादिषु भाद्रपदे नभःपदयोगविरुद्धतात्कालस्यैकश्रुतिमूलकतया गौणचांद्रेण भाद्रतामुख्यचांद्रेण श्रावणतेति
अभिलापस्तु गौणचांद्रेणैव तदर्थ एव भाद्रपदप्रयोगात् अन्यथा तदभिधानमनर्थकं स्यात् । तिथिकृत्ये च कृष्णादिमिति
प्रागुक्तत्वाच्च । यत्तु वसिष्ठसंहितायामेकस्मिन् वचने श्रावणनभसोरुपादानं तत् सौरामिप्रायेण । यथा श्रावणे वा नभ
स्येवा रोहिणीसंयुताष्टमी । यदा कृष्णैर्नरैर्लब्धा सा जयंतीति कीर्त्तिता । कृष्णे कृष्णपक्षे । तत्र सिंहार्के रोहिणीयुक्ता नराः
कृष्णाष्टमी यदि । रात्र्यर्द्धपूर्वापरगा जयंतीकलयापि वेति वराहसंहितायावचनान्मध्यरात्रप्राप्ताववेव जयंतीत्वं न रोहिण्या

२७

ष्टम्यो योगमात्रे । एतेन द्वादशमासेष्वपि कृष्णाष्टमीरोहिणीयोगपुरस्कारेण जयन्तीव्रतमिति द्वैतनिर्णयोक्तं निरस्तं उ
क्तवचनविरोधात् । सूर्याचन्द्रमसोर्यः परः सन्निकर्षः सा/मावस्येति गोभिलसूत्रेणाप्योक्तिः शास्त्रोक्तगणनया चन्द्रसूर्य
योरमावस्यायामेकराश्यवस्थाननियमेन द्वादशसु मासेषु अष्टम्यां रोहिणीयोगस्य सर्वथैवासंभवाच्च । भविष्योत्तरे श्राव
णे वकुले पक्षे कृष्णजन्माष्टमीव्रतं । न करोति नरो यस्तु स भवेत् क्रूरराक्षसः । वर्षे वर्षे तु या नारी कृष्णजन्माष्टमीव्रतं । न
करोति महाक्रूरा व्याली भवति कानने । भविष्ये सप्तमीसार्द्धं यामं चेद्रोहिणीं वा न संस्पृशेत् । व्रतं संकल्पयेत्तत्र न च रात्रौ
कदाचन । तत्र सप्तम्यां तद्दिने तस्या एव प्रातर्लाभात् तदानीं संकल्पमाह बृहस्पतिः । प्रातः संध्यां ततः कृत्वा संकल्पं बुध
आचरेत् । ब्रह्मवैवर्त्ते मन्वादिदिवसे प्राप्ते यत् फलं स्नानपूजनैः । फलं भाद्रपदे ष्टम्यां भवेत् कोटिगुणं द्विज । तथा तस्यां
तिथौ वारिमात्रं पितॄणां यः प्रयच्छति । गयाश्राद्धं कृतं तेन शताब्दं नात्र संशयः । पूजा च मध्यरात्रे कृष्णाष्टम्यां तु रोहिण्यामहे

३८

रात्रेऽर्चितं हरेरिति गारुडादृश्यमाणवचनात्तात्तु । अन्यादृशप्युक्तं भविष्ये त्रिकालं पूजयेद्देवं दिवारात्रौ विशेषतः अ
ष्टराज्ञावपि तथा पुष्पैर्नानाविधैरपि । अत्र भविष्यपुराणे विष्णुधर्मोत्तरांशे संक्षिप्य पूजाविधिरिहोच्यते । पार्थ तद्दिवसे
प्राप्ते दंतधावनपूर्वकं उपवासस्य नियमं गृह्णीयाद्भक्तिभावतः वासुदेवं समुद्दिश्य सर्वपापप्रशांतये । उपवासं करिष्यामि
कृष्णाष्टम्यां नमस्यहं । अद्य कृष्णाष्टमीं देवीं नभश्चंद्ररोहिणीं अर्चयित्वोपवासेन मोक्ष्येऽहमपरेऽहनि । एनसो मोक्षका
मोऽस्मि यद्गोविंद त्रियोनिजं । तन्मे मुंचतु मां त्राहि पतितं शोकसागरे । आजन्ममरणं यावत् यन्मयाऽदुष्कृतं कृतं । तत्प्रणा
शय गोविंद प्रसीद पुरुषोत्तम । एतन्मंत्रं चतुर्थ्यां संवत्सरप्रदीपं धृतं । तथा एकेनैवोपवासेन कृतेन कुरुनंदन सप्तजन्म
कृतात् पापान्मुच्यते नात्र संशयः । गृहमुपक्रम्य तथा । तन्मध्ये प्रतिमा स्थाप्या कांचनादिविनिर्मिता । प्रतप्तकांचनाभासा दे
वकी सुतपस्विनी । सा चापि बालकं सुप्तं प्रसूता नीरदच्छविं । वसुदेवोऽपि तत्रैव खड्गचर्मधरः स्थितः । यशोदा चापि तत्रैव प्र

२८

तिथि०

सूतवरकन्यका । बलभद्रस्तथा नंदो दक्षो गर्गश्चतुर्मुखः । एवं प्रपूजयेद्भक्त्या गंधपुष्पाक्षतैः फलैः । तथा स्थंडिले स्थापये
द्देवीं षष्ठीं रोहिणीं तथा । देवकीं वसुदेवं च यशोदां नंदमेव च चंडिकां बलदेवेशं पूज्य पापैः प्रमुच्यते । अर्द्धरात्रे वसोर्धारां
पातयेद्गुडसर्पिषा । ततो वर्द्धापनं षष्ठी नामादेः करणं मम । कर्त्तव्यं तत्क्षणाद्रात्रौ प्रभाते नवमीदिने । यथा मम तथा कार्यो
भगवत्या महोत्सवः ब्राह्मणान्भोजयेद्भक्त्या तेभ्यो दद्याच्च दक्षिणां । सुवर्णं काञ्चनं गाश्च वासांसि कुसुमानि च । यद्यदिष्टतमं लो
के कृष्णो मे प्रीयतामिति । यं देवं देवकी देवी वसुदेवादजीजनत् । भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः । सुब्रह्म वासुदेवाय
गोब्राह्मणहिताय च । शांतिरस्तु शिवं चास्तु इत्युक्त्वा तान् विसर्जयेत् । एवं यः कुरुते देव्या देवक्याः सुमहोत्सवं । वर्षे वर्षे भग
वतो मद्भक्त्या धर्मनंदन । नरो वा यदि वा नारी यथोक्तं फलमाप्नुयात् । पुत्रसंतानमारोग्यं धनधान्यर्द्धि मद्गृहं । तथा संपर्केणा
पि यः कुर्यात्कश्चिज्जन्माष्टमीव्रतं विष्णुलोकमवाप्नोति सोपि नास्त्यत्र संशयः । जयंत्यामुपवासश्च महापातकनाशनः । सर्वैः कार्यो

३७

महाभक्त्या पूजनीयश्च केशवः । जन्मार्थे देवकीसूनो जयंतीसंज्ञकं व्रतं । विष्णुलोकमवाप्नोति । कर्तव्यं वित्तमानेन भक्त्या भक्तजनैरिह । अकुर्वन् निरयं याति यावदिन्द्राश्चतुर्दश । वद्यापनं नाडीच्छेदनं । तान् ब्राह्मणान्भक्तजनैरिति तैः सहेत्यर्थेः । अत एव विष्णुपुराणे । स वृत्तमन्त्रि कर्योहि स्नानादिमपि शस्यते । अत्र पूजोपवासयोः प्रधानत्वेनाकांक्षाविरहादन्वये ऽन्यतरस्य गुणत्वमवश्यं वाच्यं । एवं च पूजैवांगमुपवासस्य नियममित्युपक्रमे श्रवणात् तत्रैव विध्यन्वयात् । अंगस्यानु प्रधानविधिविधेयत्वेन पूजाया विध्यन्तराणपेक्षणात् अत एव उपसंहारेपि जयंत्यामित्यादिनोपवासमभिधाय पूजनीयश्चात्यमिहितं । नचैवं पूजने फलानुत्पत्तिः यस्य पर्णमयी जुहूर्भवति न स पापश्लोकं शृणोतीत्यादौ गुणोपि फलश्रवणात् । अत एव ब्रह्मवैवर्तः । नृणां विना व्रतेनापि भक्तानां वित्तवर्जिनां । कृतेनैवोपवासेन प्रीतो भवति माधवः । भक्त्या विनोपचारेण रात्रौ जागरणेन च । फलं यच्छति दैत्यारिर्जयंतीव्रतसंभवं । वित्तशाठ्यमकुर्वाणः सम्यक् फलमवाप्नुयात् । कुर्वाणो

७ सुवर्णो ऽशीतिरत्तिकापरिमितं हेम कांचनं ततो न्यूनं कांचनमित्यत्र मेदिनीमिति क्वचित् पाठः । भौमस्य पृथिवीसंबंधिनः कृष्णोसे प्रीयतामित्यु

तिथि०

२९

विनाशात्स्वर्गं लभते सदृशं फलं । विनाव्रतेन पूजाद्यंगं विना । एवं च करणे फलश्रुते रकरणे च प्रायश्चित्तश्रवणे वहुलेप्सेद्
त्यादिना द्वैधश्रुतेश्चास्य नित्यत्वे काम्यत्वे च । ननु काम्यत्वमनित्यत्वे अस्ति कामे परित्यक्तुं शक्यत्वात् । तथा सत्येकस्य कर्मणो
नित्यत्वकाम्यत्वाभ्यां द्वैरूप्यांगीकारे नित्यानित्यसंयोगविरोधः नैवं संयोगपृथक्त्वन्यायात् । स च न्यायो यथा खादिरे पशुंब
ध्नातीति खादिरं वीर्यकामस्य यूपं कुर्वीतेति श्रूयते । किं काम्यस्यैव खादिरता नित्येपि स्यादुतनेति अत्र फलार्थत्वेन नित्यत
या नित्यप्रयोगांगतानयुक्ता । यत्तु नित्येपि खादिरत्वश्रवणं तत्काम्यस्यैव पशुबंधनाय यूपाश्रयज्ञानार्थे तेन न नित्ये खा
दिरतेति प्राप्ते राद्धांताय चतुर्थाध्याय सूत्रं । एकस्य तूभयत्वे संयोगपृथक्त्वमिति । अत्र संयोगः संबंधमात्रं । एकस्य खा
दिरस्य क्रत्वर्थपुरुषार्थरूपोभयात्मकत्वे वाक्यद्वयेन च क्रतुशेषत्व फलशेषत्वलक्षणसंयोगभेदावगमान्न नित्यानित्यसं
योगविरोधः न चाश्रयज्ञानार्थे नित्यवाक्यं सन्निधानादेवाश्रयलाभात् अतउभयार्थो खादिरतेति । एवं दध्ना जुहोति दध्नेंद्रियका

मस्येत्यादावुभयार्थं तैव दधित्वस्येव द्वैधाश्रवणात्। गरुडपुराणामविष्योत्तरा ववनानि यथा तमेवोपवसेत् कालं रात्रौ
कुर्यात् जागरं। एकाग्रेणैव भावेन विष्णोर्नामानुकीर्तनं। अनंतं वामनं शौरिं वैकुंठं पुरुषोत्तमं वासुदेवं हृषीकेशं मा
धवं मधुसूदनं। वराहं पुंडरीकाक्षं नृसिंहं दैत्यसूदनं दामोदरं पद्मनाभं केशवं गरुडध्वजं। गोविंदमच्युतं कृष्णमनंत
मपराजितं। अधोक्षजं जगद्बीजं स्वर्गस्थित्यंतकारिणं। अनादिनिधनं विष्णुं त्रिलोकेशं त्रिविक्रमं। नारायणं चतुर्बाहुं
शंखचक्रगदाधरं पीतांबरधरं नित्यं वनमालाविभूषितं श्रीवत्सांकं जगत्सेतुं श्रीकृष्णं श्रीधरं हरिं प्रपद्येहं सदा
देवं सर्वकामार्थसिद्धये। एवं पठित्वा वरदं कृष्णं वंदेत भक्तितः प्रणमामि सदा देवं वासुदेवं जगत्पतिं। नामान्येतानि
संकीर्त्य गत्यर्थं प्रार्थयेत् पुनः। त्राहि मां सर्वलोकेश हरे संसारसागरात् त्राहि मां सर्वपापघ्न दुःखशोकार्णवात्प्रभो स
र्वलोकेश्वर त्राहि पतितं मां भवार्णवे। देवकीनंदन श्रीश हरे संसारसागरात् त्राहि मां सर्वदुःखघ्न रोगशोकार्णवाद्धरे दुर्ग

तिथि०)

तां स्थापयेद् द्विजो यस्मरंति स कृत्स्नकृत् सोऽहं देवाति दुर्वृत्तस्त्राहि मां शोकसागरात् पुष्कराक्ष निमग्नोऽहं मायाविज्ञान
सागरे त्राहि मां देवदेवेश त्वत्तो नान्योस्ति रक्षिता। तत्रश्चोपवास पूर्वदिने संयमं विधाय तद्दिने प्रातः स्नात्वा ॐ सूर्य
ः सोमो यमः कालः संध्ये भूतान्यहः क्षपा पवनो दिक्पति भूमिराकाशं खचरामराः ब्राह्मं शासनमास्थाय कल्पध्वमिह
सन्निधिमिति पठित्वा ॐ तद्विष्णोः परमं पदं सदा पश्यंति सूरयः दिवीव चक्षुराततमिति मंत्रेण नारायणं संस्मृत्य ॐ
तत्सदित्युच्चार्य्य उदङ्मुखो दर्भपुष्प तिलजलपूर्णं पात्रं गृहीत्वा श्रीकृष्णजन्माष्टमीव्रतं ॐ मद्येत्यादिना संकल्पयेत्
यद्युपवासदिने प्रातः सप्तमी तदा सप्तम्यां तिथावारभ्येति वक्तव्यं। ॐ धर्माय धर्मेश्वराय धर्मपतये धर्मसंभवाय गो
विंदाय नमो नम इत्युच्चार्य्य प्राग्युक्तवासुदेवं समुद्दिश्येति मंत्रं चानुष्टुभं पठेत् अर्द्धरात्रे प्रणवादि नमोन्तैस्तत्तन्नामभिर्वासु
देव देवकी वसुदेव नंद यशोदा रोहिणी चंडिका बलदेवान् पूजयेत् दक्षगर्गे चानुमेखानपि। तथा संवत्सर प्रदीपे भविष्ये

५।

तारीयं बलभद्रस्तथानंदो दक्षो गर्गोश्चानुगैरवः पूजनीयस्तथा मत्स्या गंधपुष्पास्तैः फलैः ततश्च मांचापि वालकं सुपूर्णं पर्य्ये
केस्तनपायिनं श्रीवत्सवक्षः पूर्णांगं नीलोत्पलदलछविं इति भविष्यान्तरीयं ध्यात्वा गरुडपुराणोक्ते विशेषतरत्र प्र
णवादि नमोंऽतेन श्रीकृष्णनाम्ना पूजनं अर्घ्येतु ॐ यज्ञाय यज्ञेश्वराय यज्ञपतये यज्ञसंभवाय गोविंदाय नमो नमः ॐ योगा
य योगेश्वराय योगपतये योगसंभवाय गोविंदाय नमोनम इति स्नाने। एवं नैवेद्ये ॐ विश्वेत्यादि घृततिलाभ्यां होमे ॐ धर्म्मा
येत्यादि स्वाहांतेन शयने ॐ विश्वायेत्यादि। ततो देवक्यादि पूजा कार्य्या। पादावमुंचयंती श्रीर्देवक्याश्चरणांतिके निषण्णा
पंकजे पूज्या नमो देव्यै श्रिया इति। इति संवत्सरप्रदीपधृतवचनात् श्रीरपि पूज्या। ततो गुड़घृते वसुधारां नाडीछेदं
षष्ठीपूजनं नामकरणादिकं कुर्य्यात्। पूजयेयुर्द्विजाः सर्वे स्त्रीशूद्राणाममंत्रकं चंद्रोदये शशांकाय दद्यादर्घ्यं हरिं स्मरन्
तद्विधिश्च शंखे तोयं समादाय सपुष्पकुशचंदनं जानुभ्यां धरणीं गत्वा चंद्रायार्घ्यं निवेदयेत् ॐ क्षीरोदार्णवसंभूतअ

त्रिनेत्रसमुद्भव गृहाणार्घ्यं शशांकेदं रोहिण्या सहितो मम ॐ सोमाय सोमेश्वराय सोमपतये सोमसंभवाय गोविंदा
यनमो नमः इत्यर्घ्यं मंत्रैः प्रणाममंत्रैश्च । ॐ ज्योत्स्नायाः पतये तुभ्यं ज्योतिषां पतये नमः नमस्ते रोहिणीकांत सुधावास
नमोऽस्तु ते नमो मंडलदीपाय शिरोरत्नाय धूर्जटेः कलाभिर्वर्द्धमानाय नमश्चंद्राय चारवे । ततश्चानर्घ्यं वामनं मित्यादि
ना प्रणमामि सदा देवं वासुदेवं जगत्पतिमित्यं तेन नामकीर्तनेन प्रणामो त्राहि मामित्यादिनान्योऽस्ति रक्षिते त्यं तेन यद्बा
ल्ये यद्कौमारे यौवने यद्वार्द्धके ततः पुण्यं वृद्धिमाप्नोतु पापं हर हलायुध इति विष्णुरहस्यीयेन च प्रार्थनं कुर्यात्
ततः स्तोत्रैः स्तुतिं कृत्वा वासुदेवं जनार्द्दनं । गीतवादित्रनिर्घोषैश्च शेषं कालं यथासुखं । नयेदिति शेषः । परदिने प्रातः भगवंतं
यथाविधि संपूज्य दुर्गायामहोत्सवः कार्यः । ततो ब्राह्मणान्भोजयेत् तेभ्यो दक्षिणांच सुवर्णादि यत् किंचिद् धृतमं वा
कृष्णो मे प्रीयतामित्युच्चारयेत् । ततश्च यं देवमित्यादि शांतिरस्तु शिवं चास्त्वित्यं तं पठित्वा ब्राह्मणान् विसर्जयेत् । ततः पार

४२

रणं कुर्य्यात्। तत्रमंत्रः ॐ सर्वाय सर्वेश्वराय सर्वेपतये सर्वसंभवाय गोविंदाय नमो नमः। पारणानंतरं समापनमंत्रं भू
तायेत्यादिकं पठेत्॥ अथव्रतकालव्यवस्था। अत्रार्द्धरात्रे रोहिणी कृष्णाष्टम्यो लाभे जन्माष्टमीव्रताय स एव कालः तस्य
मुख्यत्वेनाभिधानात्। तथाच वशिष्ठः अष्टमी रोहिणी युक्ता निश्यर्द्धे दृश्यते यदि। मुख्यकालः स विज्ञेयस्तत्र जातो हरिः
स्वयं। भविष्यपुराणे विष्णुधर्म्मोत्तरयोः। अर्द्धरात्रेतु रोहिण्यां यदा कृष्णाष्टमी भवेत् तस्यामभ्यर्च्चनं शौरेर्हंति पापं त्रि
जन्मजं। सोपवासो हरेः पूजां कृत्वा तत्र न सीदति। अयमेव जयंत्याख्ययोगः तथाच वराहसंहितायां सिंहार्के रोहिणीयु
क्ता नराः कृष्णाष्टमी यदि। रात्र्यर्द्धे पूर्वापरगा जयंती कलयापि च। विष्णुधर्म्मोत्तराग्निपुराणयोः रोहिणीसहिता कृष्णा
मासि भाद्रपदेऽष्टमी। सप्तम्यामर्द्धरात्राधः कलयापि यदा भवेत् तत्र जातो जगन्नाथः कौस्तुभी हरिरीश्वरः तमेवोपवसेत्
कालं कुर्य्यात्तत्रापि जागरं इत्थंच अविद्धायां तु सर्क्षायां जातो देवकिनंदन इति सप्तम्यावेधे जन्मश्रवणं कल्पभेदादविरुद्धं स
यो

४२

तिथि०)

कृष्णा मर्द्धरात्राध उपरात्रार्द्ध रात्रादर्ध्वश्चार्द्धमिति भविष्यवायुपुराणयोः पाठः। स्कांदे। जयं पुण्यंच कुरुते जयंतीमिति तां
विदुः। रोहिणीसहिता कृष्णा मासे च श्रावणेऽष्टमी। अर्द्धरात्रादधश्चोर्द्ध कलयापि यदा भवेत् जयंती नाम सा प्रोक्ता सर्व
पापप्रणाशिनी। अन्यत्रापि अर्द्धरात्रादधश्चोर्द्धमेकार्द्धघटिकान्विता रोहिणी चाष्टमी ग्राह्या उपवासव्रतादिषु। एक
घटिकान्विताऽर्द्धघटिकान्विता वेत्यर्थः एतेन यदा सूर्योदये स्वल्पाष्टमी रोहिणी युता अनंतरं पूर्णा नवमी सोमवारेण
+ वा युता तदा सर्वोपवादिका सैवोपोष्यति। तदाह ब्रह्मवैवर्त्तेः उदये चाष्टमी किंचिन्नवमी सकला यदि। भवेत्तु बुधसंयुक्ता
प्राजापत्यर्क्षसंयुता। अपि वर्षशतेनापि लभ्यते वा न वा विभो पद्मपुराणेऽपि प्रेतयोनिगतानां तु प्रेतत्वं नाशितं च तैः। यैः
कृता श्रावणे मासि अष्टमी रोहिणी युता किं पुनर्बुधवारेण सोमेनापि विशेषतः किं पुनर्नवमीयुक्ता कुलकुट्यास्तु मुक्तिरे
ति निरस्तं। गुणफलात्तु रोधेन मुख्यजयंत्याख्य कालबाधायोगात्। स्कांदे। नकरोति यदा विष्णो जयंती संभवं व्रतं यमस्यव

५३

शमाप्नोति सहते नारकीं व्यथां। भविष्ये तु श्रूयते देवकीसूनो जयंती संज्ञकं व्रतं कर्तव्यं चिंतमानेन भक्त्या भक्तजनैरिह।
अकुर्वन्नरकं याति यावदिंद्राश्चतुर्दश। इति जयंती लंघने प्रत्यवायश्रुतेश्च सद्भावोपि बुधवार योगो गुणफलायैवोक्तं
हेमाद्रिरपि। यदा तु दिवसएव रोहिण्यष्टमीयोग स्यात् तत्रैव व्रतमिति तत्रैव बुधवारादि योगे फलातिशयः। अन्येत्वेव
माहुः। यदा तु पूर्वेद्युरर्द्धरात्रे रोहिणीयुताष्टमी नोत्तरा तथाविधा स्याचेत् बुधे सोमे वा भवति तदा उत्तरा पोष्या न पूर्वोद
दये चाष्टमी किंचिन्नवमी सकलेति वचनात् तन्न उक्तयुक्तेः। यद्यप्यर्द्धरात्रे तु रोहिण्यामित्यादिवाक्यं बुधसोमव्यतिरि
क्त वारयुताष्टमी विषयत्वेन सावकाशं। बुधसोमवाक्यं च द्वितीयदिवस एव रोहिणी योग सावकाशं तथापि बुधसोमवा
क्यस्य संकोचे कर्मकालव्यापितिथि संभवादर्द्धरात्रस्य संकोचे तद्बाधप्रसंगात् बुधसोमवाक्यस्यैव संकोचो नार्द्धरात्रवा
क्यस्येति नाहमाधवाचार्याप्येवं। किंत्वयं योगो च यदि बुधवारे प्रातः किंचिदष्टम्यनंतरं तद्दिने नवमी स्यात् उभयतिथ्योरे

४२

तिथि०

व रोहिणी स्यात्तु दैवमवति । कृष्णवैवर्ते उदये चाष्टमी किंचिन्नवमी सकला यदीत्यत्र सकलेति विशेषस्याभिधानात् । अत
एव अपि वर्षशतेनापीत्युपपद्यते । अस्य ग्राह्यतानुजयंत्यलाभ एव प्रागुक्तयुक्तेः । ननु बुधसोमवारवत् अष्टम्यां रो
हिणी गुणफलमस्तु । नैवं तिथिद्वैधे रोहिण्या नियामकत्वेनाभिधानात् । तथाहि स्मृतिः प्राजापत्यर्क्षसंयुक्ता कृष्णान
भसि चाष्टमी मुहूर्तमपि लभ्येत सैवोपोष्या महाफला । वशिष्ठः । वासरे वा निशायां वा यत्र युक्ता तु रोहिणी । विशेषे
ण नभो मासि सैवोपोष्या सदा तिथिः । अनयोरेवकारश्रुतेः । एकादशी शाता ज्ञातजन्मधिकं रोहिणीव्रतं ततो हि दु
र्लभं मत्वा तस्यां यत्नैस्समाचरेदिति ब्रह्मांडपुराणे रोहिणीव्रतमिति श्रवणाच्च । बुधादिवारकं तु न नियामकं प्रमा
णाभावात् प्रत्युत फलश्रुते गुणफलबोधकमिति । एवं च तिथिविशेषनियंतृकापवादविधावेवकारश्रुतेः षष्टि
दंडमप्यष्टमीं रोहिणीरहितां परित्यज्य रोहिणीसहिता स्वल्पाष्टमी उपोष्या । यदा तु परदिनेऽपि रोहिणीरहिता त

४४

दा पूर्वोपोष्या वर्धिरं उत्तमिकायाश्च तिथेर्निषु क्रमशो परे। अकर्मैरांच तिथिमत्वं विद्यादेकादशीं विना इत्यनेनाया
दितसामान्य विषयत्वात् वक्ष्यमाणवचनजातात्तु। यदा तु भयदिने जयंती योगस्तथापरेद्युरुपवासः संकल्पकाल
मारभ्य तिथिव्याप्तिसंभवात् अत एव बौधायनः यो यस्य विहितः कालः कर्मणस्तस्तु उपक्रमे। तिथियोमि मत्तासा तु
कार्यो नोपक्रमो ज्ञितता संकल्पकालस्तु प्रातरेव। प्रातः संकल्पयेद्विद्वा निति वराहपुराणात् उभये तूपवासस्य
नक्तस्यास्तमये तिथिः मध्याह्न व्यापिनी ग्राह्या एकभक्त सदा तिथि रिति बौधायनेनैवोपवासे उदयगामि तिथेर्विधा
नाच्च। नक्षत्रस्यास्त निशीथ संबंधेन बलवत्वाच्च तिथेस्त्रिसंध्य व्यापित्वाच्च तथाच भविष्यपुराणे विष्णुधर्मोत्तरयोः
उपोषितव्यं नक्षत्रं येनास्तं याति भास्करः यत्र वा युज्यते राम निशीथे शशिना सह। निशीथे अर्द्धरात्रे त्रिसंध्य व्यापिनी
यातु सैव पूज्या सदा तिथिः। न तत्र युग्मादरणमन्यत्र हरिवासरात्। किं पुनर्नवमी युक्तेति लिखिष्यमाणवचनाच्च एत

तिथि०)

द्विधय एव ब्रह्मवैवर्त्ते: वर्जनीया प्रयत्नेन सप्तमीसहिताष्टमी सासर्क्षापि न कर्त्तव्या सप्तमीसहिताष्टमी अविद्धायां तु
सर्क्षायां जातो देवकीनंदनः। यत्तु विष्णुधर्मे जयंती शिवरात्रिश्च कार्य्ये भद्रजयान्विते। कृत्वोपवासं तिथ्यंते तदा कुर्य्याच्च पा
रणं। गरुडपुराणे विष्णुधर्मोत्तरयोः। जयंत्यां पूर्वविद्धायामुपवासं समाचरेत्। तिथ्यंते वोत्सवांते वा व्रती कुर्वीत पार
णं। तत् पूर्वदिनमात्रे जयंतीलाभे विद्धाप्रतिप्रसवाय बोध्यं। यदा तु जयंतीयोगं विना उभयदिने रोहिणीयुताष्टमी लभ्य
ते तदापि परेद्युरुपवासः। तथा च कालमाधवीये ब्रह्मवैवर्त्तस्कंदपुराणयोः। सप्तमीसहिताष्टम्यां भूत्वा ऋक्षं द्विजोत्तम
प्राजापत्यं द्वितीयेह्नि मुहूर्त्तार्द्धं भवेद्यदि तदष्टयामिकं ज्ञेयं प्रोक्तं व्यासादिभिः पुरा। मुहूर्त्तेनापि संयुक्ता मासं पूर्णाष्टमी
स्मृता। किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदा। मुहूर्त्तार्द्धमप्यष्टयामिकं तत्कार्य्यकारित्वात्। पद्मपुराणे पूर्वविद्धाष्ट
मीयां तु उदये नवमीदिने। मुहूर्त्तेनापि संयुक्ता मासं पूर्णाष्टमी भवेत्। कलाकाष्ठा मुहूर्त्तोपि यदा कृष्णाष्टमीतिथिः नवम्यां

45

सैव ग्राह्या स्यात् सप्तमीसंयुतानहि। संयुक्ता रोहिण्येति शेषः। रोहिणीरहितायां तु तथाविधायां पूर्वेदिन एवोपवा-
सस्य वक्ष्यमाणत्वात्। यत्तु सप्तमीरात्रिशेषे रोहिणीसहिताष्टमी परदिने च रोहिणी नास्तव्यापिनी तदा पूर्वेद्युरुपवा-
सो बलवन्नक्षत्रसंबंधादित्युक्तं। तन्निर्मूलं बलवन्नक्षत्रसंबंधस्य सामान्यस्य प्राप्तौ तु ब्रह्मवैवर्त्तस्कंदपुराणपद्मपुराणोक्त-
विशेषवचनैरप्रयोजकीकृतत्वात् एवं च व्रतोपवासनियमे घटिकैकापि यदा भवेत् सा तिथिः सकला ज्ञेया पित्र्यर्थे चाप-
राह्णिकीति देवलवचनस्यात्र न विषयः कलाकाष्ठादिविशेषवचनात् न च सप्तमीसहिताष्टम्यामित्युपक्रमात् सप्त-
मीसंयुतानहीत्युपादानाच्च ब्रह्मवैवर्त्तवचनस्य विषयत्वे पूर्णोखंडयोगेयंती विना रोहिणीयोगे परदिने कथमुपवा-
स इति वाच्यं किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदेत्यनेन नवमीयोगस्य तत्रापि हेतुत्वेन कीर्तनात्तस्यापि तत्र संबं-
धात् तिथिद्वैधे उपवासनियामकस्य नक्षत्रस्योभयदिनलाभे प्राग्युक्तेनोपोषितव्यमित्यादिभविष्यपुराणविष्णुधर्मो-

४५

तिथि०

तरीयेन परदिने नियमितत्वात्तु। तिथिविवेकोप्येवं। एवं च नक्षत्रान्तं वेधेऽष्टम्यां पूर्णायां नास्ति विप्रतिपत्तिः त्रिसंध्यव्या
पित्वात् खंडायां तु निशीथसंवेधिन्यामुपवासः। तथा च माधवाचार्य्यधृतं पुराणवचनं। दिवा वा यदि वा रात्रौ नास्ति चेद्रो
हिणी कला। रात्रियुक्तां प्रकुर्वीत विशेषेणेन्दुसंयुतां। नारदीयसंहितायामपि उपोष्य जन्मचिह्नानि कुर्य्याज्जागरणं तु यः।
अर्द्धरात्रयुताष्टम्यां सोऽश्वमेधफलं लभेत्। अत्रार्द्धरात्रश्रुतेरिन्दुसंयुक्तामित्यत्रापि तथा। एवं च पूर्वेद्युरष्टम्यां निशीथ
योगे तत्रैवोपवासः। कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रिचतुर्दशी। एताः पूर्वयुताः ग्राह्यास्तिथ्यन्ते पारणं भवेदिति वशिष्ठ
ब्रह्मवैवर्त्तपैठीनसयुक्तस्याप्ययं विषयः। कृष्णाष्टमी कृष्णजन्माष्टमी स्कन्दषष्ठ्यादिसाहचर्य्यात् तिथ्यन्ते पारणाविधाना
च्च अत्रैव विषये तिथिरस्तगामिनीत्येव विष्णुरहस्ये। अलाभे रोहिणी तस्य कार्य्याष्टम्यस्तगामिनी तत्रोपवासं कृत्वैव तिथ्यन्ते
पारणं भवेत्। एतादृशवचनं न विद्येपि किन्तु तत्रोपवासः कर्त्तव्य इति तृतीयचरणे पाठः। न चैतद्वचनयोः पूर्वेद्युरेव निशी

थव्याप्तौ परेद्युरेवास्तगामित्वमात्रेपि विषय इति वाच्यं। विशेषे रोंदुसंयुताभित्यस्यार्द्धरात्रयुताष्टम्याभित्यस्यैव वा
ध्यापत्तेः तिथ्यंते पारणं भवेदित्यनुवादापत्तेश्च त्रिसंध्यव्यापिनीत्यस्य कर्म्मोपक्रमतिथिसामान्यविषयकस्य विशेषेरो-
दुसंयुताभित्यनेनार्द्धरात्रयुताष्टम्याभित्यनेन च जन्माष्टमीमात्रविषयकत्वेन बाधितत्वात् एवंच परदिनमात्रे उभयदि-
नेवा निशीथसंबंधे उभयदिने वा तदसंबंधे परेद्युरेवोपवासः संकल्पकालानुरोधात् तिथेस्त्रिसंध्यव्यापित्वाच्च विना
कृष्णं तु कर्तव्या नवमीसंयुताष्टमीत्यादित्यपुराणाच्च माधवाचार्य्यप्रभृतयोप्येवं पारणाकालश्च भविष्यविष्णुरह-
स्यब्रह्मवैवर्तेषु। अष्टम्यामथ रोहिण्यां न कुर्यात् पारणं क्वचित् हन्यात् पुराकृतं कर्म्म उपवासार्जितं फलं। तिथिर-
ष्टगुणं हंति नक्षत्रं च चतुर्गुणं। तस्मात्प्रयत्नतः कुर्यात् तिथिभांते च पारणं। अत्रोभयवियोगे पारणामुक्तं। यदा सार्द्ध-
प्रहरनिशाभ्यंतरे एकस्यैव वियोगस्तदैकतरवियोगेतु पारणं। तथा च नारदीये तिथिनक्षत्रसंयोगे उपवासो यदा भवेत्

पारणं तु न कर्त्तव्यं यावन्नैकस्य संक्षयः। सांयोगिके व्रते प्राप्ते यद्येकोपि वियुज्यते। तदैव पारणं कुर्य्यादेवं वेदविदो
विदुः। यदैकस्यापि न सार्द्धप्रहरं निशाभ्यंतरे वियोगस्तदा तयोर्वियोगेपि प्रातरुत्सवांते पारणं। तिथ्यंते वोत्सवांते
वा प्रति कुर्वीत पारणमित्युक्तत्वात् निर्णयामृते तु व्रती कुर्वीतेति पाठः। न च भोजनस्य रागप्राप्तत्वेन विधित्वासंभवात्
तिथिनक्षत्रयोर्वियोगं विना न पारणं कुर्य्यादित्यपवार्थे इति वाच्यं उपवासेषु सर्वेषु पूर्वाह्ने पारणं भवेत्। अन्यथा तु फ
लस्यार्द्धं धर्ममेवोपसर्पतीति केवलवचने पारणानियमात्। किंच यदि पारणाभंगं नस्यात्तदा प्रतिनिधिविधानं नोपप
द्यते। तथा च कात्यायनः। संध्यादिकं भवेन्नित्यं पारणं तु निमित्ततः। अद्भिस्तु पारयित्वा तु नैत्यिकांते भुजिक्रियेति। अत
एव हेमाद्रिप्रभृतिभिर्धृतं वचनं। तिथ्यृक्षयोर्यदा भेदो नक्षत्रस्यांतमेव वा। अर्द्धरात्रेऽथवा कुर्य्यात् पारणं तु परेऽहनि।
यदा रात्रेः सार्द्धप्रहरमिति क्रम्य तिथिनक्षत्रयोर्विच्छेदः। अथवा केवलस्य नक्षत्रस्यांतस्तदा परेऽहनि उपवासपरदि

47

ने पारणं कुर्यात् नक्षत्रस्येत्येकतरोपलक्षणं हेमाद्रिस्तु यदा परदिने अर्द्धरात्रादुपरि भान्तस्तिथ्यन्तो वा भवति तदा
ऽर्द्धे पारणं कुर्यादित्याह तन्न वर्जयित्वा महानिशामिति वक्ष्यमाणवचनविरोधात् अर्द्धरात्रादुपरि भान्ते तिथ्यन्ते वा पा
रणं भवतीत्यर्थे प्रमाणं नास्ति किंच अर्द्धरात्र एव तद्विधिकरणं सन्निधानात् उकारेणार्द्धरात्रं व्यवच्छिद्य उपवासदिना
परदिने पारणं विधीयते जीमूतवाहनस्तु न हि तिथिभान्ते च पारणमिति पारणाकर्तव्यतापरं येन तदन्त एव विधिः
किंतु नक्षत्रे तिथौ च वर्तमाने न कुर्यादिति तात्पर्यं तत्रैव दोषश्रुतेः रागप्राप्तभोजनानुवादेन तिथिनक्षत्रेतरकाले पा
रणं कुर्यादिति विधिः। स च रात्रिशेषे भोजनेऽप्यविरुद्धः। तृतीय एवाह्नि पारणं भविष्यतीति यद्गोपरेऽह्नीतिवत्
नियमाभावादित्याह। तन्न पारणाविधेर्नियमरूपतयोक्तत्वात् रात्रिशेषे भोजनस्याविहितत्वात्। तथा च ब्रह्मवैवर्त्ते त्रि
यामां रजनीं प्राहुस्त्यक्त्वाद्यन्तचतुष्टयं। नाडीनां तदुभे संध्ये दिवसाद्यन्तसंज्ञिते। इति वचनात्। महानिशापरकालस्मा

४७

तिथि०)

डीचतुष्टयस्य परदिनादित्वेन । तदानीं पूर्वदिवसीयभोजनानुपपत्तेः तद्दिनकृत्यलोपापत्तेश्च । अत एव भुक्ते शशिनि
भुंजीत यदि न स्यान्महानिशेत्युक्तं कात्यायनेनापि मुनिभिर्द्विरशनं प्रोक्तं विप्राणां मर्त्यवासिनां नित्यं । अहनि च तथा तमस्विन्यां
सार्द्धप्रहरयामांतरितेन रात्रौ सार्द्धप्रथमप्रहराभ्यंतर एव भोजनं न तु ततः परत इत्याह । अहःस्यावत् परे हनि पारणो
दत वचनोच्च । केचित्तु अपरेऽहनि उपवासतृतीयदिने पारणं कुर्य्यात् । तथा च यथा सर्वेषामुपवासानां पूर्वाह्ने पारणं
भवेदिति यम वचनात् । पारणे औत्सर्गिकपूर्वाह्नपरित्यागेपि न व्रतवैगुण्यं तथात्राप्यौत्सर्गिकद्वितीयदिनपरित्या
गेपि न तथात्वमिति । यत्तु पुनरुभयसत्वेऽहरात्रावेव तत्रैव दिवसे पारणं विधाय कं तिथ्यृक्षयोरिति वचनं तदसत् ।
अपरे त्वनीत्यत्रापरस्य वैयर्थ्यापत्तेः । यथाश्रुतार्थपरतायै वोपपन्नस्य वचनस्य तिथिनक्षत्रसत्वे पारणानिषेधकानां ।
वचनानां बाधने सामर्थ्याभावादित्याहुः । तन्न औत्सर्गिकद्वितीयदिनपरित्यागे वचनमेव नास्ति तिथ्यृक्षयोरिति वचनं चे

४८

दस्य न दर्शने प्रमाणं नास्ति । न चापर इत्यस्य वैयर्थ्यापत्तेस्तथात्वमिति वाच्यं तथात्वे निःसंदेहार्थे न परेऽहनीति ब्रूयात् न च
सातत्येन तु पारणात्परेऽहनीत्यनेनांगित्वेनोपस्थितोपवासस्य परदिन इत्येव प्रतीयते न तु द्वितीयदिवसस्य परदिने
अत एव अद्य कृष्णाष्टमी देवीं नभश्चंद्रसरोहिणीं अर्द्धरात्रिव्रतोपवासेनेमोक्ष्ये हमपरेऽहनीति मंत्रलिंगमपि संगच्छते किं
चात्रैव वचने नक्षत्रस्यांत इत्यत्र भोजनार्हे काले एकतरवियोगे/ न्यस्याद्र्ध रात्रवियोगे परेऽहनीत्यस्य सांयोगिक इ
त्यादिवचनैकवाक्यतया उपवासद्वितीयदिवसपरत्वस्यावश्यवक्तव्यत्वाद् अर्द्धरात्र उभयवियोगेपि तथैव युक्तत्वात्
अन्यथा सांयोगिक इत्यस्य निर्विषयत्वापत्तेः । एवं च सायमारंभतयोरन्तः सायं प्रातश्च मध्यमे उपवासफलं प्राप्नोतीत्ये
भक्तचतुष्टयमिति महाभारतीयोत्सर्गिकद्वितीयदिनपारणस्याप्यबाधः । एतद्विषय एवोत्सवांते पारणमाहतिथ्यं
त इत्यादि न चात्र तिथ्यंते तारकांते वेति पाठ इति वाच्यं पूर्वपाठस्य हेमाद्रिनिर्णयामृतमाधवाचार्यधृतत्वादाख्या

४८

तिथि० ३

नत्वात्र। एतद्विषये ब्रह्मवैवर्त्ते:। सर्वेष्वेवोपवासेषु दिवा पारणमिष्यते। अन्यथा फलहानिः स्यादृते धारणपारणं। धा
रणं नियमग्रहणं। ततोऽत्र गृहीतनियमनक्तव्रतस्य रात्रि पारणानिषेधः। गरुडपुराणे। अन्यतिथ्यागमो रात्रौ तामसस्तो
जसोऽदिवा। तामसे पारणं कुर्वन् तामसीं गतिमाप्नुयात्। नच यदि प्रथमनिशायामेकवियोगस्तदापि ब्रह्मवैवर्त्तवचनाद्दिवापा
रणं। अनंतभट्ट माधवाचार्योक्तं युक्तमिति वाच्यं नरात्रौ पारणं कुर्याद्दृते वै रोहिणीव्रतात्। निशायां पारणं कुर्याद्वर्जयि
त्वा महानिशामिति संवत्सरप्रदीपधृतस्य नरात्रौ पारणं कुर्याद्वर्जयित्वा महानिशामिति ब्रह्मांडोक्तस्य च निर्विषयाप
त्तेः। स्त्रीणां यवान्नादिभोजनमाह ब्रह्मपुराणे। ततः प्रविश्य च गृहं यवान्नं भुंजीत च ताः। युक्तमिक्षुविकारैश्च मध्वाज्यमरि
चैः सह॥*॥ तदयं संक्षेपः। एकदिने जयंतीलाभे तत्रोपवासः उभयदिने चेत्तदा परदिने। जयंत्यलाभेपि रोहिणीयुताष्ट
म्यां परदिने रोहिण्यलाभे तु निशीथसंबंधे तदसंबंधे वा परदिन इति उपवासपरदिने तिथिनक्षत्रयोरवसाने पारणं। य

५१

दात्तु महानिशायाः पूर्वमेकतरस्यावसानं अन्यतरस्य महानिशायां तदनंतरं वा तदेकावसाने पारणं। यदा महानिशा
यामुभयस्थितिस्तदोत्सवांते पारणं प्रातरिति ॥*॥ इति श्रीकृष्णजन्माष्टमीतत्वं ॥*॥ अथ दूर्वाष्टमी ॥ सा च शुक्ला
पि पूर्वविद्धा ग्राह्या। श्रावणी दौर्गनवमी दूर्वा चैव हुताशनी। पूर्वविद्धैव कर्त्तव्या शिवरात्रिर्वलेर्दिनं इति बृहस्पतिव
चनात्। हुताशनी रंभा तृतीया। भविष्योत्तरे। पक्षे भाद्रपदस्यैव शुक्लाष्टम्यां युधिष्ठिर। दूर्वाष्टमीव्रतं पुण्यं यः करोति
ह मानवः। न तस्य क्षयमाप्नोति शंतानं साप्तपौरुषं। नंदते वर्द्धते नित्यं यथा दूर्वा तथा कुलं। भीमपराक्रमे कार्त्तिकशुक्ल
पक्षमधिकृत्य गोष्ठाष्टम्यां गवां पूजां गोग्रासं गोप्रदक्षिणं। गवामनुगमं कुर्यात् सर्वपापविमुक्तये। आग्रहायण्या
दुर्द्धं तिसृषु कृष्णाष्टमीषु श्राद्धानि स्यानि। यथा गोभिलः अष्टकायोर्द्ध्व माग्रहायण्यास्तामिश्राष्टमी। वायुपुराणे पित्र्या
दानामपूलेस्युरष्टका [illegible]रवच। कृष्णपक्षेषु विष्टाहि पूर्वोचैंद्री विभाव्यते। प्राजापत्या द्वितीया स्यात्तृतीया वैश्वदेव

४८

की। आद्यापूपैः सदा कार्य्या मांसैरन्याभवेत्तथा। शाकैः कार्य्या तृतीया स्यादेष द्रव्यगतो विधिः। मूले प्रधानस्थाने अमावस्या
यां अमावस्यातिश्राद्धस्य मुख्यकालः तद्वदिति यावत्। ऐंद्री साग्नेरिंद्रदेवताकयागसंबंधात्। एवं प्राजापत्या वैश्वदेव
की च मांसैः पशोः। तथा च गोभिलः। यद्युवाल्पतरसंभारः स्यादपि पशुनैव कुर्य्यादिति। यद्युवेति निपातसमुदायो यद्य
र्थे पशुरपि छाग एव। छागोऽनादेशे पशुरिति गोभिलमतात्। न चैतैव्यात्तुदुं अष्टम्यां गौरिति गोभिलसूत्रेण गवोपदेशात्
कथमनुपदिष्टमिति वाच्यं। तदसंभवे पशुनेत्यनेन यः पशुरुपदिष्टस्तस्य विशेषतोऽनुपदिष्टत्वात्। वस्तुतस्तु हरिवं
शेन मृगोपि विहितः। यथा इक्ष्वाकुस्तु विकुक्षिं वै अष्टकायामथादिशत्। मांसमानय श्राद्धाय मृगं हत्वा महाबल।
स्त्रियावधाभावमात्रस एव। अवध्यां च स्त्रियं प्राहुस्तिर्य्यग्योनिगतेष्वपि। एतदर्थं ब्रह्मपुराणेपि। आरण्यानामग
स्य प्रोक्षितानां वक्ष्यते। पश्वभावे स्थालीपाकेन यथा गोभिलः। अपि वा स्थालीपाकं कुर्वीतेति तद्विधानं तु स्थालीपाकं

पञ्चस्थाने कुर्य्यात्स्वधानुकल्पिकं। अपयेत्तु सवात्मायाकारु राधागोप्रयस्यतु इति कृं दोगपरिशिष्टीयं ग्राह्यं। अग्नि तिउद
तु चरोः पश्चात् अन्तरव शातातपः। नवोदके नवान्ने च गृहप्रच्छादने तथा। पितरः स्पृहयन्त्यन्नं मघासु मयास्तुचा। तस्मा
त्कुर्यात् सदा युक्तो विद्वांस्तु ब्राह्मणो ध्रुवं। तस्मादन्नप्रधानमावश्यकं पूर्वाह्णिकं तु उपकरणत्वेन शक्तानामावश्यकं। उभ
यत्र सदेति श्रवणान्नित्यत्वं। तथा च नित्यं सदा यावदायुर्नैकदाचिदिति क्रमेण। उपेत्याति क्रमे दोष श्रुतेरत्यागदर्शनात्
फलाश्रुतेर्वीप्सया च तन्नित्यमिति कीर्तितं। नवोदके वर्षोपक्रमे आर्द्रास्थे रवाविति यावत् आर्द्रादितो विशाखान्तं रवि
चारेण वर्षतीति नव्यवर्द्धमान धृतात् प्रावृट्काले समायाते रौद्रं कृष्णे गते रवौ नाडीवेध समायोगे जलयोगं वदाम्यह
मिति रुद्रयामलाच्च। रौद्रमार्द्रा। नवोदक श्राद्धस्य सावकाशत्वात्। त्रयोदश्यादिके निषेधमाह दीपिकायां त्रयोदशीजन्म
तिथिं च नंदां जन्मर्क्षताराः सितवासरं च। त्यक्त्वाह वीप्सं दुकरं त्यमेव ध्रुवेषु च श्राद्धविधानमिष्टं सितवारं शुक्रवारं कृष्णे

राशिः। ह्र्योदयस्तु श्रवणा पुष्य मृगशिरो हस्तारेवत्यनुराधा उत्तरात्रयरोहिण्यः। नवोदकश्राद्धकालस्य कृष्णपक्षेचैत
दातंत्रात् कृष्णपक्षनिमित्तकश्राद्धसिद्धिः सावकाशमधिकृत्य महाभारते नक्षत्रेचनकुर्वीत यस्मिंजातो भवेन्नरः। नप्रो
ष्ठपदयोः कार्यं तथाग्नेयेच भारत। दारुणेषुच सर्वेषु प्रत्यरीच विवर्जयेत्। ज्योतिषे यानि प्रोक्तानि तानि सर्वाणि वर्जयेत् प्रो
ष्ठपदा पूर्वभाद्रपदा। द्विनक्षत्राद्विवचनं। आग्नेयं कृत्तिका। दारुणा मुक्तं। ज्योतिषे दारुणं चोरगं रौद्रं ऐंद्रं नैर्ऋतमेवच उ
रगं अश्लेषा रौद्र मार्द्रा ऐंद्रं ज्येष्ठा नैर्ऋतं मूला। विष्णुधर्मोत्तरे नक्षत्राणि तथैवात्र दारुणोग्राणि वर्जयेत् तत्र उग्रनक्षत्रा
णि पूर्वात्रयमघाभरण्यः। ज्योतिषे। रजोयुक्तस्तां तु वाचीच रौद्राद्यपादगे रवौ। तस्यां पाठो वीतवापो नाहि भी दुग्धपानत
ः। रजोयुक्ता कृतुमती पृथ्वी। मात्स्यसूक्ते। धरण्यामृतुमत्यांच भूमिकंपे तथैवच। अंतरागमने चैव विद्यां नैव पठेद्बुधः ज्यो
तिषे यस्मिन्वारे सहस्रांशु र्याम्यां कालं मिथुनं व्रजेत् अंबुवाची भवेन्नित्यं पुनस्तात्कालवारयोः। नवान्नश्राद्धकालस्य ज्योतिषे।

सूर्ये चैव विशाखगे स्मरतिथौ पापे त्रिजन्मान्विते नंदामेर सहीजकाव्यदिवसे पौषे मघौ कार्त्तिके । मेषुयाति शिवेषु विष्णु
शयने कृष्णे शशिन्यष्टमे श्राद्धं भोजनकं नवान्नविहितं पुत्रार्थनाशप्रद । ज्येष्ठाश्लेषाङ्गे सूर्ये मृगनेत्रानिशात्मके नवान्नभोज
नं श्राद्धं जन्मचंद्रे तिथौ न च । सूर्ये चैव विशाखगे मार्गशीर्षस्य विंशतिदंडाधिक प्रथमदिनत्रयावस्थिते । स्मरतिथौ त्रयोदश्यां
पापे पंचमताराज्रये उग्रगणाः पूर्वात्रयमघाभरणयः । अहिरश्लेषा शिव आर्द्रा । भोजराजः । ब्रह्माविष्णुबृहस्पति शशध
रो मार्तंड पौष्णादितौ मैत्रे चित्र विशाख वायुधनभे मूलाश्वि वह्नौ तथा शक्रे वारुणा कृष्णके शुभदिने श्राद्धं नवे शस्यते नंदा
मार्गेव भूमिजेषु न भवेत् श्राद्धं नवान्नोद्भवं । ब्रह्मादयः रोहिणी श्रवणा पुष्य मृगशिरो हस्ता रेवती पुनर्वसु अनुराधा चित्रा वि
शाखा स्वाती धनिष्ठा मूलाश्विनी कृत्तिका ज्येष्ठा शतभिषाः । नवान्न श्राद्धे मूला कृत्तिका ज्येष्ठा विधानात्षष्ठेषमञ्जरणाप्राप्तेः । आ
श्लेषा कृत्तिका ज्येष्ठा मूला जपदकेषु च । भृगुभौमसदिने रिक्ता तिथौ नाद्यान्नवौदनमिति श्राद्धशेषा भोजि मात्रपरं । अजपदं पूर्वेभा

द्रूपदा। चंद्रतारा घमुद्धै प्रतीकार माह देवलः कर्म्म कुर्य्यात् फलाव्याप्त्यै चंद्रादिशोभने बुधः सुस्थकाले त्विदं सर्वं नार्त्ते का
लमपेक्षते। चंद्रे च शंखं लवणं च तारे तिथावमंद्रे सितं तंडुलाज्यं। धान्यं च दद्यात् करणाह्ववारे योगे तिलान् हेममसीं च ल
ग्ने। तारे जन्म विपत् पापकष्टे। कृष्णमविहितं नक्षत्रं तारंभिदालवणं परिमाणं मासे मासे राजमार्त्तण्डे एकद्विपंचसप्तद्विनायदे
द्यात् पलानि लवणस्य च। क्रमशो जन्मनि विपदि प्रत्यरि मरणाख्यतारकासु पलं च लौकिके मानैः सार्द्धं रतिद्विमाषकं।
तोलकं त्रितयं ज्ञेयं ज्योतिर्ज्ञैः स्मृतिसम्मतं। वामनपुराणं च विष्णुयो व्येति पातालं ये चान्ये निम्नसंभवाः तेनामस्मरणाद्विलो
नाशं यांति महाभितः। विष्णुधर्म्मोत्तरे। सर्वोग्रमाणां परिमोक्षकारि संपूजनं देववरस्य विष्णोरिति। ब्रह्मपुराणे। प्रा
श्नीयाद् दधिसंयुक्तं नवं विप्राभिमंत्रितं अभिमंत्रितं मंत्रानादेशे गायत्रीमिति वचनाद्गायत्र्येति। स्मृतिः गृहीत्वा ब्राह्मणानुज्ञां
सदधि प्राशयेन्नवं। भविष्योत्तरे शुक्लापूर्णां तु माघस्य दद्यात् दीक्षाय भोजनं संवत्सरकृतं पापं तत्क्षणादेव नश्यति।

52

धवलधृता स्मृतिः। अष्टम्यां तु शितेपक्षे भीष्माय तु तिलोदकं। अन्नं च विधिवद्दद्युः सर्वे वर्णा द्विजातयः। सर्वैर्वर्णैरित्यु
पादानात् ब्राह्मणशूद्रयोरप्यधिकारः द्विजातय इति संबोधनं। ब्राह्मणास्त्वन्यवर्णानां यः करोत्यौर्द्ध्वदैहिकं। तद्वर्णत्व
मसौ याति इहलोके परत्र चेति मरीचवचनं तु भीष्मकृत्येतरपरं तथाच स्मृतिः ब्राह्मणाद्यास्तु ये वर्णा दद्युर्भीष्माय नो जलं
संवत्सरकृतं तेषां पुण्यं नश्यति सत्तम। सवर्णेभ्यो जलं देयं नासवर्णे कथंचनेति भीष्मकृत्येतरपरमिति। संवत्सरप्रदी
पः। असवर्णे जलदाननिषेधस्तु प्रकरणादपि श्राद्धादिविषय इति श्रीदत्तः। तत्र तर्पणमंत्रः वैयाघ्रपद्यगोत्राय सांकृ
तिप्रवराय च अपुत्राय ददाम्येतत् सलिलं भीष्मवर्म्मणे। भीष्मः शांतनवो वीरः सत्यवादी जितेंद्रियः आभिरद्भिरवा
प्नोतु पुत्रपौत्रोचितां क्रियामित्यार्घ्यं सामंत्रः। पुत्रपौत्रोचितामित्यभिधानात् पितृकर्म्मरीत्या। ब्राह्मणाः पितृतर्पणानंतरं।
क्षत्रियादिस्तु तत्पूर्वं तर्पयेदिति। अत्र बीजं वर्णोन्येषु ॥०॥ अथाशोकाष्टमी। स्कांदे मीने मध्यौ शुक्लपक्षे अशोकाख्या

५२

तिथि०)

तथाष्टमी। पिबेदशोककलिकाः स्नाया लौहित्यवारिणी। अशोकाख्येष्टुपादानात् तिथिमात्रे पितत् पानं। फलंतु मंत्रलिं
गात् शोकरहितत्वमवगंतव्यं। लौहित्यवारिणि ब्रह्मपुत्राख्यनदजले। पुनर्वसुयोगे फलाधिक्यमाह लिंगपुराणगरुडपु
राणयोः। अशोककलिकाश्चाष्टौ ये पिबंति पुनर्वसौ। चैत्रे मासि सिताष्टम्यां नते शोकमवाप्नुयुः। मंत्रश्च त्वामशोकहराभीष्ट
मधुमाससमुद्भव। पिबामि शोकसंतप्ता मामशोकं सदा कुरु। स्त्रीशूद्रकर्तृकपाने प्रागुक्तास्वयं मंत्रः पाठ्यः स्त्रीपक्षे प्रपू
र्णो नास्तीति विवृतमेकादशीतत्वे। अशोकपानंतु पंचमार्द्धप्रहरव्यापिन्यामष्टम्यां भ्रातृद्वितीयावत्। पुनर्वसौ वृषे लग्ने।
चैत्रे मासि सिताष्टमी। लौहित्ये विरजे स्नायात्सर्वपापैः प्रमुच्यते। पृथिव्यां यानि तीर्थानि सरितः सागरादयः सर्वे लौहित्य
मायांति चैत्रे मासि सिताष्टमी। ब्रह्मपुत्र महाभाग शांतनोः कुलनंदन अमोघागर्भसंभूत पापं लौहित्यमेहरः। इति स्नान
मंत्रः। कालिकापुराणे चैत्रे मासि सिताष्टम्यां यो नरो नियतेंद्रियः स्नायाल्लौहित्यतोयेषु स याति ब्रह्मणः पदं। चैत्रेतु सकले

53

मासं शुचिः प्रयतमानसः । लौहित्यतोये यः स्नायात् स कैवल्यमवाप्नुयात् । लोहितात्सरसो जातो लौहित्याख्यस्ततो भवेत् श्री
तु माघे विष्णुः । पुनर्वसौ बुधोपेता चैत्रे मासि सिताष्टमी । श्रोतःसु विधिवत् स्नात्वा वाजपेयफलं लभेत् ॥*॥ अथ नवमी ।
सा चाष्टमीयुता ग्राह्या युग्मात् । भविष्ये । मासेश्वयुजि येन पुण्यं विधिना पूज्य चंडिकां । तत्फलं लभते वीर नवम्यां कार्त्तिकस्य
च । भविष्ये माघे मासी तु शुक्ला या नवमी लोकपूजिता । महानंदेति सा प्रोक्ता महानंदकरी नृणां । स्नानं दानं तपो होमो देवा
र्च्चनं नृपोत्तम । सर्वं तदक्षयं प्रोक्तं यदस्यां क्रियते नरैः । तथा नवम्यां नववर्षाणि राजन् पिष्टाशनो भवेत् । तस्य तुष्टा भवेद्गौ
री सर्वकामप्रदा शुभा । अद्येत्यादि नवम्यां तिथावारभ्य नववर्षाणि यावन्नवम्यां पिष्टेतरभोजननिवृत्तिरिति संकल्पे विशे
षः सर्वकामप्रदा गौरी तोष्यः फलं ॥*॥ अथ श्रीरामनवमी । अगस्त्यसंहितायां । चैत्रे मासि नवम्यां तु जातो रामः स्वयं हरिः
पुनर्वस्वृक्षसंयुक्ता सा तिथिः सर्वकामदा । पुनर्वस्वृक्षसंयोगः स्वल्पोपि यदि लभ्यते । चैत्रशुक्लनवम्यां तु सा तिथिः सर्वकामदा

५२

तिथि

श्रीरामनवमी प्रोक्ता कोटिसूर्य्यग्रहाधिका। तस्मिन् दिने महापुण्ये राममुद्दिश्य भक्तितः। यत्किंचित् क्रियते कर्म्म तत्सरस्व
यकारकं। उपोषणं जागरणं पितॄनुद्दिश्य तर्पणं। तस्मिन् दिने च कर्त्तव्यं ब्रह्मप्राप्तिमभीप्सुभिः। चैत्रपदं चांद्रपरं। मेषं
पूषणि संप्राप्ते लग्ने च कर्कटाह्वये। आविरासीत् सकलया कौशल्यायां परः पुमान्। अत्र मेषस्थ सूर्य्ये चांद्रे चैत्रस्यैव संभ
वात् तिथिकृत्यत्वाच्च। तथा तस्मिन् दिने महापुण्ये राममुद्दिश्य भक्तितः। जपेदेकांत आसीनो यावत्स्याद्दशमी दिनं।
तेनैव स्यात् परश्व्यो दशम्यां भोजयेद्द्विजान्। भक्ष्यभोज्यैर्बहुविधैर्भक्त्या दद्याच्च दक्षिणां। कृतकृत्यो भवेत्तेन सद्यो रामः
प्रसीदति। चैत्रे शुद्धा तु नवमी पुनर्वसुयुता यदि। सैव मध्याह्नयोगेन महापुण्यतमा भवेत्। नवमी चाष्टमी विद्धा त्या
ज्या विष्णुपरायणैः। उपोषणं नवम्यां वै दशम्यामेव पारणं। एतद्वचनद्वयं कालमाधवीयेपि। किंतु महापुण्यफलेति
पाठः। शुद्धेति श्रवणात् शुद्धाया मुख्यादरेण विद्धायां। अतएवाष्टमीविद्धा नवमी सनक्षत्रापि नोपोष्येति माधवाचार्य्यैः

सैव ताहृश्येव नतु विद्धा। यदातु परदिने एकादश्यां दशमी पारणायोग्या तदा विद्धैव दशमीयुक्ता नवम्युपोष्या वैष्णवै
र्विष्णुपरायणै रिति श्रवणात्। अवैष्णवैस्तु अष्टमी विद्धैव ग्राह्या यदातु पूर्वदिने अष्टमी विद्धा नवमी परत्र दशमीयुता
नवमी एकादशी दिने च दशमी न पारणायोग्या तदा नक्षत्रयोगाभोगेप्यष्टमी विद्धैव ग्राह्या परदिने दशम्यामेव पारणासि
ति नियमात् तथा च रामार्चनचन्द्रिकायां। दशम्यादिषु वृद्धिश्चेत्तस्या विद्धैव वैष्णवैः तदन्येषां तु सर्वेषां व्रतं तत्रैव निश्चि
तं। दशम्यामेव प्रावृत्य दशमीं नैव लंघयेत्। निश्चित्यैवं विचारेण नवमीव्रतमाचरेत् इति कारिकाया मगस्त्यसंहिताव्या
ख्याने। वस्तुतस्तु दशमी पारणासत्वे सर्वैरेवाष्टमी विद्धा नोपोष्या विष्णुपरायणैरिति विष्णुपरायणत्वेन भवितव्यमित्यु
पदेशपरं ननु कर्तृविशेषणं। कुं अगस्त्येनावैष्णवस्य विद्धोपवासानुपदेशात्। कर्तृभेदे विधिद्वय कल्पनापत्तेश्च। एवं
माधवाचार्येण सामान्यत एव विद्धा निषिद्धा। अगस्त्यसंहितायां मस्य नित्यतामाह प्राप्ते श्रीरामनवमीदिने मर्त्यो विमूढधीः

उपोषणं न कुरुते कुंभीपाके स पच्यते। यस्तु रामनवम्यां तु भुंक्ते मोहाद्विमूढधीः कुंभीपाकेषु घोरेषु पच्यते नात्र संशयः।
अत्र मत्ये इत्युपादानान्नरमात्राधिकारः। एवं च कुर्याद्रामनवम्यां म उपोषणं मतंत्रितः। मातृगर्भेम वाप्नोति नैव रामो भ
वेत्स्वयं तस्मात्सर्वात्मना सर्वे कृत्वैव नवमीव्रतं। मुच्यंते पातकैः सर्वैर्यांति ब्रह्म सनातनमिति फलकीर्तनं प्रागुक्तसंयोग
पृथक्त्वन्यायात्सिद्धं। अगस्त्यसंहितायां। शालग्रामशिलायां तु तुलसीदलकल्पिता। पूजा श्रीरामचंद्रस्य कोटिकोटि
गुणाधिका। अत्रानुष्ठानमागस्त्यसंहितातः संक्षिप्य लिख्यते। प्रातः कृतस्नानादिः। ॐ उपोष्य नवमीं त्वद्य यामेष्वष्टसु
राघव। तेन प्रीतो भव त्वं भोः संसारात् त्राहि मां हरे। इति निवेद्य ध्यायेत् ॐ कोमलांगं विशालाक्षमिंद्रनीलसमप्रभं द
क्षिणांशे दशरथं पुत्रावेक्षणतत्परं। पृष्ठतो लक्ष्मणं देवं सच्छत्रं कनकप्रभं। पार्श्वे भरतशत्रुघ्नौ तालवृंतकरावुभौ अ
ग्रे व्यग्रं हनूमंतं रामानुग्रहकांक्षिणं। एवं ध्यात्वा श्रीरामं पूजयेत्। स्नानमंत्रः इंद्रोऽग्निश्च यमश्चैव नैरृतो वरुणोऽनिलः।

कुवेर ईशो ब्रह्मादि दिक्पालाः स्नापयन्तु ते। अथ हरिनन्तः। कौशल्यां पूजयेत्। मन्त्रस्तु रामस्य जननी चासि राममयमि-
दं जगत्। अतस्त्वां पूजयिष्यामि लोकमातर्नमोऽस्तु ते। तथा नमो दशरथायेति पूजयेत् पितरं ततः। ततोऽनुज्ञाप्य देवे-
शं परिवारान् समर्चयेत्। पूर्वं षट्कोणकोणेषु हृदयादीनि षट्क्रमात्। हृदयादीनि रां हृदयाय नम इत्यादिना। तथा
हनूमन्तं ससुग्रीवं भरतं सविभीषणं लक्ष्मणं गरुडं शत्रुघ्नं जाम्बवन्तं दलादिषु। धृष्टिं जयन्तं विजयं सुराष्ट्रं राष्ट्रवर्द्धनं अ-
कोपं धर्मपालाख्यं सुमन्त्रं दलमध्यतः। दलाग्रे लोकपालांश्च तथास्त्राणि तदग्रतः। लोकपाला इन्द्रादयो दश। तदस्त्रा-
णि वज्रशक्तिदण्डखड्गपाशांकुशगदाशूलचक्रपद्मानि। मध्याह्ने जन्म भावयेत्। उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नव-
म्यां तिथौ लग्ने कर्कटके पुनर्वसुदिने मेषं गते पूषणि। निर्दग्धुं निखिलाः पलाशसमिधो मेध्यादयोध्यारणे आविर्भूत-
मभूदपूर्वविभवं यत् किंचिदेकं महः। पलाशा राक्षसाः। मत्वैवं वादयेद्वाद्यान् घोषं घोरं जगत्पतेः। फलपुष्पांबुसंपूर्णं

गृहीत्वा शंखमुत्तमं । अशोकरतनकुसुमैर्युक्तं च तुलसीदलैः । मंत्रस्तु दशाननवधार्थाय धर्मसंस्थापनाय च । दानवानां
विनाशाय दैत्यानां निधनाय च । परित्राणाय साधूनां रामो जातः स्वयं हरिः । गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितो मम पु
ष्पांजलिं पुनर्दत्वा यामे यामे स्वर्णत्रितः । पूजयेद्विधिवद्भक्त्या दिवारात्रं नयेद्बुधः ॥ ॥ अथ दशमी । सा तु शुक्लाएका
दश्या कृष्णा तु नवम्या युता ग्राह्या । यथा ऽ गिराः । संपूर्णा दशमी कार्या पूर्वया परया ऽथवा । युक्ता न दूषिता यस्मादिति सा
सर्वतोमुखी । यथा संपूर्णा दोषैरहिता तथा विद्धापीत्युक्त विकल्पे व्यवस्थापयति । विष्णुधर्मोत्तरीयं शुक्लपक्षे तिथि
र्ग्राह्येत्यादि । ब्रह्मपुराण ब्रह्मवैवर्तयोः । ज्यैष्ठस्य शुक्लदशमी संवत्सरमुखी स्मृता । तस्यां स्नानं प्रकुर्वीत दानं चैव विशेषत
: । यां कांचित् सरितं प्राप्य दद्याद्दर्भतिलोदकं । मुच्यते दशभिः पापैः सुमहापातकोपमैः । अत्र केवलदशम्यां नदीमात्रे द
र्भकरणाक तिलतर्पण गंगास्नानात् दशविध पापक्षयं फलं । एवं दानादावपि । वस्तुतस्तु वक्ष्यमाणभविष्यजाह्नवीश्रवणात्

56

हेतुवन्निगदश्रवणाच्च। गंगामधिकृत्य ब्राह्मे। शुक्लपक्षस्य दशमी ज्येष्ठे मासि द्विजोत्तम। हरते दश पापानि तस्माद्दशह
रा स्मृता। अत्र केवलदशम्यां दशविधपापक्षयः फलं। भविष्ये। ज्येष्ठशुक्लदशम्यां तु हस्तायोगेन जाह्नवी। हरते दश पापा
नि तस्माद्दशहरोच्यते। पराशरमाधवे यमः ज्येष्ठे मासि सिते पक्षे दशम्यां हस्तसंयुते। दशजन्माघहा गंगा दशपापहरा।
स्मृता। अत्र दशजन्मकृतदशविधपापक्षयं फलं। अत्र प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणाः। अप्राप्ते तु विधौ यत्नेव
हवोप्येकवाक्यतः। इति न्यायेन। हस्तानक्षत्र गंगारूपगुणद्वयविशिष्टदशमी विधेये स्मिन् हनिलाभस्तत्र स्नानं। उभयदि
नेतु तल्लाभे परदिन एव। तत्रापि पूर्वदिने वक्ष्यमाणकुजवारलाभे तत्रापि स्नानं वारस्योभयत्रालाभात्। ततश्च पूर्वदिने तथा
विधस्नानं कृत्वा परदिने केवलदशम्यामपि दशविधपापक्षयकामेन स्नातव्यं। शंखः ज्येष्ठे मासि क्षितिसुतदिने शुक्लपक्षे द
शम्यां हस्ते शैलान्निरगमदियं जाह्नवी मर्त्यलोकं। पापान्यस्यां हरति च तिथौ सा दशेत्याहुरार्याः पुण्यं दद्यादपि शतगुणं वा

५६

तिथि०

ज्ञि मेधायुतस्य । ओं मे हस्तायुत दशम्यां गंगास्नाने दशजन्मार्जित दशविधपापक्षय शतगुणवाजिमेधायुतजन्यपुण्य
समपुण्यफलं । राजमार्त्तण्डे वाल्मीकिः । अदत्तानामुपादानं हिंसा चैवाविधानतः । परदारोपसेवा च कायिकं त्रिविधं स्मृ
तं । पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः । असंबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधं । परद्रव्येष्वभिध्यानं मनसानि
ष्टचिंतनं । वितथाभिनिवेशश्च त्रिविधं कर्म्म मानसं । एतानि दशपापानि प्रशमं यांतु जाह्नवि । स्नातस्य मम ते देवि जले
विष्णुपदोद्भवे । विष्णुपादार्घ्यसंभूते गंगे त्रिपथगामिनी । धर्मद्रवीति विख्याते पापं मे हर जाह्नवि । अत्र मंत्रलिंगे
न । ॐकारपूर्वकाण्येतानि सामान्यस्नानमंत्रांते स्नानपूर्वं पाठ्यानि । आगंतुकानामंते ऽभिनिवेश इति न्यायात् मंत्रांतक
र्म्मादिसन्निपात इति न्यायात् मंत्रांते कर्म्मादौ न सन्निपातयेदिति पापसंवीयाच्च हिंसापैशुन्यादिभेदमाह कामधेनौ देवलः
। कायक्लेशं मनोदुःखं वधं वा प्राणिनां पुनः । यः प्रवर्त्तयति द्वेषात्सा हिंसेति समासतः । परार्थे ब्राह्मणो वैध्याः प्रशस्ताम्

गपक्षिणः। भृत्यानां चैव वृत्त्यर्थमगस्त्यश्चरत् पुरा। तथा परुषवचनमपवादः पैशुन्यमनृतं वृथालापो निष्ठुरवचनमि
ति वाङ्मयाः षट्। परेषां देशजातिकुलविद्याशिल्परूपप्रवृत्ताचारपरिच्छद शरीरकर्म्म जीवानां प्रत्यक्ष दोषवचनं य
त्त्वान्यत् क्रोधसंतापत्राससंजननं वचः। परुषं तत्तु विज्ञेयं यत्त्वान्यत्तु तथाविधं। चक्षुष्मानिति लुप्ता [illegible] चांडालं ब्राह्मणो
ति च। प्रशंसानिंदनं द्वेधात् परुषात्तु विशिष्यते। तेषामेव परुषवचनानां परोक्षमुदाहरणमपवादः। गुरुनृपतिबंधु
भर्तृमित्रसकाशे, यो पघातार्थं दोषोपाख्यानं पैशुन्यं। अनृतं द्विविधं असत्यमसंवादश्चेति। देशराष्ट्रप्रसंगात्तु परार्थ
परिकल्पनात्। नर्म्महासप्रसंगात्तु भाषणं व्यर्थभाषणं। गुह्यांगामेध्यसंज्ञानां वचनं निष्ठुरं विदुः। यदन्यद्भावचोनी
चं स्त्रीपुंसोर्मैथुनाश्रयं। इत्येवं षड्विकल्पस्य दुष्टवाक्यस्य भाषणात् इहवा मुत्रवा क्रूरं मनर्थं प्रतिपद्यते। प्रशंसा
यानिंदनं प्रशंसानिंदनं। अत्र चतुर्विधषड्विधयोरविरोधः। समस्तो समस्तत्व भेदानादरात् परुषापवादयोरैक्यात्

तिथि० ३

असंबद्धप्रलापव्यर्थभाषणयोः पर्य्यायत्वात् नार्थांतरत्वं । निष्ठुरस्य परुषांतर भावाच्च । अभिध्यानमपहरणार्थमिति
शेषः । वितथे / सत्यभूते वस्तुनि अभिनिवेशः पुनः पुनः संकल्पः ॥ ॐ ॥ ॐ नमो दुर्गायै ॥ स्मृतितत्त्वे महादेवी सृष्टिस्थि
त्यंतकारिणी । नत्वा वदति तत् पूजा फलं श्रीरघुनंदनः । अथ दुर्गोत्सवः । मार्कंडेयपुराणं । शरत्काले महापूजा क्रिय
ते या च वार्षिकीति । यथा मृताहनि तु कर्त्तव्यं प्रतिमासं तु वत्सरं प्रतिसंवत्सरं चैव माघमेकादशेऽहनीति याज्ञवल्क्य
वचनात् । श्राद्धस्य प्रतिसंवत्सर कर्त्तव्यत्वश्रुतेः । यथा वा प्रतिसंवत्सर माग्रहायनेष्टिं कुर्य्यादिति प्रतिसंवत्सर कर्त्तव्य
त्वश्रुतेः । सांवत्सरिक विशेषणं प्रतीयते । तथा / त्रापि वार्षिकीति श्रुतेः प्रतिसंवत्सरं कुर्य्यात् स्थापनं च विसर्जनमित्य
त्रापि प्रतिसंवत्सर कर्त्तव्यत्वमिति श्रुतेः । प्रागुक्त शरत्काल इति श्रुतेश्च । वर्षशरदो निमित्तत्वेन वार्षिक शरत्कालीनेति दु
र्गा पूजा या विशेषणं प्रतीयते । ततश्च वार्षिक शरत्कालीन महापूजेति एक वचनोत्त निर्द्देशात् तत्र कल्पोक्त नानादिन सा

व्यापि एकैव प्रतीयते। शारदीया महापूजा चतुःकर्ममयी शुभा। तां तिथित्रयमासाद्य कुर्याद्भक्तिविधानतः इति लिं
गपुराणे। चतुःकर्ममयीत्यनेन चतुरवयवत्वेनाभिधानात् स्नपनपूजनबलिदानहोमरूपावश्यमासायुक्तेश्च। सा च
प्रतिवर्षं कर्त्तव्या। दुर्गाया इत्युपक्रम्य द्विशरीरे चरे चैव लग्ने केंद्रगते रवौ। वर्षे वर्षे विधातव्यं स्थापनं च विसर्जनमिति देवी
पुराणे वीप्साश्रुतेः। अत्र द्विशरीरे कन्यायां तदानीं अन्यद्विशरीरादेः पूर्वोक्तेऽसंभवात् केंद्रगते लग्नगते। संवत्सरव्यती
तेन तु पुनरागमनाय चेति मंत्रलिंगाच्च। सा च पूजा नित्या वीप्साश्रुतेः अकरणे प्रत्यवायश्रुतेश्च। यथा शारदीयां पूजामधिकृ
त्य कालिकापुराणे यो मोहादथवालस्याद्देवीं दुर्गां महोत्सवे। न पूजयति दंभाद्वा द्वेषाद्वाप्यथ भैरव। क्रुद्धा भगवती तस्य।
सर्वान्कामान्निहंति वै। विधिसमभिव्याहारात् फलश्रुतेः काम्या च। यथा तत्रैव कृत्वैव परमां पूजां वृत्तिं त्रिदिवौकसः। एव
मन्यैरपि सदा देव्याः कार्य्यं प्रपूजनं। विभूतिमतुलां लब्धुं चतुर्वर्गप्रदायकं। पूजयेदित्यधिकृत्य भविष्योत्तरेपि। भवानीतुष्

पु ८

तिथि॰ ३

येपार्थ संवत्सरसुखायच। भूतप्रेतपिशाचानां शांत्यार्थं चोत्सवायच। देवीपुराणे। तृप्तायां नृपदुर्गायां निमेषार्द्धेन यत्फलं। तत्तत्कुं मह्नेशोणि शक्तौ वयेशतैरपि। एवंच अतुलविभूत्यादि मिलितं वामवानी प्रीतिर्वा तत्तत्कल्पोक्तं फलंवा निर्द्दिश्यमिति। एवंच तत्तत्कल्पोक्तकरणेतु तत्तत्तिथि पूजायां द्रव्यदानादिषु यदंतर्गतं फलं तत्प्राप्त्यर्हीयद्रव्यदानवदानु षंगिकं अतो नतत्र काम्याभिलापापेक्षा बलिघातेतु ततो देवीं समुद्दिश्य काममुद्दिश्यचात्मनः इति कालिकापुराणे उद्दिश्येत्यभिधानात् काम्याभिलापः। ततश्च संयोगपृथकत्वन्यायात् उभयरूपेयं। ततः काम्यतया पूजने कृते प्रसंगान्नित्यपूजासिद्धिः एवंबलिहोमाद्येपि। एवं कर्म्मकृत्वैतां यतादृशं फलं न दृश्यते तत्कलिस्वभावात् तथाच विष्णुपुराणे यदायदा सतां हानिर्वेदमार्गानुसारिणां। तदातदा कलेर्वृद्धिरनुमेया विचक्षणैः। आरंभाश्च विसीदंति यदाधर्म्मभृतां नृणां। तदानुमेयं प्राधान्यं कलेर्मैत्रेयपंडितैः। मात्स्यपुराणे। यदाधर्म्मश्चतुष्पादः स्याद्धर्म्मः पादविग्रहः। कामिनस्त

59

मसङ्कुला जायंते तत्र मानवाः। अहंकारगृहीताश्च प्रक्षीणस्नेहबांधवाः। विप्राः शूद्रसमाचाराः संति सर्वे कलौ युगे। नव
ग्रहपूजानंतरं काम्यारंभमाह मात्स्यपुराणे। नवग्रहमखं कृत्वा ततः कर्म समाचरेत्। अन्यथा फलदं पुंसां न काम्यं जा
यते क्वचित्। अत्र फलजनकापूर्वैक्यात् कर्मणोप्यैक्ये अन्यथा संकल्पावाहनविसर्जनदक्षिणाभेदस्यात्। ततश्च स्वोप
यक्षुणाऽधिवासदिनेऽगाधिकाराय तद्बीजभूतकाम्यप्राधानाधिकारसंपादकः कुशतिलजलत्यागसहितकाम्याभिला
षपूर्वकप्रधानसंकल्पः कार्य्य इति द्वैतनिर्णयोक्तवदत्रापि काम्यत्वेन नित्यत्वेन वाकरणेपि युक्तत्वात्। ततः कल्पारंभदि
ने बोधनादि प्रागेव संकल्पः नतु दिनांतरेपि। शरत्काले महापूजेत्यत्रैकवचनश्रुतेरेकप्रयोगसाध्यत्वेन एककर्म्मताय
न्न क्रियाकलापजन्यस्य वाक्यार्थीभूतनियोगस्यैक्यात् दर्शपूर्ववत् नतु प्रत्येकेन तत्तत्कर्म्मणां संकल्पः कलिकापूर्वजनक
त्वात् ऐंद्रदध्यादियागवत् अतएव जिनकधनंजयसेग्रहयोः। आरभ्य तस्यां दशमीं तु यावत् प्रपूजयेत् पर्वतराजपुत्रीमि

५६

युक्तं। अत एव कन्यासंस्थे रवौ शक्रशुक्लां समारभ्य नंदिकामित्युपक्रम्य महानवम्यां पूजेयं स्वर्गमोक्षप्रदायिनी त्यं तेन देवी
पुराणेनापि षष्ठीतः प्रभृति नवमी पर्यंतं पूजायामित्येकत्वेनोक्तं। तेन पंचम्यामेकभक्तं ततः षष्ठ्यां प्रातः संकल्प इति रत्ना
करः। न च नंदिका प्रतिपदिति दुर्गाभक्तितरंगिण्युक्तं युक्तमिति वाच्यं महानवमीसन्निहितषष्ठ्यादिक्रमेणानाभावात् प्र
तिपदुक्तावपि प्रतिपदादिक्रमेणैककालत्वसिद्धेः प्रकृतार्थनिर्वाहात् एवं चानेकाहसाध्यत्वेन तिथ्युल्लेखानंतरमारभ्य द
शमीं यावदिति। वार्षिकशरत्कालीनदुर्गामहापूजनमिति च यथास्थाने वाक्यप्रयोज्यं अन्यथा संकल्पकालीनतत्तत्ति
थेरन्यदिने ऽसंभवादननुयापत्तेरिति सुधीभिर्भाव्यं। एवं च वक्ष्यमाणात्तत्तद्वचनात् कृष्णनवम्यादि प्रतिपदादि षष्ठ्या
दि सप्तम्या महाष्टम्यादि केवलाष्टमी केवल महानवमी पूजारूपाः कल्पाउन्नेयाः। तदनंतरमशौचेन प्रतिबंधकं। व्रत
यज्ञविवाहेषु श्राद्धे होमे ऽर्चने जपे। आरब्धे सूतकं न स्यादनारब्धे तु सूतकं। आरंभो वरणं यज्ञे संकल्पो व्रतजापयोः।

६०

नांदीश्राद्धं विवाहादौ श्राद्धं पाकपरिक्रिया । निमंत्रणांतु वा श्राद्धे आरंभः स्यादिति स्मृतिरिति राघवभट्टधृतविष्णुवच
नात् । पाकपरिक्रिया सा गृहे देशे श्राद्धविषयः तत्र तस्य तदुद्धरणास्यावश्यकत्वात् । संकल्प उक्तो हारीतेन । मनसा संक
ल्पयति वाचाभिलपति कर्म्मणा चोपपादयतीति भविष्यपुराणे संकल्पेन विना राजन् यत्किंचित् कुरुते नरः । फलं वा
ल्पाल्पकं तस्य धर्म्मस्यार्द्धक्षयो भवेत् । ब्रह्मपुराणेऽपि आशास्य च शुभं कार्य्यमुद्दिश्य च मनोगतमित्यगतस्य पूजने उक्तं ।
मनोगतं शुभं फलं आशास्य मानसा संकल्प्य उद्दिश्य वाचाभिलप्य कार्य्यं कर्म्मणोपपाद्यं भविष्ये श्रुतिशंखाग्निहस्तौ
स्त्र काश्यपरूप्यादिभिस्तथा । संकल्पो नैव कर्त्तव्यो मृन्मयेन कदाचन । गृहीत्वौदुंबरं पात्रं वारिपर्णं गुणान्वितं । दर्भत्रयं सा
ग्रमूलं फलपुष्पतिलान्वितं । जलाशयारामकूपे संकल्पे पूर्वदिङ्मुखः । साधारणे चोत्तरास्य ऐशान्यां निक्षिपेत्पयः । केवल
हस्तनिषेधस्तु पात्रान्तरसद्भावविषयः शंखादिना साहचर्य्यात् एकहस्तपरो वा । गृहीत्वौदुंबरं पात्रं वारिपूर्णमुदङ्मुखः

६०

तिथि०

उपवासं तु गृह्णीयाद् यद्वा वाप्येवधारयेदिति वराह पुराण दर्शनाच्च । अस्य व्रतत्वं च शारदीपूजामुपक्रम्य महाव्रतं महा
पुण्यं शंकराद्यैरनुष्ठितं । कर्तव्यं सुरराजेन्द्र देवीभक्तिसमन्वितैरिति देवीपुराणात् व्रती प्रपूजयेद्देवीं सप्तम्यादि दिनत्रये
इति भविष्यपुराणाच्च । दुर्गापूजाया व्रतत्वं व्यक्तं भागवते । चेरुर्हविष्यं भुंजानाः कात्यायन्यर्च्चनं व्रतं । स्कांद भविष्यपुराणयोः
शारदी चंडिकापूजा त्रिविधा परिगीयते । सात्विकी राजसी चैव तामसी चेति तत्शृणु । सात्विकी जपयज्ञाद्यैर्नैवेद्यैश्च नि
रामिषैः । माहात्म्यं भगवत्याश्च पुराणादिषु कीर्तितं । पाठस्तस्य जपः प्रोक्तः पठेद्देवीमनास्तथा । राजसी बलिदानेन नैवेद्यै
ः सामिषैस्तथा । सुरामांसाद्युपहारैर्जपयज्ञैर्विना तु या । विना मंत्रैस्तामसी स्यात् किरातानां तु संमता । आरात्कालीन दु
र्गापूजाधिकारे भविष्योत्तरीयं । ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्च सेवकैः । एवं नाना म्लेच्छगणैः पूज्यते सर्वदस्युभि
ः । देवीपुराणं स्वयं वाप्यन्यतो वापि पूजयेत् पूजयेत वा । पूजयेत्स्यात्मनेपदाद्धेतु निजं ततो नत्र स्वयं करणासामर्थ्ये अ

६।

न्यद्द्वारा। तथा च दक्षः स्वयं होमे फलं यत्तु तदन्येन न जायते। ऋत्विक् पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः। एभिरेव हु
तं यत्तु तद्धुतं स्वयमेव हि। विट्पतिर्जामाता। एवं च ऋत्विगादीनां तत्र फलन्यूनता। हयशीर्षे पंचरात्रे अर्च्चकस्य त
पो योगाद्ध्यानस्याभिशायनात्। आभिरूप्याच्च बिंबानां देवः सान्निध्यमृच्छति। बिंबानां प्रतिबिंबानां। अशौचादिशंक
या बोधनदिनात् पूर्वं शुचितत्कालजीविरूपाधिकाराभावेपि यद्वरणादिकं क्रियते तत्कर्म्मकाले। तस्य वक्ष्यमाणा
नारदोक्तस्वयंप्रवर्त्तनवत् प्रवर्त्तनाय न तु तदानीं प्रतिनिधीयते। अथ वानिक्षिप्याग्निं स्वदारेषु परिकल्प्यर्त्विजं तथा प्र
वसेत्कार्य्यवान् विप्रो वृथैव न चिरं क्वचित् इति छंदोगपरिशिष्टोक्तवदन्यत्रापि प्रतिनिधीयते। एवं च वरणं विनापि
यदि स्वयं प्रवर्त्तते तथापि तत्कर्म्मसिद्धिः दक्षिणा च तस्मै शुचिकाले दातव्येति। तथा च विवाहकल्पतरुरत्नाकरशांति
दीपिकादिषु नारदः। ऋत्विक्च त्रिविधो दृष्टः पूर्वजो वृतः स्वयंकृतः। यदृच्छयापि यः कुर्य्यादार्त्विज्यं प्रीतिपूर्वकं। यदृच्छ

६१

तिथि०)

यास्वेच्छया । एतत् प्रपंचितं शुद्धितत्त्वे । अत एव शंखलिखितौ राज्ञां पुरोहितो मात्यः शुद्धि स्यात्स्य तदाश्रया । नृपतीनामा
त्मप्रतिनिधिभूतः पुरोहितः । तेन नृपते रशौचे पुरोहितस्याशौचाभावात् नृपतेः शान्तिकपौष्टिकं पुरोहितेन स्वीयशु
द्ध्या कर्त्तव्यमिति हारलताप्रभृतयः । पूजादिकं च शुचिकाले समर्थोपकल्पितद्रव्येणाकर्त्तव्यं । यथायमः । पूर्वसंकल्पि
तं यद्रव्यं वा तस्मिन्नाशौचमिष्यते । कृत्यचिंतामणौ विवाहोत्सवयज्ञेषु अन्तरामृतसूतके । पूर्वसंकल्पितं द्रव्यं दीयमानं
न दुष्यति । स्वयंप्रवर्त्तनात् ऋत्विगादेरनुज्ञया प्रवर्त्तनात् फलाधिक्यं । तथा च कूर्मपुराणे । ऋत्विक्पुत्रोऽथवा पत्नी
शिष्यो वापि सहोदरः । प्राप्यानुज्ञां विशेषेण जुहुयाद्वा यथाविधि । पुत्रं विशेषयति श्रुतिः । अन्यैः शतकृताद्धोमादेकः
पुत्रकृतो वरः । पुत्रैः शतकृताद्धोमादेकास्याम कृतो वरः । संवत्सरप्रदीपे माहात्म्यं भगवत्याश्च पुराणादिषु कीर्त्तितं । प
ठेद्वा शृणुयाद्वापि सर्वकामसमृद्धये । अथ यद्यपि देवीमाहात्म्यपाठस्य सकृत्कृते कृतः शास्त्रार्थ इति न्यायात् सकृत्करणा

62

देवतत्तत्फलसिद्धिर्जायते तथापि तत्फलबाहुल्याय पुनःपुनः पाठः वेदादौ तथा दर्शनात्। तथा च ब्रह्मवधपायश्चि
त्ते मनुः। जपेद्वा नियताहारस्त्रिर्वै वेदस्य संहितां। प्रायश्चित्ते वशिष्ठोपि त्रिः पठेद्दघमर्षणमिति। सरस्वतीस्तवेपि पस्त
दूयेपि यो भक्त्या त्रयोदश्येकविंशति। अविच्छेद पठेद्धीमान ध्यात्वा देवीं सरस्वतीं। नंदिकेश्वर पुराणीय इंद्राक्षीस्तवेपि
शतमावर्तयेद्यस्तु मुच्यते व्याधिबंधनात्। जैमिनिरपि। फलस्य कर्म्मनिष्पत्तेस्तेषां लोकवत् परिमाणतः फलविशेषः।
स्यादिति। यथा लौकिककर्षणादीनां बाहुल्येन फलाधिक्यं तथा वैदिकपाठादीनामपि इत्यर्थः। संकल्पिते स्तोत्रपाठे सं
ख्यां कृत्वा पठेत् सुधीरिति वाराहीतंत्राच्च। इंद्राक्षी सरस्वतीस्तववत् चंडीपाठस्य वृत्तौ फलभूमादि व्यक्तं वाराहीतंत्रे चं
डीपाठफलं देवि शृणुष्व गदतो मम। एकावृत्त्यादिपाठानां यथावत्कथयामि ते। संकल्पपूर्वं संपूज्य न्यस्यांगेषु मनून्स
कृत्। पाठाद्बलिप्रदानाद्धि सिद्धिमाप्नोति मानवः उपसर्गोपशांत्यर्थं त्रिरावृत्तं पठेन्नरः ग्रहोपशांत्यै कर्त्तव्यं पंचावृत्तं

६२

तिथि०

वरानने । महाभये समुत्पन्ने सप्तावृत्तमुदीरयेत् । नवावृत्त्या लभेद्भूतिं वाजपेयफलं लभेत् । राजवश्याय भूत्यै च रुद्रावृत्त
मुदीरयेत् । अर्कावृत्तेः कामसिद्धिर्वैरिहानिः प्रजायते । मन्वावृत्त्या रिपुर्वश्यस्तथा स्त्री वश्यतामियात् । सौख्यं पंचदशा
वृत्तात् श्रियमाप्नोति मानवः । कलावृत्त्या पुत्रपौत्रधनधान्यादिसंपदः । राजभीतिविमोक्षाय वैरस्योच्चाटनाय च । कुर्यात्
सप्तदशावृत्तं तथाष्टादशकं प्रिये । महाबन्धाद्विमोक्षाय विंशावृत्तं पठेन्नरः । पंचविंशावर्तनात्तु भवेद्बंधविमोक्षणं । सं
कटे समरे शत्रुपन्ने दुश्चिकित्साभये तथा । जातिध्वंसे कुलोच्छेदे आयुषो नाश आगते । वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा
क्षये । तथैव त्रिविधोत्पाते तथा चैवातिपातके । कुर्यात् यत्नात् शतावृत्तं ततः संपद्यते शुभं । श्रियो वृद्धिः शतावृत्त्या राज्य
वृद्धिस्तथा परा । मनसा चिंतितं देवि सिद्ध्येदष्टोत्तराच्छतात् । शताश्वमेधयज्ञानां फलमाप्नोति सुव्रते । सहस्रावर्तनाल्लक्ष्मी
रावृणोति सदा स्थिरा । भुक्त्वा मनोरथान् कामान् नरो मोक्षमवाप्नुयात् यथाश्वमेधः क्रतुराड् देवानां च हरिर्यथा । तथा वाना

६३

मपि सर्वेषां तथा सम्प्रसतीस्तवः। अथवा बहुनोक्तेन किमेतेन वरानने। वं आः शतावृत्त पाठात् सर्वाः सिद्धयः।
पठनश्रवणावृत्तपाठनश्रावणे अपि कार्ये प्रयोजयिता/नुमंता कर्त्ता चेति सर्वे स्वर्गेनरक फलभोक्तारो यो भूय एवा
रभ्यते तस्मिन् फले विशेष इत्यापस्तम्बेनाप्रवृत्तप्रावर्त्तक फलस्मरणप्रयोजकस्यापि फलश्रुतेः। अत्र पाठयिष्ये श्राव
यिष्ये इति प्रयोगः एवं भारतादावपि अत्राविशेषात् सर्वेषामेवाधिकारः द्विजानां पाठश्रवणयोः शूद्रस्य श्रवणे/
धिकारः अत्र काम्यत्वेपि स्मार्त्तकर्मत्वेन प्रतिनिधिसंभवात् यथायथं पठिष्यामि श्रोष्यामीति संकल्प्यतेः प्रतिनि
धीयते। तथा चाधिकरणमालाकृन्माधवाचार्य्यधृतपराशरभाष्ये शातातपः। श्रौतं कर्म स्वयं कुर्य्यादन्योपि स्मार्त्त
माचरेत। अशक्तौ श्रौतमप्यन्यः कुर्य्यादाचारमंततः। एतद्वचनं काम्येपि प्रतिनिधिविधायकं नित्यनैमित्तिकमात्रप
रत्वे तु श्रौतस्मार्त्तभेदेनोपादानं व्यर्थं स्यात् तयोरविशेषादेव प्रतिनिधिलाभात्। श्रौतेतु उपक्रमात् परतः काम्ये प्रति

६२

निषिद्धोऽस्ति नित्यनैमिके हि सः। काम्यधूपक्रमादूर्द्ध्वं केचिदिच्छन्ति सत्तमाः। इत्येकवाक्यत्वात्। ततः स्मार्त्ते काम्यं प्रति निषिद्धा
प्यारभ्यते न तु श्रौतमिति स्थितिः। मात्स्यादिपाठे तु ॐ नारायणाय नमः। ॐ नराय नमः। ॐ नरोत्तमाय नमः। ॐ देव्यै नमः। ॐ स
रस्वत्यै नमः। इति नत्वा पाठः। नारायणं नमस्कृत्य नरं चैव नरोत्तमं। देवीं सरस्वतीं चैव ततो जयमुदीरयेदिति विधिः। एवं च भाग
वतीयसूक्तौ उदीरयेदित्यस्य स्वयमुदीरयन्नन्यान् पौराणिकानुपशिक्षयतीति श्रीधरस्वामिव्याख्यानमनुशासनविरुद्धं
भागवते चैवेत्यत्र व्यासमिति साक्षाल्लिखितं चैवेति भागवतपाठस्वीकारेण व्यासोऽलक्ष्यः। जयपदार्थमात्र ब्रह्मचारिकाण्डे भवि
ष्यपुराणं अष्टादशपुराणानि रामस्य चरितं तथा। विष्णुधर्मादिशास्त्राणि शिवधर्माश्च भारत। कार्ष्णं च पञ्चमो वेदो यन्म
हाभारतं स्मृतं। कार्ष्णं कृष्णद्वैपायनप्रणीतं। सौराश्च धर्मा राजेन्द्र मानवोक्ता महीपते। जयेति नाम एतेषां प्रवदन्ति मनीषि
णः। जयत्यनेन संसारमिति व्युत्पत्त्या जयस्ताद्ग्रंथः। एवं चार्थो न वलोकनात् आचाराद्वा आदावेव श्लोकः पाठ्यः मात्स्यसूक्ते

६५

वाराहीतंत्रे च। जप्यात् प्रणवं चादौ स्तोत्रं वा संहितां पठेत्। अंते च प्रणवं दद्यादित्युवाचादिपूरुषः। सर्वत्र पाठे विज्ञेयो ह्य
न्यथा विफलं भवेत्। शुद्धेनानन्यचित्तेन पठितव्यं प्रयत्नतः। न कार्यो शक्तमनसा कार्य्यं स्तोत्रस्य वाचनं। आधारे स्थापयित्वा
तु पुस्तकं वाचयेत्सुधीः। हस्तसंस्थापनादेव यस्मादल्पफलं भवेत्। स्वयं च लिखितं यच्च कृतिना लिखितं न यत्। अब्राह्मणे
न लिखितं तच्चापि विफलं भवेत्। ऋषिछंदादिकं न्यस्य पठेत् स्तोत्रं विचक्षणः। स्तोत्रेण दृश्यते यत्र प्रणवन्यासमाचरेत्। सं
कल्पिते स्तोत्रपाठे संख्यां कृत्वा पठेत्सुधीः। अध्यायं प्राप्य विरमेन्न तु मध्ये कदाचन। कृते विरामे मध्ये तु अध्यायादिं पठेन्नरः।
तत्तत्श्च मार्कंडेयपुराणीय देवीमाहात्म्यस्यादौ ऋषिछंदादिकं पठेत्। यथा प्रथमचरितस्य ब्रह्मर्षि गायत्री छंदो महाकाली
देवतानंदाशक्तिः रक्तदंतिका बीजं अग्निस्तत्वं महाकाली प्रीत्यर्थे जपे विनियोगः। मध्यमचरितस्य विष्णुऋषि महालक्ष्मी देवता
/त्रिष्टुप छंदः शाकंभरी शक्तिः दुर्गा बीजं सूर्यस्तत्वं महालक्ष्मी प्रीत्यर्थे जपे विनियोगः। उत्तरचरितस्य रुद्रऋषिः सरस्वती देवता

६४

तिथि ३

उष्णिक् छंदो भीमा शक्तिः भ्रामरी बीजं वायुस्तत्त्वं सरस्वती प्रीत्यर्थं जपे विनियोगः। नैयत कालीय कल्पतरौ भविष्यपुराणां इति
हास पुराणानि श्रुत्वा भक्त्या विशांपते। मुच्यते सर्वपापेभ्यो ब्रह्महत्यादिभिर्विभो। ब्राह्मणं वाचकं विद्यान्नान्यवर्णजमादरात्
श्रुत्वान्यवर्णजाज्जातन् वाचकान्नरकं व्रजेत्। देवाश्चो समग्रं कृत्वा ब्राह्मणानां विशेषतः। ग्रंथिं च शिथिलं कुर्याद् वाचकं कुरु
नंदन। पुनर्बध्नीत तत्सूत्रं न मुक्त्वा धारयेत् क्वचित्॥ हिरण्यं रजतं गाश्च तथा कांस्योपदोहनाः। दत्त्वा तु वाचकायेत श्रुतस्या
प्नोति तत्फलं। कांस्योपदोहनाः कांस्य क्रोडाः। वाचकः पूजितो येन प्रसन्नास्तस्य देवताः। तथा ज्ञात्वा सर्वे समाप्तिं च पूजयेद्वा
चकं बुधः। आत्मानमपि विक्रीय य इच्छेत्तस्य फलं कर्तुं। तथा विस्पष्टमद्रुतं शांतं स्पष्टाक्षरपदं तथा। कलस्वरसमायुक्तं काले
काले विशांपते। प्रदर्शयन् रसान् सर्वान् वाचयेद्वाचको नृप। देवीपुराणे। इषे मासस्य सिते पक्षे कन्याराशिगते रवौ। नवम्यां बोध
येद्देवीं क्रीडाकौतुकमंगलैः। ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां बिल्वाभिमंत्रणं। सप्तम्यां मूलयुक्तायां पत्रिकायाः प्रवेशनं। पूर्वाषाढायु

रसभावसमन्वितं। बुध्यमानः सदा ह्यर्थं ग्रंथार्थं कृत्स्नशो नृपः। ब्राह्मणादिषु सर्वेषु ग्रंथार्थं चार्पयेन्नरः। य एवं वाचयेद्ब्रह्मन् स विप्रो व्यास उच्यते

ताष्टम्यां पूजाहोमाद्युपोषणं । उत्तरेणानवम्यां तु बलिभिः पूजयेच्छिवां । श्रवणेन दशम्यां तु प्रणिपत्य विसर्जयेत् । अत्र नवम्या
दिकल्प उक्तः । तथा यावद् भूर्वायुराकाशं जलं वह्निः शशिग्रहाः । तावच्च चण्डिकापूजा भविष्यति सदा भुवि । प्रावृट्काले विशे
षेण आश्विने त्वष्टमी शुच । महाशब्दो नवम्यां तु लोके ख्यातिं गमिष्यति । अनेन महाष्टमी महानवमीति प्रयोगः कार्यः । अत्र
कन्याराशिगते रवावित्यभिधानं फलातिशयार्थं प्राथमिकाभिप्रायं वा न तु नियमार्थं । तथात्वे सौराश्विने प्रतिवर्षं कृष्णनवमीमा
रभ्य शुक्लदशमीं यावत् पूजाक्रमानुपपत्तेः अत्र कृष्णादित्वादिषु इत्यपि गौणाश्विनपरं । अत एव कालकौमुद्यादिधृतं । क
र्किरापर्के लशे सुप्ते शक्रध्वजक्रियाश्विने । तुलायां बोधयेद्देवीं वृश्चिके तु जनार्दनमिति बोधयेदिति पक्षान्तमिति शेषः । तत्रापि
नवमीबोधनं कन्यायामेव तत्रैव संभवात् । तेन सिंहार्के तुलार्केऽपि आश्विनत्वेन वाक्यरचना । महाष्टमीमहानवम्योरपि मासप
क्षोल्लेखः मासपक्षतिथीनामिति वचनात् । अमावास्यापौर्णमास्योः पक्षोल्लेखवत् अत्र कालिकापुराणे नवम्यां बोधनमष्टाद

६५

तिथि०)

शभुजायाः षष्ठ्यां बोधनं दशभुजायाः विशिष्टाभिधानात् तथैवेति वदंति तन्न कालिकापुराणे एवं कामाख्या पंचमूर्तिप्रकर
णे । शरत्काले पुरा यस्मात् नवम्यां बोधिता सुरैः । शारदा सा समाख्याता पीठे लोके च नामतः । इत्युपक्रम्य रूपमस्याः पुराप्रोक्तं
सिंहस्थं दशबाहुभिरिति । तथा रूपं त्विवं दशभुजं पूर्वोक्तं तु विचिंतयेत् । तथा पंचाननं काशरं च दैत्यमग्रे प्रपूजयेत् इत्यने
न सिंहमहिषयुक्ताया अपि नवम्यां बोधनमुक्तं । अत एव तत्रैव उग्रचंडेति या मूर्तिर्भेदकालीत्युक्तं पुनः । यया मूर्त्या त्वां
हनिष्ये सा दुर्गेति प्रकीर्तिता । एतासु मूर्तिषु यदा पादलग्नो नृणां सदा । पूज्यो भविष्यसि त्वं वै देवानामपि रक्षसामित्यनेन
कात्यायन्या दुर्गायाः पादलग्नत्वेन महिषस्य पूज्यत्वं पूर्वमुक्तं । अत एवाष्टादशभुजायाः पादलग्नत्वं महिषासुरस्य न संभ
वति । तस्माद्दशभुजाया नवम्यां षष्ठ्यां वा बोधनमिति । अत्र शरत्कालीनबोधनत्वेन शारदापदव्युत्पत्तिस्तत्पदं तालव्या
दि । सारं ददातीति व्युत्पत्तिस्तु काल्पनिकी । एवं प्रतिवर्षे कर्तव्यत्वात् आर्द्रानक्षत्रालाभेऽपि पूजा कार्या । नक्षत्रयोगस्तु फ

६६

लाति शयाय। तथाच लिंगपुराणे। मूलाभावेपि सप्तम्यां केवलायां प्रवेशयेत्। तथा तिथ्यंतरे ष्वेव मृक्षे शुच फलोद्भवः दे
वलः। तिथिनक्षत्रयो योगे द्वयोरेवानुपालनं। योगाभावे तिथि र्ग्राह्या देव्या पूजनकर्मणी। कृष्णनवम्या मार्द्रायोगो विधी
यं तत्रैव श्रूयते। यथा लिंगपुराणे। कन्यायां कृष्णपक्षे तु पूजयित्वार्द्र मेदिवा नवम्यां बोधये देवी यथा विभवविस्तरैः। चतुर्थपा
दे गीतवादित्रनिस्वनैरिति कालिकापुराणे पाठः। इषमासस्य सिते पक्षे नवम्या मार्द्र योगतः। श्रीवृक्षे बोधयामि त्वां यावत्
पूजां करोम्यहं। ऐं रावणस्य वधार्थाय रामस्यानुग्रहाय च। अकाले ब्रह्मणा बोधो देव्या स्तु पि कृतः पुरा। अकाले इति
तुरा त्रिवेदक्षिणायनस्य। तथाच श्रुतिः। तपस्तपस्यौ शैशिरा वृत्तः मधुश्च माधवश्च वासंतिकावृत्तः। शुक्रश्च शुचि
श्च ग्रैष्मावृत्तः। अथैतदुत्तरायणं देवानां दिनं नभाश्च नभस्यश्च वार्षिकावृत्तः। इषश्च ऊर्जश्च शारदावृत्तः। सहाश्च सह
स्यश्च हैमंतिकावृत्तः अथैतद्दक्षिणायनं देवानां रात्रिरिति। एवं च रात्रावेव महामायाब्रह्मणा बोधिता पुरा। तथैवच

तिथि० ६

नराः कुर्य्युः प्रतिसंवत्सरं नृप। इत्याद्यपेतात् परं। अतएव लिंगपुराणकालिकापुराणयोर्द्दिवेत्युक्तं। एवंच कालि
कापुराणे बोधने रात्राविति पदं देवरात्रिपरं। ततश्च पूर्वोक्ते नवम्यामार्द्रायुक्तायां बोधनं। पूर्वोक्तेतरकाल एवार्द्रा
लाभेन नवम्यामार्द्रे मेदिवेत्यत्र दिवापदात्तत्रापि बोधनं अन्यथा दिवापदं व्यर्थं स्यात्। ज्योतिषार्णवे व्यक्तमुक्तं वराहेण
। कन्यादिमीनपर्य्यंतं यत्र संप्राप्यते शिवः। तत्र बोधः प्रकर्त्तव्यो देव्या राज्ञां शुभप्रदः। शिव आर्द्रा। एवंच उभयदिने पू
र्वोक्ते नवमीलाभे परत्रार्द्रालाभे परत्व बोधनं न युग्मात् पूर्वत्र। युग्मबाधकनक्षत्रानुरोधात्। दिवानक्षत्रलाभे तु पूर्वोक्तव
वत् स्यात् उभयत्र पूर्वोक्तलाभे तु पूर्वदिने युग्मात्। अत्र केवलनवम्यां बोधनविधेर्नक्षत्रस्यापि गुणफलत्वाच्च माघे च फा
ल्गुने वापि भवेद्द्वै माघसप्तमी। माकरीति च यत् प्रोक्तं तत् प्रायोवृत्तिदर्शनादिति सौरागमान्माघ्यादिपदवत् आर्द्रायोग
इत्यस्य प्रायिकत्वेनाभिधानं प्रतीयते। ततश्चार्द्रारहिते बोधने मंत्रं तत्रानुपदेशात् तदयुक्तमंत्रः प्रमाणयुक्तत्वेन प्रयुज्यते

यन्न्यूनं चातिरिक्तं च यच्छिद्रं यदयज्ञियं । यदमेध्यमशुद्धं च यातयामं च यद्भवेत् । तदोंकारप्रयुक्तेन सर्वं याति पवित्रता-
मिति योगियाज्ञवल्क्यात् षष्ठ्यां बोधने त्वेवं । नवमीबोधनासामर्थ्ये तु षष्ठ्यां सायं बोधनं । यथा मत्स्ये षष्ठ्यां बिल्वतरौ
बोधं सायंसंध्यासु कारयेत् । संध्योक्ता वराहमिहिरेण । अर्द्धास्तमयात् संध्या व्यक्तीभूता न तारका यावत् । षष्ठ्यां बो-
धने तु प्रागुक्ते रावणस्य वधार्थायेति अहमप्याश्विने षष्ठ्यां सायाह्ने बोधयाम्यत इति पठेत् अत्र बोधनामंत्रणयोः
पृथक्त्वं तत्प्रकाशकमंत्रभेदात् अत्र बोधनमंत्रा उक्ता एव । आमंत्रणमंत्रौ तु मेरुमंदरकैलासेत्यादि प्रागुक्त इषे मा-
स्यसिते पक्ष इत्यादि । देवीपुराणे नवमीषष्ठ्योर्बोधनामंत्रणयोः पृथक्त्वाभिधानाच्च ततश्च षष्ठ्यामुभयकरणेऽपि प-
त्रीप्रवेशपूर्वदिने सायं षष्ठीलाभे एकदोभयकरणं यदा तु पूर्वदिने सायं षष्ठीलाभः परदिने सायं विना षष्ठीलाभस्तदा
पूर्वेद्युर्बोधनं परदिने सायमामंत्रणा यदा तूभयदिने सायं षष्ठीलाभस्तदा परदिने बोधनं त्रिसंध्यव्यापित्वात् । यदा तु

तिथि०

मयदिने सायं षष्ठ्यालाभस्तदा परेऽह्नि षष्ठ्यां बोधनं। बोधयेद् बिल्वशाखायां षष्ठ्यां देवीं फलेषु च। सप्तम्यां बिल्वशाखां ता-
माहृत्य च प्रपूजयेत्। पुनः पूजां तथाष्टम्यां विशेषेण समाचरेत्। जागरं च स्वयं कुर्याद् बलिदानं महानिशि। प्रभूतब-
लिदानं च नवम्यां विधिवच्चरेत्। ध्यायेद् दशभुजां देवीं दुर्गामंत्रेण पूजयेत्। विसर्जनं दशम्यां तु कुर्याद्वै शावरोत्सवैः
धूलिकर्दमविक्षेपैः क्रीडाकौतुकमंगलैः। भगलिंगाभिधानैश्च भगलिंगप्रगीतकैरिति कालिकापुराणात्। शावरो-
त्सवः। शाखां विशेषयति लिंगपुराणं। युग्माभिन्नां च बिल्वस्य फलाभ्यां शाखिकां तथा। तथा च मृन्मयीं देवीं स्नात्वा पूर्वं
प्रवेशयेत्। एतानि षष्ठ्यादिकल्पविधायकानि। षष्ठ्यां बोधनन्तु नक्षत्रानुपदेशान्न तस्यादरः। ज्येष्ठादरस्तु मंत्रेण
एव तत्रापि विशेषो वक्ष्यते। आमंत्रणं तु षष्ठीं विनापि सायमेव। यतियादेवताः सर्वाः श्वः कार्ये यत्र कर्मणि। साय
सा वाहयेद् विद्वान् नान्यत्रोक्तनिमित्तकात्। श्वो भाविनि जगत्सिद्धे प्रवेशे विंध्यवासिनी। बिल्वपादपमध्येति पूजार्थेसा

६४

यमं विका इति हयशीर्षे पंचरात्रीय देवीपुराणात् कौंडात्। ज्येष्ठा वा यदि वा षष्ठी सायं कालं न चेद्भवेत्। सायमेव
तथापि स्यात् बिल्वे शाखाभिमंत्रणं। पूर्वो षष्ठी सनक्षत्रा सायं प्राप्तामपि त्यजेत्। यदा तु पत्रिकापूजा न परेद्युर्भविष्यति
सन्निकृष्टं तु यत् पूर्वं पत्रिकादिवसस्य तु। तद्दिने वरणं कृत्वा परे शाखां प्रवेशयेत्। इति स्मृतिसागरधृत मात्स्य सूक्ताद्
ब्रह्माण्ड नंदिकेश्वर पुराणयोः। पत्रीप्रवेशात् पूर्वेद्युः सायाह्ने विंध्यवासिनी। चंडी मामंत्रयेद्विद्वान् नात्र षष्ठी पुर
स्क्रिया। विंध्यवासिनीमित्यत्र बिल्ववासिनीमिति पाठः। पठंति च। सायं षष्ठ्यां तु कर्तव्यं पार्वत्या अधिवासनं। षष्ठ्याला
भेपि कर्तव्यं सप्तम्यामपि नारद। इति। येत्वेतानि वचनान्यनालोच्य पत्रीप्रवेशाव्यवहितदिन एव षष्ठ्यामेव बिल्वाभि
मंत्रणं ब्रुवते। तेषां पूर्णषष्ठ्यनंतरं षष्ठीलाभे घटिकान्यून षष्ठीलाभे वा ततः परदिने घटिकाधिक सप्तमीलाभे तदनुप
पत्तिः। पूर्वदिवसीयायाः षष्ठ्या व्यवहितत्वात् परदिवसीयायाः कर्मानर्हत्वादिति। ततश्च सप्तम्यां मूलयुक्तायां केवला

६८

तिथि०

यां वा पत्रीप्रवेशः। उभयत्र सप्तमी लाभेपरत्र॥ युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया। रवेरुदयमीक्ष्यन्ते न तत्र तिथियुग्म
ता इति देवीपुराणात्। ज्योतिषे। पूर्वाह्णे नवपत्रिका शुभकरी सर्वार्थसिद्धिप्रदा आरोग्यं धनदा करोति विजयं चंडीप्रवेशे
शुभा। मध्याह्ने जनपीडनक्षयकरी संग्रामघोरावहा सायाह्ने वधबंधनानि कलहं सर्पेक्षणं सर्वदा। सप्तम्यामस्तगायां य
दि विशति गृहं पत्रिकाश्रीफलाद्या राज्ञः सप्राग राज्यं जनसुखमखिलं हंति मूलानुरोधात्। तस्मात्सूर्योदयस्थां नरपतिसु
खदां सप्तमीं प्राप्य देवीं भूपालो वेशयेत्तां सकलजनहितां राक्षसर्क्षे विहाय। राक्षसर्क्षं मूला। पत्रीप्रवेशनं राज्ञो विसर्ग
वा करोति यः। तस्य राज्यविनाशः स्यात्प्रजा च विकला भवेत्। देव्या गृहं दक्षिणायनेपि कर्तव्यं कल्पतरुधृत देवीपुराणोप्र
तिष्ठाविधानेन तद्विधानात्। तथा च महिषासुरमर्दिन्याः प्रतिष्ठा दक्षिणायने। तत्रैव यस्य देवस्य यः कालः प्रतिष्ठाध्व
जरोपणे। ततोपूरशिलान्यासे शुभदस्तस्य पूजितः। यस्य देवस्य प्रतिष्ठाध्वजरोपणे यः कालः शुभदः तस्य गर्तापूरशिलान्या

६७

से गृहारंभे सकालः पूजितः। तस्य प्रवेशेपि सकालः। ज्येष्ठादितिभ्यां संयुक्तं गृहारंभोदितं च यत्। तत्सर्वं योजयेद्देवप्र
वेशे दैवचिंतकः इति ज्योतिर्वचनात्। अदितिः पुनर्वसुः। पत्रिका तु कदली दाडिमी धान्यं हरिद्रा मानकं कचुः बिल्वाशो
का जयंती च विज्ञेया नवपत्रिकाः। बिल्वयुग्मसुपक्वस्य गवाक्षतंत्रे वायव्यस्थं राक्षसस्थं न गृह्णीयात्कदाचन। व्याहृतिभि
रावाहने मात्स्यपुराणं। विनायकं तथा दुर्गां वायुमाकाशमेव च। आवाहयेत् व्याहृतिभिस्तथैवाश्विकुमारकौ। तस्मिन्ना
वाहयेद्देवान् पूर्ववत् पुष्पतंडुलैः। तस्मिन्मंडलादौ। प्रतिष्ठाविधिमाह कालिकापुराणं। प्रतिमायां कपोलौ द्वौ स्पृष्ट्वा द
क्षिणपाणिना। प्राणप्रतिष्ठां कुर्वीत तस्यां देवत्वसिद्धये। अकृतायां प्रतिष्ठायां प्राणानां प्रतिमासु च। यथापूर्वं तथा
भावः स्वर्गादीनां न विद्यते। अन्येषामपि देवानां प्रतिमास्वपि पार्थिव। प्राणप्रतिष्ठा कर्त्तव्या तस्यां देवत्वसिद्धये। वासुदे
वस्य बीजेन तद्विष्णोरित्यनेन च। तथैवां गांगि मंत्राभ्यां प्रतिष्ठामाचरेद्बुधः। तथैव रुद्रयं त्र्यंबं दत्वा शंभ्वेत्त्व मंत्रवित् एभिर्मंत्रैः

६८

तिथि०

प्रतिष्ठां तु हृदयेपि समाचरेत्। अस्मै प्राणाः प्रतिष्ठंतु अस्मै प्राणाः क्षरंतु च। अस्मै देवत्वसंख्यायै स्वाहेति यजुरीरयन् अं
गमंत्रै रंगिमंत्रै वैदिकै रित्यनेन च। प्राण प्रतिष्ठां सर्वत्र प्रतिमायां समाचरेत्। तथा मोवः सुवर्णादित्व मात्रे एवं च दुर्गायाः
प्राणप्रतिष्ठायां कपोलौ धृत्वा मूलमंत्र मंगमंत्रं च पठेत् हृदयं/ गुष्ठं दत्वा अस्मै इत्यत्र अस्यै इत्यूहं कृत्वा तदादिकं पठेत्
अंगमंत्रै रंगन्यास मंत्रैः अंगि मंत्रै मूलमंत्रैः वैदिकै मंत्रोऽप्याति गुप्तता माऽप्य बृहस्पति येत् मिमं त्वनो त्वरिष्ठं समिमं दधा
तु विश्वेदेवास इह मादयंता मों प्रतिष्ठ इत्यादि मंत्रैः। तथा लिंगस्थां पूजयेद्देवीं पुस्तकस्थां तथैव च। मंडलस्थां महादेवीं
पावके प्रतिमासु च। चित्रे च विशिखे खड्गे जलस्थां वापि पूजयेत्। अत्र जले सेकाद्य योग्य स्नानं खड्गादावाह कालिका
पुराणं। सद्यः स्निग्धे मृन्मये वा सर्पिःसिंदूरजे तथा। श्रीचंदन प्रतिष्ठे वा लेपजे प्रतिमातनो। अंतिकस्थापिते खड्गे स्नापये
दर्पणेऽथवा। खड्ग प्रतिविंब योग्ये लोह निर्मित इति। पूजा सन्धि कृत्य वौधायनः प्रतिमास्थाने ष्वप्स्व ग्नावावाहन विसर्जनं च

७०

र्जनमिति। प्रतिमास्थाने तु स्थिरतर प्रतिष्ठिते ष्वित्यर्थः। यमदग्निः। देवता प्रतिमां दृष्ट्वा यतिं दृष्ट्वाप्य दंडिनं। नमस्कारं न कु
र्यात् यः प्रायश्चित्ती भवेत् द्विजः। प्रायश्चित्ती सन् इष्यते। कालिकापुराणं। दिग्विभागे तु कौबेरी दिक् शिवाप्रीतिदायिनी तस्मा
त्तन्मुख आसीनः पूजयेच्चंडिकां सदा। कौबेरी उत्तरा दिक् तन्मुख उत्तरमुखः। त्रिपुरासारसमुच्चये। स्नात्वा यथाविधि विधौ
त कराननतां घ्रिं राचम्य सम्यगमनास्त्वर यत्नसूत्रः प्रागानने ऽथ धनदं दिशि वदनो ऽथ वापि वद्धासनो गणपतिं च गुरुं च नत्वा। इत्ये
कवाक्यत्वात् प्रागास्यतापि। देवीप्रतिमोपक्रमे मात्स्यपुराणं सिंदूरं नाम चूर्णं च तामां शिरसि पातयेत् स्मृतिः मधुमुस्तांघृ
तं गंधो गुग्गुलुगुरुशैलजं। सरलं सिह्लकं सिद्धार्थं दशांगो धूप इष्यते। दशांगो दशघटितः शैलजं स्वनामख्यातं सिह्लकमिति
शिलेति ख्यातं सिद्धार्थं श्वेतसर्षपः। तुरुष्कं ग्रंथि कर्पूरं नागरागुरुकुंकुमैः। मुरामांसी सिता मिश्रं धूपं दद्यान्मधुप्लुतं। तुर
ष्कं शिह्लकं। ग्रंथि गोठियानीति ख्याता। सिता शर्करा। नागरा शुंठी। भविष्ये। वलिहीनेन तु उर्मिसंग्रंथहीनेन वभाग्यतां। धूप

७०

तिथि०)

ते

हीने तथोद्वेगं वस्त्रहीने धनक्षयं। आपुयादिति शेषः। कालिकापुराणे। लांगलं क्रमुकं दत्वा रुचकं करमर्द्दकं सौभाग्य
मतुलं प्राप्य देवीलोके महीयते। परमान्नं पिष्टकं च यावकं कृसरं तथा। मोदकं पृथुकादीनि कंडुपक्वानि चोत्सृजेत्। हविः
शाल्योदनं दिव्यं माज्ययुक्तं सशर्करं निवेदयेन्महादेव्यै सर्वाणि व्यंजनानि च। क्षीरादीन्यथ गव्यानि माहिषाणि च सर्वशः
लांगलं नारिकेलं क्रमुकं गुवाकं रुचकं बीजपूरकं करमर्द्दकं पारापामलकं। कंडुपक्वं जलोपसेकं विना केवलपात्रे व
ह्निनापक्वं भृष्टतंडुलादि। कंडुपक्वानि तैलेन पायसं दधिसक्तवः। द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि। इति कूर्म
पुराणवचनात्। शूद्रकर्तृक कंडुपक्वादीनि देयानि शूद्रेतरकृतान्यपि। गोकुले कुंदुशालायां तैलयंत्रेक्षुयंत्रयोः अमी
मांस्यानि शौचानि स्त्रीषु बालातुरेषु च। इति शातातपवचने अमीमांस्यानि शौचाशौचमार्गितया न विचारणीयानि इति मदन
देवभट्टरत्नाकरयोर्व्याख्यानदर्शनात् क्वचिद्व्यवहरंति च। एवं च गंगा वाल्यां नैवर्णिकेन सिद्धान्नेन नैवेद्यं शूद्रेण द्विज

वाक्य

२१

शुश्रूषारतेन च। तदुक्तं वाराहपुराणे। त्रिषु वर्णेषु कर्तव्यं पाकभोजनमेव च। शुश्रूषामपि पक्वानां शूद्राणां च वरानने। तत्र चानुवर्णे पाककरणं कलौ न तु परं। ब्राह्मणादिषु सर्वस्य पक्वान्नादिक्रियापि च। इत्यभिधाय एतानि लोकगुप्त्यर्थे कलेरादौ महात्मभिः। निवर्तितानि कर्माणि व्यवस्थापूर्वकं बुधैः। समयश्चापि साधूनां प्रमाणं वेदवद्भवेत्। इत्यधिकरणमालाकृन्माधवाचार्यधृतादित्यपुराणवचनात्। ततश्च शूद्रकर्तृकवृषोत्सर्गादौ ब्राह्मणकर्तृकचरुवत् ब्राह्मणद्वारा पक्वान्नेन नैवेद्यानि शूद्रो दातुमर्हति। एवं च आमं शूद्रस्य पक्वान्नं पक्वमुच्छिष्टमुच्यते। इति स्वयं पाकविषयं श्राद्धप्रकरणे पठितत्वात्। योगिनीतंत्रे। शिवागारे झल्लकं च सूर्यागारे च शंखकं दुर्गागारे वंशिवाद्यं माधुरीं च न वादयेत्। झल्लकं कांस्यनिर्मितकरतालं। मात्स्यपुराणे। गीतवादित्रनिर्घोषं देवस्याग्रे च कारयेत्। घंटा भवेदशक्तश्चेत् सर्ववाद्यमयी यतः। विरिंचेश्च गृहे टंकां घंटां लक्ष्मीगृहे त्यजेत्। बिल्वपत्रं च माध्यं च तमालामलकीदलं। कल्हारं तुलसी

७२

तिथि०

चैव पञ्चमं च मुनिपुष्पकं । एतत् पर्य्युषितं नस्यादस्य ज्ञात्वा कालिकात्मकं । माघ्यं कुंदं च मुनिपुष्पं वकपुष्पं । पुरापवृक्षा
परकीयकार्य्ये वेतनं स गृह्णन् तत्कार्य्यं कुर्वन् फलमाप्नोति । अभिरूपेण संपन्नान् घटयित्वा भृतिं विना । धर्म्मकार्य्यमिति
ज्ञात्वा न गृह्णाति कदाचन । योसौ सुवर्णकारश्च दरिद्रोप्यति सत्ववान् । न मुल्यमादाद् वेश्यातः स भार्य्याकृद्धिसंयुतः ।
सप्तद्वीपपतिर्जातः सूर्य्यायुतसमप्रभः इति ब्रह्मपुराणे नीलावतीवेश्यायाः लवणाचलहेमतरु घटकस्य तथाविध
फलदर्शनात् । कालिकापुराणे । महिषं तु ददद् देव्यै भैरव्यै भैरवाय वा । अनेनैव तु मंत्रेण तदा तं पूजयेद्बलिं । यथा वाहं
भवान् द्वेष्टि यथा वहसि चंडिकां । तथा मम रिपून् हिंस शुभं वह लुलापक । वाहोऽश्वः लुलापका महिषः । यमस्य वा
हनं खं तु वररूपधराव्यय । आयुर्वित्तं यशो देहि कात्यायन नमोस्तु ते । प्रभूतबलिदाने तु द्वौ वा त्रीन् वाग्रतः कृतान् पू
जयेत् प्रमुखान् कृत्वा सर्वान्मंत्रेण साधकः । बलिदानप्रकारं तत्रैव भगवानुवाच । स्नापयित्वा बलिं तत्र पुष्पचंदनवंदनैः

७२

पूजयेत् साधको देवीं मूलमंत्रै गुरु गुरुः। उत्तराभिमुखो भूत्वा बलिं पूर्वमुखं तथा। निरीक्ष्य साधकः पश्चादिमं मंत्रमुदी
रयेत्। नराख्यं बलिरूपेण मम भाग्यादुपस्थितः। प्रणमामि ततः सर्वरूपिणं बलिरूपिणं। चंडिकाप्रीतिदानेन दातुरा
पद्विनाशिने। चामुंडा बलिरूपाय बले तुभ्यं नमो नमः। यज्ञार्थे पशवः सृष्टाः स्वयमेव स्वयंभुवा। अतस्त्वां घातयिष्या
मि तस्माद्यज्ञे वधोऽवधः। ऐं ह्रीं श्रीमिति मंत्रेण तं बलिं मत्स्वरूपिणं। चिंतयित्वान्यसेत् पुष्पं मूर्द्धि तस्य तु भैरवात
तो देवीं समुद्दिश्य काममुद्दिश्य चात्मनः। अभिषिच्य बलिं पश्चात्करवालं तु पूजयेत्। रसना त्वं चंडिकायाः सुरभो
गप्रसाधकः। आं ह्रीं फडिति मंत्रेण ध्यात्वा खड्गं च पूजयेत्। मत्स्वरूपिणं शिवस्वरूपिणं। अभिषिच्य घातासिलाप
जलेनेति शेषः। ध्यानं तत्रैव कृष्णं पिनाकधारिणं च कालरात्रिस्वरूपिणं उग्रं रक्तास्यनयनं रक्तमाल्यानुलेपनं। रक्तां
बरधरं चैव पाशहस्तं कुटुंबिनं। पिबमानं च रुधिरं भुंजानं क्रव्यसंहतिं। असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः।

७२

तिथि०

श्रीगर्भो विजयश्चैव धर्मपालनमोऽस्तु ते । इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा । नक्षत्रं कृत्तिका तुभ्यं गुरुर्देवो महे-
श्वरः । हिरण्यं च शरीरं ते धाता देवो जनार्दनः । पिता पितामहश्चैव त्वं मां पालय सर्वदा । नीलजीमूतसंकाशस्तीक्ष्ण-
दंष्ट्रः कृशोदरः । भावशुद्धो ऽमर्षश्च अतितेजास्तथैव च । इयं येन धृता क्षोणी हतश्च महिषासुरः । तीक्ष्णधारा-
य शुद्धाय तस्मै खड्गाय ते नमः ॥ इत्यादिना पूजयित्वा ततः खड्गं ओं क्लीं फडिति मन्त्रकैः । गृहीत्वा विमलं खड्गं छे-
दयेद्बलिमुत्तमं । ॐ ऐं ह्रीं श्रीं कौशिकीति रुधिरेणाप्यायतामिति । वामे निवेदयेद्रक्तं शिरश्च सप्रदीपकं एवं
दत्वा बलिं पूर्णं फलं प्राप्नोति साधकः । हीनं तु स्याद्धीनतायां निष्फलं स्याद्विपर्ययात् । अन्येषां महिषादीनां बली-
नामथ पूजनात् । कामान् मे ध्याय साप्नोति रक्तं गृह्णाति वै शिवा । अन्येभ्योऽपि च देवेभ्यो यदा यद्यत् प्रदीयते । तद्द्वि-
नं प्रदद्यात्तु पूजिताय सुराय वै । बलिदाने च दुर्गायाः सर्वत्रायं विधिः स्मृतः । तथाच्छेदयेत्तेन खड्गेन बलिं पूर्वोक्तं

७२

शुभं। अथ वोत्तरवक्तं तं स्वयं पूर्वमुखस्तथा। अत्र सर्वत्रायं विधिः स्मृत इत्यतिदेशात् नरेत्यत्र छागादिरूपः मंत्रे घातयि
ष्यामीति श्रुतेः पशुघातश्च कर्त्तव्यो गवलाजस्तथेति विधेश्च देव्यै घातयिष्य इति प्रयोगः कर्त्तव्यः। अत्र सेकर्तृकत्वेन ने
पि घातिप्रयोगश्चरादौ हत्यर्थोऽस्तीति पाठात्। एवं च पश्चादपि रुधिरशीर्षबलिदानमुपपद्यते अन्यथा विनियुक्तविनि
योगापत्तेः। एतत् प्रकारबलिदानादेव महिषं तु दद्द्यै इत्युपपद्यते। वक्ष्यमाणभविष्यपुराणेपि वधानंतरं मां
सादिदानमुक्तं। अत एव दुर्गाभक्तितरंगिण्यां कृत्यमहार्णवधृतेन देवीपुराणेन पशुघातबलिदानयोः पृथक्फल
मभिहितं। यथा देवीं ध्यात्वा पूजयित्वा चाष्टरात्रे वृषीमुखे। घातयंति पशून् भक्त्या ते भवंति महाबलाः। बलिं ये च प्रयच्छं
ति सर्वभूतविनाशने। ते यांतु तुष्यते देवी यावत्कल्पं तु शांकरं। सर्वभूतानि विहितमहिषादीनि विनाश्यंते यस्मिन्वलौ
चर्मणि द्वीपिनं हंतीत्यादिवत् छागादौ पशुपदप्रयोगमात्रे यजुःपार्श्वैः। इष्टो वा यदि वा मेषश्छागो वा यदि वा हयः पशु
स्थाने नियुक्तानां पशुशब्दोऽभिधीयते। कालिकापुराणे। शोणितं मंत्रपूतं च शीर्षं पीयूषमुच्यते। तस्मात्तु पूजने द[illegible]ा बुधैः

७२

तिथि०)

शीर्षेच शोणितं। मत्फलैः स्तोयसंयुक्तैः शर्करामधुसैंधवैः। अमुष्य रुधिरं दद्यात् कामवीजेन भैरव। ततोवलीनां रुधि
रं तोयसैंधवमत्फलैः मधुभिः पुष्पगंधैश्च अधिवास्य प्रयत्नतः। इत्यादिवचनात् मधुसैंधवकृत्वा दद्यात्। तथा पू
जासु नाममांसानि दद्याद्वै साधकः क्वचित्। कृते तु शोणितं शीर्षं समृतं तनुजायते। अत्र वहुपशुघातेपि एकवच
नांत एवमंत्रः प्रयोज्यः न वहुवचनोहः कार्य्यः। नहि पंचत्वमागतमित्यत्र नार्य्यालिंगोहाभाववत्। अत एव वहुप
त्नीकयजमानप्रयोगेपि पत्नी सन्नह्येति मंत्र एकवचनांत एवेत्युक्तमिति श्रीदत्तोपाध्यायेन दृष्टांतीकृतं। ऊहं प्रकृ
त्यनप्रकृताव पूर्वत्वादिति कात्यायनसूत्रे सोह प्रतिषेधात् विकृतावेवोहः अपूर्वात् प्रेक्षणामूह इतितल्लक्षणा
त्। नवा मंत्रस्य वाधः वैभक्तिकार्थापेक्षया प्राथमिकत्वेन वलवतः प्राथमिकार्थस्य समवेतत्वेन विनियोज्यत्वात्। अ
त एव पशुघात पूर्वक रक्तशीर्षयोर्वलित्वं। पशुघात पूर्वक रक्तशीर्षे वलिदानानंतरं। एवं दत्वा वलिं पूर्णफल

75

माप्नोति साधक इत्युक्तेः। नानापाशुकमज्जमांसरुधिरैः कृत्वान्नवम्यां बलिमिति राजमार्त्तण्डाच्च। एवं च प्रकृतौ नररू
पबहुबलौ बहुवचनोहाभावेन छागादौ विकृतिभूतेपि न बहुवचनोहः किंत्वेकवचनमात्रं। एवं प्रतिनिधिपुत्रा
दिना क्रियमाणे कर्म्मणि तथा ममरिपूत् हिंसा शुभं बहुलाभक इत्याद्युक्तफलं यजमान एवाप्नोति। यां वै कांचन
ऋत्विज आशिषमाशासते यजमानस्यैव तामाशासत इति होवाचेति श्रुतेः। ऋत्विग्वादे नियुक्तस्य समौ संपरि
कीर्तितौ। यत्ते स्वाम्याप्नुयात् पुण्यं पहानिं वादेऽथवा तयमिति बृहस्पतिवचनाच्च। एवं चायांतु नः पितर इति वद
त्राप्यनूह एव। वाक्ये तु काल्पनिके यजमाननाम्नोल्लेख इति। भविष्ये अजानां महिषाणां च मेषाणां च तथा वधा
त्। प्रीणाये द्विविधं दुर्गा मांसशोणिततर्पणैः दुर्गायाः दर्शनं पुण्यं दर्शनादपि वंदनं। वंदनात् स्पर्शनं श्रेष्ठं स्पर्श
नादपि पूजनं पूजनात् स्नपनं श्रेष्ठं स्नपनात्तर्पणं स्मृतं। तर्पणान्मांसदानं तु महिषाजनिपातनं। महिषोऽजो वा

७४

तिथिं

निपात्यते यस्मिन् मांसदाने चर्म्मणा द्वीपिनं हंतीति वृत्तथा। मांसं आमं शीर्षे तदितरत् पक्वमित्युक्त वचनात्। तथा स्व
मेकमेकं वरदा तृप्ता भवति चंडिका। रुधिरेणा रणास्यैव तर्पिता विधिवन्नृप। अजस्य दश वर्षाणि रुधिरेणासुत र्पि
ता। महिषेणा शतं वीर तृप्ता भवति चँडिका। सहस्रं तृप्ति मायाति सुस्नैव रुधिरेणा तु। तर्पिता विधिवद्दुर्गा भित्वा वाहू
रुणं चके। मांसेरपि तथा प्रीति रुधिरे यस्य यावती कृष्णसारा मृतेस्वा तुगं तथा मत्स्य च रोहितं कृष्णसारस्य मांसेन
तथा स्वातुत्तेन चंडिका वर्षे पंच शतान्येव तृप्ति मा प्नोति केवलां रोहितस्य तु मत्स्य मांसेवो घीनसस्य च तृप्ति मा प्नो
ति वर्षाणां शतानि त्रिणी मत् प्रिया। नारेणा शिरसा वीर पूजिता विधिवन्नृप। तृप्ता भृशं भवे दुर्गा वर्षाणां लक्षमेव च
स्वमेकं वा सरं। उरणस्य मेषस्य। तथा प्रदाने कृष्णसारस्य मंत्रोयं परिकीर्त्तितः। कृष्णसार ब्रह्म मूर्त्ते ब्रह्मतेजोविव
र्द्धन। चतुर्वेदमय प्राज्ञ प्रशांरेहि यशो महत्। तथा वैष्णवी तंत्र कल्पोक्त क्रमः सर्व्वत्र सर्व्वदा। साधके र्बलिदानेषु ग्राह्यः

75

सर्वसुरस्पृहः। एवं च चंडिकेऽत्र यष्टिके स्पृहः। ततश्चाभिमतफलकामः पशुघातनं कुर्य्यात् ततोऽमुकस्य दशव
र्षोवच्छिन्न दुर्गाप्रीतिकामनया क्रीं दुर्गायै एष रुधिरबलिर्नम इत्युत्सृजेत्। तथा शिरसि ज्वलत्कुशं दत्वाऽमुकस्य
श्रीदुर्गादर्शनाभिवंदनस्पर्शनाभिपूजनस्नपनतर्पणजनितपूर्वपूर्वाधिकपुण्यप्राप्तिकामनया क्रीं दुर्गायै एष छा
गशीर्षबलिर्नमः इत्युत्सृजेत्। बलिदानप्रदानार्थं नमस्कारः कृतो यत इति छंदोगपरिशिष्टात् प्रदीयते। नेनेति

७५

प्रदानं मंत्रः। कालिकापुराणं। महामाये जगन्नाथे सर्वकामप्रदायिनि। ददामि देहरुधिरं प्रसीद वरदा भव। इत्युक्त्वा
मूलमंत्रेण नतिपूर्वं विचक्षणः स्वगात्ररुधिरं दद्यात्मानवः सिद्धसन्निभः। तथा स्त्रियै न दद्यात्तु बलिं दत्वा नरकमाप्नुया
त्। न चैत्रे मासिकान्यूनं पशुं दद्याच्छिवा बलिं। न चैत्रे पक्षिकान्यूनं प्रदद्याच्च पतत्रिणं। काणाव्यंगादिदुष्टं वै न पशुं न पत
त्रिणं। छिन्नलांगूलकर्णादिं भग्नशृंगादिकं तथा कुष्मांडमिक्षुदंडं च मद्यमासव एव च एते बलिसमा ज्ञेयास्तृप्तौ छागसमाः

तिथि०

स्मृताः । चंद्रहासेन कट्टारैश्छेदनं मुख्यमिष्यते । मात्स्यसूक्ते । छेदयेत्तीक्ष्णखड्गेन प्रहारेणासकृद्बुधः । याज्ञवल्क्यदीप
कलिकायां ब्रह्मपुराणे । नराश्वमेधौ मद्यं च कलौ वर्ज्यौ द्विजातिभिः । मद्यनिषेधं स्पष्टयत्युशना । मद्यमदेयमपेयमग्राह्य
मिति । अग्राह्यमस्वीकार्यमिति कल्पतरुः । कालिकापुराणेपि । स्वगात्ररुधिरं दत्वा आत्महत्यामवाप्नुयात् । मद्यं द
त्वा ब्राह्मणास्तु ब्राह्मण्यादेव हीयते । न कृष्णसारमितरे बलिं तु क्षत्रियादयः । ददतः कृष्णसारं तु ब्रह्महत्यामवाप्नुयुः ।
स्मृतिः । ताम्रे इक्षुरसो मद्यं पयसा यवचूर्णकं । गव्यं च ताम्रपात्रस्थं मद्यतुल्यं घृतं विना । अतो मद्यप्रतिनिधिदानमपि
न युक्तं ॥१०॥ अथ वैधविचारः ॥ मा हिंस्यात् सर्वा भूतानीत्यत्र सर्वशब्दस्य सामान्यार्थतया एतद्विधिमनुल्लंघ्य वाक्यं ।
श्वेतं छागमालभेतेत्यादिविधिविषयप्राप्तेरन्यावैधातिरिक्तविषयत्वं । सर्वा इति सर्वाशी छंदसि वेत्यनेन तातपदं सि
द्धं यदपि नानादर्शनटीकाकृद्भिर्वाचस्पतिमिश्रैस्तत्वकौमुद्यामभिहितं न च मा हिंस्यादित्यादि सामान्यशास्त्रं विशेषशा

76

रेणाग्नीषोमीयं पशुमालभेतेत्यनेन बाध्यत इति वाच्यं विरोधाभावात् विरोधे हि बलीयसा दुर्बलं बाध्यते न चात्रास्ति
विरोधः भिन्नविषयत्वात् तथाहि मा हिंस्यादिति निषेधेन हिंसाया अनर्थहेतुभावो ज्ञाप्यते न पुनरक्रत्वर्थत्वं न चानर्थ
हेतुत्वक्रतूपकारकत्वयोः कश्चिदस्ति विरोधः हिंसा हि पुरुषस्य दोषमावहति क्रतोश्चोपकरिष्यतीत्येतेन तदपि सां
ख्यनये मीमांसकनये तु विरोध एव । तथाहि गुरुनये न खलु सर्वभूतहिंसाभावविषयकं कार्यमिति निषेधविध्यर्थस्य वा
धं विनाग्नीषोमीयपश्वालंभनविषयकं कार्यमिति भावविध्यर्थ उपपद्यते । भट्टनये तु अंगे यथा तथास्तु न च मुख्यप
शुयागे पुरुषार्थे पशुहिंसनर्थस्यार्थसाधनत्वमनर्थसाधनत्वं चोपपद्यते विरोधात् वस्तुतस्तु अंगेपि विरोधोऽस्त्ये
व कुतो विधेरेष स्वभावो यत् स्वविषयस्य साक्षात् परंपरया वा पुरुषार्थसाधनत्वमवगमयति अन्यथांऽगीनां प्रधा
नोपकारकत्वमपि नांगीक्रियते । अर्थसाधनत्वे बलवदनिष्टाननुबंधीष्टसाधनत्वे अनर्थसाधनत्वे बलवदनिष्टसाध

७६

तिपि० ३

नत्वं। नचानयोरेकत्र समावेशः। अतएवोक्तं। तस्मात्स्यात्ते वधो/ वध इति। नन्वेवं श्येनेनाभिचरन् यजेतेत्यत्र श्येनस्य शत्रु
वधरूपेष्ट साधनत्वमवगतं। अभिचारो मूलकर्म चेति मनुनाउपपातकगणमध्ये पाठादनिष्ट साधनत्वमवगतं तदे
तत् कथमुपपद्यतामिति चेन्न आततायिन मायांतं हन्यादेवाविचारयन् नित्यिक वाक्यतया आततायिस्थले इष्टसाध
नत्वं अनाततायिस्थले उपपातकत्वेन बलवदनिष्ट साधनत्वमित्यविरोध इति गुरुचरणा अप्येवं। देवीपुराणं पूर्वो
दाहृता युताष्टम्यामित्यत्र पूर्वोदाहृतायाः स्पष्टाभिधानात्। कन्यासंस्थे रवावीशे शुक्लाष्टम्यां प्रपूजयेत्। सोपवासो नि
शार्द्धेतु महाविभवविस्तरैः। पूजां समारभेद्व्यानक्षत्रे वारुणोपि वा। पशुघातश्च कर्त्तव्यो गवलाजवधस्तथा। इति
पुनर्देवीपुराणे वारुणादेवतां जलं पुनरणाप्रत्ययेन तद्देवतपूर्वोदाहृतोच्यते। ननु श्रीदत्तहरिनाथविद्यापतिवाचस्पति
मिश्रोक्ताशातभिषातदष्टम्यांतस्या असंभवात्। तथात्वे तदनंतरपौर्णमास्यां गोभिलोक्तसूर्य्याचंद्रमसोः सप्तमराश्यव

स्नाननियमभंगापत्तेः। तथा च गोभिलः। सूर्य्याचंद्रमसोर्योः परो विप्रकर्षः सा पौर्णमासीति। कृत्यचिंतामणौ नष्टे चैवा
दर्शोपि वेत्यत्र पुनर्देवीपुराणे रक्तदर्शे वारिमेपि वेति पाठः। व्याख्यातं च हेमाद्रिणा रक्तदर्शे मूलान्नक्षत्रे वारिमे पूर्वाषा
ढानक्षत्र इति सोपवासः प्रारब्धोपवासः। उक्तवचने अष्टम्यां पशुघातश्रुतेः। अष्टम्यां रुधिरैर्मांसैर्महामांसैः सुगंधि
भिः। पूजयेद्बहुजातीयैर्बलिभिर्भोजयेच्छिवामिति कालिकापुराणाच्च अष्टम्यां बलिदानेन पुत्रनाशो भवेद्ध्रुवमिति देवी
पुराणीयं तत्संधिपूजाबलिदानपरं। तत् पूजाया उभयतिथिकर्तव्यत्वेन तद्बलिदानस्य नवम्यां सावकाशत्वात्। तत्
पूजाविधायकं तु कालिकापुराणं। अष्टमीनवमीसंध्यौ तृतीया खलु कथ्यते। तत्र पूज्या त्वहं पुत्र योगिनीगणसंयुता। ज्यो
तिषे अष्टम्यां संधियोगे सकलपरिजनैः पूजयेत् सत्वभावैः। कामरूपीयनिबंधे स्मृतिसागरसारे च। अष्टम्याः शेषदंडश्च
नवम्याः पूर्व एव च। अत्र या क्रियते पूजा विज्ञेया सा महाफला। मात्स्यसूक्तेपि। अष्टमीनवमीयोगो रात्रियोगे प्रशस्यते। अर्द्ध

अर्द्धरात्रे दशगुणं संध्यायां द्विगुणं भवेत्। आश्विनाधिकारे अष्टम्यां नवमीयुक्तां नवम्यां चाष्टमीं तथा अर्द्धनारीश्वरप्रा
याउमामाहेश्वरी तिथिरिति विष्णुधर्मोत्तरीयमप्येतद्विषयं न तु महानवमीपूजापरं। तस्यां अष्टम्युपवासपरदिने वि
धानेन सप्तमीवद्युग्मानादरणात्। तथा च विष्णुधर्मोत्तरं। भद्रकालीपटे कृत्वा तत्र सं पूजयेद्द्विजः आश्विने शुक्लपक्ष
स्य चाष्टम्यां प्रयतः स्नातः इत्यभिधाय उपोषितो द्वितीये ह्नि पूजयेत् पुनरेव तां। तत्र तदर्थे कल्पिते गृहे पट इति पूजा
धारोपलक्षणं कृत्यतत्वार्णवे राजमार्त्तण्डः मूलेन प्रतिपूजयेद्भगवतीं चण्डीं प्रचण्डाकृतिं चाष्टम्यामुपवाससंयतधि
या भक्त्या समाराध्य च। नानापाशुकमजमांसरुधिरैः कृत्वा नवम्यां बलिं नक्षत्रं श्रवणं तिथिं च दशमीं संप्राप्य संप्रेषयेत्
।धियेत्यत्र नयेत्यत्र कात्यायनीये पाठः। दुर्गाभक्तितरंगिण्यां मूलं प्राप्य प्रथमचरणोऽप्यर्द्धेनं चण्डिकायाः कृत्वाष्टम्यामश
नरहितस्य कृतनिद्रस्य पूजां। प्रातःकाले पशुबलिविधिः स्नानदानं नवम्यां निर्माल्यं च श्रवणादशमीश्यामकर्मेषु जत्यात्

78

नंदिकेश्वरपुराणे। भगवत्याः प्रवेशादि विसर्गान्ताश्च याः क्रियाः। तिथावुदयगामिन्यां सर्वास्ताः कारयेद्बुधः। तथा च
कृतारायर्णं क्रियायोगोपसंवादे। शारत्काले महापूजा क्रियते या च वार्षिकी सा कार्योदयगामिन्यां न तत्र तिथियुग्म
ता। एतद्वचनं दुर्गाभक्तिप्रकाशे पुराणीयमिति कृत्वा लिखितं। सर्वत्र प्रातःकालव्यापिनी घटिकातिथिर्यास्या अत्रो
दयकालीनतिथौ सम्यक्पूजनासामर्थ्ये कालिकापुराणे सम्यक्कल्पोदितां पूजां यदि कर्तुं न शक्यते उपचारांस्तथा दा
तुं पंचैतान् वितरेत्तदा। गंधं पुष्पं च धूपं च दीपं नैवेद्यमेव च। अभावे पुष्पतोयाभ्यां तदभावे तु भक्तितः। संक्षेपपू
जा कथिता तथा वस्त्रादिकं पुनः। नवम्यां बलेरावश्यकत्वाद्बलिदानं च। इति। दक्षिणात्यकालनिर्णयधृतभविष्योत्तरी
ये अष्टमीनवमी पूजापि दिनभेदाय प्रातः प्रातरिति वीप्साश्रुतेः। यथा प्रातरावाहयेद्देवीं प्रातरेव प्रवेशयेत् प्रातः
प्रातश्च संपूज्य प्रातरेव विसर्जयेत्। एतानि सप्तम्यादिकल्पविधायकानि। अत्र प्रातः पदं पूर्वाह्णपरं पूर्वाह्णे नवप

७८

तिथिं)

त्रिकाशुभकरीति प्रागुक्तैकवाक्यत्वात् अत एव व्यासः वेदार्थोयः स्वयं ज्ञातस्तत्र ज्ञानं भवेद्यदि । क्वचिन्निश्रितेनत्र का
शंकास्यात्तन्निश्चितं । तिथिक्षयादेव क्वचिन्नतथा । यथा भविष्ये तृतीयप्रपूजयेद्देवीं सप्तम्यादिदिनत्रये । द्वाभ्यां चतुरहोर्वा मि२
ह्रासवृद्धिवशात्तिथेः । नवास्य अष्टाहे विसृजेच्छक्रं तदर्द्धे न तु पार्वतीं । न्यूनाधिकेन कर्तव्यं राज्ञा राष्ट्रं धनक्षयादिति लिं
गपुराणीयेन विरोध इति वाच्यं पूर्ववचने प्रपूजयेदित्युक्तत्वात् पूजानुरोधेन न्यूनाधिकदिनस्थिति प्रतिपादनात् पर
वचनस्य तु विसृजेदित्युक्तत्वात् विसर्जन एव ग्रह पूजने कृतेपि नवमीयुक्तदशम्यां श्रवणानुरोधेन न्यूनत्वप्रसक्तौ यत्र
वा नवमी षष्टिदंडात्मिका परदिने नवमी च तत्परदिने दशमी तत्रोदयानुरोधादधिकत्वप्रसक्तौ च निषेधकत्वात् तान
तु सप्तम्याः षष्टिदंडत्वेन परदिनवृद्धावपि पूर्वदिने निषेधः । आदित्योदयवेलायां आरभ्य षष्टिनाडिका । तिथिस्तु सा
हि शुद्धा स्यात् सार्वतिथ्यो ह्ययं विधिरिति कालमाधवीय धृतनारदीयात् सा हि शुद्धा सैव शुद्धानान्येत्यर्थः । अकर्मण्य

७१

तिथिमलमित्युक्तत्वात्। अत एव तत्र तत्र नक्षत्रानुरोधोऽपि नास्ति तस्य गुणत्वेन प्रधानानुयायित्वात् ततश्च सप्तमीपू
जावत् महाष्टम्यादिकृत्यमपि षष्ठिदंडात्मिकायामेव न तु परदिवसीय खंड तिथौ किंतु पूर्वोक्त संध्यनुरोधात् निशा
दाविव खंड तिथावपि संधि पूजेति। एवं च यस्मिन् दिने महाष्टमी पूजा तस्मिन् दिन एवोपवासः न तु संधि पूजन दिने
अष्टमीत्वेनोपवास विधिः पूर्वमुक्तत्वात् अत्रैव पुत्रवतो गृहस्थस्य निषेधः यथा कालिकापुराणे उपवासं महाष्ट
म्यां पुत्रवान्न समाचरेत अथेदं पूजांगोपवासातिरिक्तपरं अन्यथा प्रधानस्यानिर्वाहापत्तेरिति केचित् तच्चिंत्यं। य
था तथैव पूजात्मा व्रती देवीं प्रपूजयेदित्युत्तरार्द्धेन पुत्रवत एवोपवासेतरहविष्यादिना पूजात्मनः पूजाविधानात्।
तथा च मात्स्यसूक्तेः। अथ चाश्वयुजे शुक्लपक्षे मासाद्यनंदिकां। समारभ्य ततो दुर्गो हविष्याशी जितेंद्रियः नंदिकोप
ष्टी जितेंद्रियो निवृत्तमैथुनादिः। अत्र पुत्रवतः पूजांग केवल महाष्टमीनिमित्तकोपवास निषेधान्नाष्टमीमात्रे निमि

७९

तिथि०

तकोपवास निषेध इति। वत्सरादावचरणमपि साधुतया संगच्छते। एवं च पूर्णाष्टम्यां महाष्टमी पूजा तत् परदिने ऽ
ष्टमी नवम्योः संधि पूजा तत् परदिने नवमी पूजा उदयगामितिथ्यनुरोधात् तेन् परदिने दशम्यां विसर्जनं। पूजानुरो
धेनाधिकदिनलाभात् महानवमी पूजा कल्पमाह भविष्यपुराणं। लब्ध्वाभिषेका वरदा शुक्ले चाश्वयुजस्य च। तस्मात्सो
त्र संपूज्या नवम्यां चंडिका बुधैः। केवलाष्टमी केवल नवमी कल्पावाह कालिकापुराणं। यस्त्वेकस्यां महाष्टम्यां नव
म्यां वाथ साधकः पूजयेद्वरदां देवीं सर्वकामसमृद्धये। सर्वत्र घटिकाव्यापिनी तिथिर्ग्राह्या। व्रतोपवासस्नानादौ घ
टिकैका यदा भवेत् तामेव तिथिमासाद्य कुर्यात्कर्माण्यतंद्रितः इति व्यासोक्त नियमश्रुतेः। एवं च घटिकोन दशम्या
मपराजिता पूजा नर्हत्वात् तत् पूजनं पूर्वदिने। अत एव तत् परमेवेदं वचनं। आश्विने शुक्लपक्षस्य दशम्यां पूजये
त्तथा। एकादश्यां न कुर्वीत पूजनं चापराजितामिति शिवरहस्यैकादशीयुक्त दशमी निषेधक वचनं। ततश्च तत् पूर्व

४०

कार्यं विसर्जनमपि तद्देवनन्दनापकर्षन्यायात् तावत् स्यादिति मिश्रा प्येवं । घटिकापदं मुहूर्त्तपरं घटिकैकात्वमावास्या
प्रतिपत्सु न्वेतदा । सर्वेतदापरं दानं दैवे कर्मणि चोदितं । मुहूर्त्तमप्यमावस्या प्रतिपत्सु यदा भवेत् तद्दानमुक्तमं दैवं
शेषं पूर्वेहि पूर्ववत् इति राजमार्त्तण्ड धृत यावाल वचनयो घटिकामुहूर्त्तयोरैक्यात् । शेषं तिथ्यन्तरे पूर्वे पूर्वोक्तं घटि
कान्यूनं पूर्ववदापरं । घटिकाधिकं चोत्तमं । एवं च यदा तिथिक्षयवशात् षष्ठीयुतसप्तम्यां प्रवेशनं नवमीयुक्तदशम्यां
विसर्जनं तदा चरलग्नाप्राप्तौ पूर्वोक्तनवपत्रिकेत्यादि मिश्रिवशे यतो विहितस्य दैवकर्मत्वेन शुक्लपक्षस्य पूर्वोक्तस्यावाधा
य वृश्चिक एव चरांशे तदुभयं कार्य्यं । चरलग्ने चरांशे वा देव्या नियतमानसः । प्रतिसंवत्सरं कुर्य्यात् स्थापनं च विसर्ज
नं । इति देवीपुराणात् । राज्ञो विनाशमिच्छेत्तु स्थिरलग्ने पितानि वेति निंदा तु चरांशेतरपरा चरलग्नासंभवपरा वा । अ
शक्त्या धनुरादौ कार्य्यं प्रागुक्तेन पत्रीप्रवेशनमित्यनेन रात्रिपर्य्युदासात् दिनत्वेन तस्यापि प्राप्तेः । मध्याह्ने तत्र पीडन

४०

तिथि०

क्षयकरीति निंदापि रात्रीतरत्वेन रोहिणी पूर्वे कुतप प्रभृतिषु आपराह्णिक श्राद्धसत्वेपि रोहिणीं तु न लंघयेदिति
वद् प्राशस्त्यपरा। अष्टम्युपवासफलंच देवीपुराणे। एकादशी कोटि सहस्रतुल्या ऽ सिताष्टमी पर्वतराजपुत्र्याः तमी
पि शुक्ला गुणिता शतेन पराशरव्यासवशिष्ठमुख्यैः। कालमाधवीये निगमः शुक्लपक्षेष्टमी चैव शुक्लपक्षे चतुर्दशी पू
र्वविद्धा न कर्तव्या कर्तव्या परसंयुता। उपवासादिकार्येषु एष धर्मः सनातनः। स्कांदे अष्टमी नवमी मिश्रा कर्तव्या भूति
मिच्छता। अत्र भूतिश्रवणात् पुत्रादेस्तदंतः पाठात् पुत्रकामस्याप्युपवास व्यवहारः। शुक्लपक्षे तथाष्टम्यामुपवासपरा
यणाः मालतीकरवीरेण बिल्वपत्रैश्च पूजयेत् दुर्गेति नामजप्यं च पुरतो ऽष्टशतं नृप। सर्वमंगलनामेति जप्यं च कि
ल भारत। ननु अष्टम्यामुपवासे मांसेन पारणाविधानात्। पितृमरणादावपि तत् प्रसज्येत यथा देवीपुराणे। अष्टमीमु
मुपोष्यैव नवम्यामपरे ऽहनि। मत्स्यमांसोपहारेण दद्यान्नैवेद्यमुत्तमं। तेनैव विधिना तत्तु स्वयं भुंजीत नान्यथा स्त्रिया

भविष्ये ४

४।

श्रूयते त्विह पुरुषाः पुरुषमेधेन यजंते । याश्च स्त्रियो नृपशून् खादयंति । तांश्च तांश्च ते पशव इह निहता यमसादने यात
यंतो रक्षोगणाः सौनिका इव स्वधितिनाऽवदायासृक् पिबंतीति श्रीभागवत पंचमस्कंद गद्येन पशुमांसभक्षणानिंद्या
नतेन पारणां किंतु मांस्येन सौनिकाः प्राणिवधनियुक्ताः स्वधितिना पशुना । तेषां ग्राम्यारण्याभेदमाह पैठीनसिः । ग्राम
रण्याश्चतुर्दश पशवः गौरविरजोऽश्वोऽश्वतरो गर्दभो मनुष्यश्चेति सप्त ग्राम्याः पशवः महिषवानरऋक्षसरीसृपरुरु
पृषत सृगालश्चेति सप्तारण्याः पशव इति अश्वायां गर्दभेन जातोऽश्वतरः एवं च मनुष्यस्यापि पशुत्वात् । अध्ययने गु
रुशिष्ययोरंतरागमनेप्यहोरात्रमनध्यायः पशुमंडूकनकुलश्वाहिमार्जारमूषिकैः । कृतेऽन्तरे त्वहोरात्रं शक्रपाते
तथोच्छ्रये इति याज्ञवल्क्यीयात् । तथाऽनध्यायः उच्छ्रये शक्रध्वजस्यैव अनुज्ञयातु न दोषः । नाग्निब्राह्मणयोरंतरा व्य
पेयात् न गुरुशिष्ययोरनुज्ञयातु व्यपेयादिति मदनपारिजातधृत वशिष्ठवचनात् । उच्यते विधिरत्यंतमप्राप्तौ नियमः

८१

तिथि०

पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते । इति पाक्षिके रागतः पक्षतः प्राप्ते रागाभावात् पक्षतोऽप्राप्तावेव
प्राप्त्यर्थो नियमविधिः । ननु वैधनिषेधेनाप्राप्तेऽपि । प्रायश्चित्तविवेककृतां मतेन तु मात्स्यांकुकामतो गत्वा सोपवासस्त्र्यहं
वसेदिति याज्ञवल्क्याद्युक्तप्रायश्चित्तश्रवणेन कामतो मांसभक्षणस्य निषिद्धस्य प्राणात्यये तथा श्राद्धे प्रोक्षितं द्विजकाम्य
या । देवान् पितॄन् समभ्यर्च्य खादन् मांसं न दुष्यतीति तेनैव प्रतिप्रसूतस्य रविवारादौ निषेध इति सुतरामपृस्युपवासपार
णेऽपि रविवारादौ मांसनिषेधः एवं मांसासनत्यागकृते नियमेन नियोगादिष्वपि मांसं वर्जनीयमात्र प्रायश्चित्तविवेकेऽयम
: । भक्षयेत् प्रोक्षितं मांसं सकृद्ब्राह्मणकाम्यया । दैवे नियुक्तः श्राद्धे वा नियमेन तु विसर्जयेत् पूर्वोक्तवचनस्य मात्स्यमांसोप
हारेण नैवेद्यं दत्त्वैव भोजनं कर्तव्यं न तु वदत्वेत्यर्थात् अन्यथा वाक्यभेदः स्यात् नैवेद्यावशिष्टमांसादेरत्यागापत्तेश्चेति के
चित् । प्रोक्षितं यज्ञार्थे मन्त्रैः संस्कृतं । आरण्यानामिदानीं तत्र प्रोक्षणाद्यपेक्षा नास्ति । यथा महाभारते आरण्याः सर्वदैवत्याः

४२

प्रोक्षिताः सर्वशो मृगाः। अगस्त्येन पुरा राजन् मृगया येन पूज्यते। अत्र प्रमाणांतरा प्राप्तत्वेन पशुना यजेतेत्यादिकत्वस्येव
विधेयविशेषणत्वेन आरण्याः इत्यादिः पुंस्त्वं विवक्षितं। अतएव तद्धरिवंशे अवध्याश्च स्त्रियं प्राहुस्तिर्यग्योनिगतेष्वपि
।ततश्च हरिणादीनामप्रोक्षितत्वमवध्यत्वमित्यपास्तं यत्तु ब्रह्मपुराणे पशोस्तु मांसं मासस्य न मांसं ग्राहयेत् कुचित्
। पृष्ठमांसं गर्भशय्या। शुष्कमांसं तथापि वेति गर्भशय्यानिषेधनं तत्तदरण्यस्थामेध्या यागे बोध्यं गर्भशय्या जरायुरिति तत्त
श्च नियुक्तस्तु यथान्यायं यो मांसं नात्ति मानवः। स प्रेत्य पशुतां याति संभवानेकविंशतिमिति वचनं तत्कालीनानिषिद्ध
मांसभुग्विषयं। प्रेत्येत्यव्ययं परलोक इत्यर्थे। तथा चामरः प्रेत्यामुत्र भवान्तर इति महाभारते रोगार्तो भ्यर्थितो वापि
यो मांसं नात्त्यनोत्नुपः। फलं प्राप्नोत्ययत्नेन सोऽश्वमेधशतस्य च। मांसत्यागोपदेशेपि फलमाह नंदिकेश्वरपुराणो [illegible]
पदेशं कुरुते परस्य तु महात्मनः मांसस्य वर्जनफलं सोऽमांसाद् फलं लभेत्। अतो रविवारादौ मत्स्यमांसाशनं विनाप्यवृ

४२

तिथि०

ष्युपवास पारणा सिद्धिः। स्फटाश्लिष्टस्यायामावाहनं विनैव। रविवारे आमिष निषेधो भविष्ये। आमिषं रक्त शाकं च यो
भुंक्ते च रवेर्दिने। सप्त जन्म भवेत्कुष्ठी दरिद्रश्चोपजायते तस्मात्सर्वे प्रयत्नेन एकभक्तं रवेर्दिने। कुर्यान्नक्तं हविष्यं वारो
गयुक्तोऽन्यथा भवेत्। आचाररत्नाकरे मांसं माषं च मूलं च कांजिकं बिल्वमार्द्रकं। वर्जयेद्रविवारे तु कांस्यपात्रे तु भोजनं
स्त्री तैलं मत्स्य मांसं च यः सेवेद्रविवासरे। संतति सप्त जन्मानि हंति तस्य दिवाकरः। स्मृतिः माष मामिष मांसं च मसूरं नि
म्बपत्रकं। भक्षयेद्यो रवेर्वारे सप्त जन्मन्य पुत्रकः। स्फटाश्लिष्टस्याधिकरणं च स्फटस्य खड्गाकार काष्ठस्य भक्ताश्लेष
निमित्तेऽप्यायामिश्रित्वेन प्रकृतिवद् विकृतिरिति न्यायादति देशेन दर्शात्मक प्रकृति धर्माणां प्राप्तौ पूर्वदिन प्रातः का
लीनं हवनीय देवतावाहनमपि प्राप्तं। तच्च तदानीं न विधीयते नैमित्तिके निमित्त निश्चयवतोऽधिकारित्वात्प्रकृतौ
श्चोभाविभक्ताश्लेषरूपनिमित्त संशयेन प्रधानानधिकारित्वोऽगानधिकारात्। तदुत्तरदिने च निमित्त निश्चये तदधिका
रसिद्धावपि नावाहनानुष्ठानं। आवाहनस्य पूर्वदिन प्रातःकाले नैयत्यादितीष्यायामावाहनं विनैवानुष्ठानमिति। अ

४३

यत्तत्र पूर्वदिने प्रातःकाले नैयत्यादस्तु तथा प्रकृते तु यद्यपि तथात्वाभावाद् वैषम्यं तथापि यथा तदंगवैगुण्यानु वै
गुण्यं तथाऽत्रापि वचनांतरनिषेध्यमांसभोजनपुरुषस्य तदंगवैगुण्यानुवैगुण्यमित्यवैषम्यं। अधिकरणं च विष
यो विषयश्चैव पूर्वपक्षस्तथोत्तरं। निर्णयश्चेति पंचांगं शास्त्रेऽधिकरणं स्मृतं। विषयो विचारार्हं वाक्यं विशयो/स्या
यमर्थो न वेति संशयः पूर्वपक्षः प्रकृतार्थविरोधितर्कोपन्यासः। उत्तरं सिद्धांतानुकूलतर्कोपन्यासः। निर्णयोऽस
त्ता वाक्यार्थतात्पर्यनिश्चयः। एवं क्रमेण विवेचनमत्राधिक्रियते। इत्यधिकरणमिति। कालिकापुराणे क
न्यासंस्थे रवावीशे याशुक्लातिथिरष्टमी। तस्यां रात्रौ पूजितव्या महाविभवविस्तरैः। नवम्यां बलिदानं तु कर्त्तव्यं वैय
थाविधि। जपं होमं च विधिवत् कुर्यात्तत्र विभूतये। अत्र नवम्यां होमः श्रुतेः। पूर्वाषाढायुताष्टम्यां पूजाहोमाद्युपो
षणमिति श्रुतेश्चोभयत्रैकतरस्मिन् वा होमः। अत्र होमे विहिते तदंगत्वात् पूर्णपात्रादिकापृथग् दक्षिणा षट्त्रिंशत्

४३

तिथि०

उपचारान्तर्गतदाने दक्षिणावत् । तथा च मात्स्यसूक्ते देवे दत्वा तु दानानि देवे दद्याच्च दक्षिणां तां सर्वे ब्राह्मणे दद्यादन्य
था निष्फलं भवेत् । दत्वैव पत्र देयानीति वाराहीतन्त्रे पाठः । अनन्तरं च ब्रह्मपुराणे विष्णुस्थानीयपूजने स्पष्टमुक्तं । यथा
सुरान् संपूजयेद्भक्त्या सुमनोभिः सुकुंकुमैः । दीपैर्धूपैर्मनोज्ञैश्च पायसेन च भूरिणा । मात्रयान्नप्रदानैश्च होमैः पुरोपःस
दक्षिणैः । पूजाजपहोममन्त्रस्तु देवीपुराणे । पूजयेत्तिलहोमैश्च दधिक्षीरघृतादिभिः । कुर्याद्द्व्यास्तु मन्त्रेणानेनाभिधा
य । जयंती मंगला काली भद्रकाली कपालिनी दुर्गा शिवा क्षमा धात्री स्वाहा स्वधा नमोऽस्तु ते । अनेनैव तु मंत्रेण पूजाहो
मौ तु कारयेत् । पुरश्चरणकार्ये तु बिल्वपत्रैर्युतैस्तिलैः । साक्षतैः सघृतैर्वापि शिवामुद्दिश्य यत्नतः । गुडूयादननं
वृद्धं संस्कृतं काम वृद्धये । इति कालिकापुराणदर्शनात् अत्रापि बिल्वपत्रघृतयोगितेति । अत्र दुर्गाभक्तितरंगिण्यां
स्वधापूजानंतरं स्वाहापूजाभिधानात् स्वाहान्तपाठनिर्णयो न युक्तः मात्स्यसूक्तविरोधात् । तथा च पंचोपचारैर्विधिव

८५

जयंत्यादि ततः परं । जयंती मंगला काली भद्रकाली कपालिनी दुर्गा शिवा क्षमा धात्री पूजनीया प्रयत्नतः । दक्षप्रोक्ते
तन्त्रे देव्याः स्वाहा चैव स्वधा तथा । सर्वत्रापि तथा पाठक्रमः तथात्वे पंचमाक्षरस्य लघुत्वानुपपत्तेः । दुर्गामाहात्म्ये
/गलायां तथा पाठदर्शनात् प्राचीनग्रंथे तथापाठदर्शनाच्च । पूजायां क्लीमिति चतुरक्षर मध्यात् कालिकापुराणे चतुरक्ष
रमन्त्रेण पाद्यादीनथ षोडश । वितरेदुपचारांश्च पूर्वप्रोक्तांश्च भैरव । तदनंतरं प्रणवादिनमो/न्तेन देवतानाममुच्चारणमाह
ग्नि पुराणे तल्लिंगैः पूजयेन्मन्त्रैः सर्वदेवान्समाहितः । ध्यात्वा प्रणवपूर्वं तु तन्नाम्ना तु समाहितः । नमस्कारेण पुष्पादि विन्य
सेत्तु पृथक् पृथक् । अत्र च तत्रामृष्यां भद्रकाली दक्षयज्ञविनाशिनी आविर्भूता महाघोरा योगिनीकोटिभिः सह । अतो
/त्र पूजनीया सा तस्मिन्नहनि मानवैः । इति ब्रह्मपुराणदर्शनात् । दक्षयज्ञविनाशिन्यै महाघोरायै योगिनीकोटिपरिवृ
तायै भद्रकाल्यै क्लीं दुर्गायै नम इत्यनेनापि पूजा प्रचरति । पूजायां विशेषस्तु दुर्गातत्त्वे/नुसंधेयः होमादावंगलिमाला

८४

तिथि॰ २

दिग्रहणो छंदोगपरिशिष्टं । स्नानक्रियायां युक्तायां मन्त्रोक्ते स्नानकर्त्तरि । स्नानकृद्यजमानःस्याद्विउवामेघनिश्चयः ।
यजमानासन्निधौ तु साधारणांगुलिमानग्रहणं यथा कापिलपंचरात्रे अष्टभिस्तैर्मेवेस्यैष्टं मध्यमं स मभिर्यवैः ।
कन्यसं षड्भिरुद्दिष्टं मंगुलं मुनिसत्तमाः तैः प्रोक्तं स्यान्मानयवैः कन्यसं कनिष्टं । मानं तु पार्श्वेन षड्यवाः पार्श्वे संस्थि
ता इति कात्यायनीय वचनात् । कालिकापुराणे यवानां तंडुलै रेकमंगुलं वाष्टभिर्भवेत् । अदीर्घे योजितैर्हस्ता
श्चतुर्विंशति कांगुलैः । होमे ब्रह्मवरणं प्रथमतः स्योति ष्टोमे ब्रह्मोद्गातृ होत्रध्वर्यु स्यादि दर्शनेनान्यत्राप्याको
क्षायां दृष्टकल्पन्यायानेष्टत्वात् । सुगति सोपान प्रभृतयो प्येवं । तत्तु यजमानकर्तृकं दान वाचनानंतरं भणाव
रणात् ब्रह्मप्रमाणोसु यजमानं प्रतीयादिति कात्यायनोक्तेः ब्रह्मस्थापनं तु होतृ कर्तृकं अग्निमुपसमाधाय द
क्षिणतो ब्रह्मासनमास्तीर्येति कात्यायनेनैक कर्तृ कर्ताभिधानात् छंदोगानां ब्रह्मस्थापन प्रकारमाह गोभि

85

लः । अग्रेणाग्निं परिक्रम्य दक्षिणतोऽग्नेः प्रागग्रान् कुशानास्तीर्य्य तेषां पुरस्तात् प्रत्यङ्मुखस्तिष्ठन् सव्यस्य पाणेरङ्गुष्ठे
नोपकनिष्ठिकयाऽङ्गुल्या ब्रह्मासनात् तृणमभिसंगृह्य दक्षिणापरमभृमदेशे निरस्यति निरस्तः परावसुरिति अप उपस्पृ
श्याथ ब्रह्मासने उपविशत्यर्वावसोः सदने सीदामीत्यग्निमुखो वाग्यतः प्राञ्जलिरास्त आकर्म्मणः पर्य्यवसानाद्दर्शमासेन
यज्ञसंसिद्धिं नाययज्ञियां वाचं वदेत् । यद्ययज्ञियां वाचं वदेद् वैष्णवीमृचं यजुर्वा जपेत् अपि वा नमो विष्णव इति वा ब्रूया
त् । यद्युवा उभयं चिकीर्षेद्धौत्रं ब्रह्मत्वं चेति तेनैव कल्पेन छत्रं वोत्तरासंगः सोदकं कमण्डलुं दर्भवटुं ब्रह्मासने नि
धाय तेनैव प्रत्यावृत्यान्यच्चेष्टेति । अग्रेण पूर्वं याद्दृष्ट्वा प्राग्दक्षिणेनाग्निं गत्वाऽग्नेर्दक्षिणस्यां दिशि प्रागग्रान् कुशा
नास्तीर्य्यान्यच्चेष्टेतेति व्यवहितेन वक्ष्यमाणेन संबन्धः । ननु निरस्यतीत्यनेन ब्रह्मेति नाकर्तृनिर्देशात् । न च ब्रह्मण्यास
नेन संबन्धः उपवेशनात् पूर्वं तत्संबन्धाभावात् । ततश्च दर्शपौर्णमासयाजमानिकं कर्म । ब्रह्मा तेनेषां पुरस्ताद्दा

८५

तिथि०

स्तृत कुशानां पूर्वे दिग्भागे तिष्ठन्ननुपविष्ट एव सव्यस्य वामस्य उपकनिष्ठया / नामिकया आसनाद्यजमानास्तृतासना
त् तृणं कुशपत्रमेकं गृहीत्वा दक्षिणापरं दक्षिणपश्चिम मध्यभागं उभयदिग्मध्यभागं नैर्ऋतकोणमिति यावत्।
निरस्तः परावसुरित्यनेन क्षिपतीति। अप उपस्पृश्य दक्षिणपाणिना जलं स्पृष्ट्वा अनन्तरं आसने ब्रह्मासनत्वेन क
ल्पिते उपविशति आवसोः सदने सीदामीति मन्त्रेणेति। एवमेव भट्टनारायण प्रभृति व्याख्यानात् एतेन तेषां पुरस्ता
दित्यादि आवसोः सदने सीदेत्यन्तं कर्म यजमानकर्तृकं सीदामीति प्रतिवचनं ब्रह्मकर्तृकमिति भवदेवभट्टकल्पनं
कल्पनमेव। सीदेति सूत्रानुपात्तत्वात्। भाष्येण यत्र संसिद्धमिति होत्रान्यथा क्रियमाणे तत्संसिद्ध्यर्थे एतद् देवं कुरु।
एतत् कृत्वैतत् कुर्वित्यादि भाष्येण। तत्रापि अयज्ञियामसंस्कृतां वाचं वदेद्यदि तदा वैष्णवी ऋक् इदं विष्णुरिति यजु
र्विष्णुरराटमसीत्यादि नमो विष्णव इत्यादि प्रकारत्रितयान्यतमप्रकारं प्रायश्चित्तमिति। अत्र ऋग्गादिलक्षणमाह

४६

जैमिनिः। तेषामृगयात्रार्थवशेन पादव्यवस्थितिरिति तेषां मंत्राणां मध्ये यत्रार्थवशेन एकान्वये नानुमृवादि पादस्थि
तिः सा ऋक् यजुराह स एव शेषे यजुः शब्द इति। शेषे ऋक् साम भिन्ने मंत्रजाते ततश्च यन्मंत्रजातं प्रश्लिष्यपठितं गाना
दि विक्लेदरहितं तद्यजुरिति। सामान्याह स एव। गीतेषु सामाख्येति गीयमानेषु मंत्रेषु सामसंज्ञेत्यर्थः। यद्युवार शा
कौ उत्तरासंगमुत्तरीयं दर्भवटुः कुशब्राह्मण इति ॥❋॥ अथ कुंडविधिः। तत्र मात्स्यपुराणे। प्रागुदक्प्लवनां भूमिं।
कारयेत् यत्नतो नरः। प्रागुदक्प्लवनां पूर्वे नीचां उत्तर नीचां वेति। अत्र वशिष्ठ पंचरात्रे विज्ञान ललिताख्योच। सर्वोधि
कारिकं कुंडचतुरस्रं तु सर्वदं। चतुरस्रं चतुष्कोणं। भविष्योत्तरे सहस्रे त्वथ होतव्ये कुर्यात्कुंडं करात्मकं। द्विहस्तं
मयुते तच्च लक्षहोमे चतुष्करं। द्विहस्तादिके यामलः पूर्वे पूर्वस्य कुंडस्य कोणसूत्रेण निर्मितं। उत्तरोत्तरकुंडानां
मानं तत् परिकीर्तितं। पूर्वे पूर्वस्य हस्ता द्विहस्तादिमितस्य। कोणसूत्रेण ईशानकोणान्नैर्ऋतकोणाद्दत्तसूत्रेण परि

४६

लिपि॰ ३

निर्मितं यन्मानं उत्तरोत्तर कुंडानां तदेव पारिभाषिकं द्विहस्तादिमानं न तु प्रकृतहस्त द्वैगुण्यादिमितं । तथा द्वे द्विहस्ता
दिमितस्य चतुर्हस्तादि परिमाणापत्तेः कुशकस्य भूमिपरिमाणवत् वशिष्ठ पंचरात्रे यवान् कुंडस्य विस्तारः खननं ।
तावदिष्यते । हस्तैके मेखलास्तिस्रो वेदाग्निनयनांगुलाः । कुंडे द्विहस्ते तास्त्रेया रसवेदगुणांगुलाः । चतुर्हस्ते तु कुंडेतु
वसुत्रिकेयुगांगुलाः । मेखला ब्रह्मचारि मेखलावत् कुंडवेष्टिता मृद्घटिता स्यात् खात देशाद्बाह्ये एकांगुलरूपं कंठं
परित्यज्य उच्छ्रायेन विस्तारेण चेत्यादिक्रमेण वेदार्धांगुलाः । एतद्विपरीता संत्रांतरोक्ता व्यवहारविरुद्धाः वेदा
श्चत्वारः अग्नयस्त्रयः नयने द्वे रसाः षट् गुणास्त्रयः वसुत्रिके युगानि अष्ट षट् चत्वारि । कालोत्तरे । खाताद्बाह्येवं
गुलः कंठः सर्वे कुंडे स्वयं विधिः । पिंगलामतेपि खातादेकांगुलं त्यक्त्वा मेखलानां विधिमेवेत् । एककुंडस्य पश्चिम
दिक्कर्तव्यता मात्र महादान निर्णये । भुक्तौ मुक्तौ तथा पुष्टौ जीर्णोद्धारे तथैव च । सदा होमे सदा शांता वेवं वरुणा

87

दिग्गतं। शारदातिलके। होतरग्रे योनिरासा मुपर्य्यश्वत्थपत्रवत्। मुखे रत्नैक हस्तानां कुंडानां योनिरीरिता। षट्चतु
र्द्व्यंगुलायाम विस्तारोन्नतिशालिनी। एकांगुलं तु योन्यग्रं कुर्य्याद्दीर्घ दधा मुखं। एकैकांगुलतो योनिं कुंडवृत्ते प्रवर्द्धय
त्। यवैद्व्यक्रमेणैव योन्यग्रमपि वर्द्धयेत्। स्थूलदारस्य नालं स्याद्योन्यामध्ये सरंध्रकं। आसां मेखलानामश्वत्थपत्रवदि
त्येनेन चतुरंगुल विस्तृत मूलात् यथोक्त क्रमेणैकांगुल्यग्रं तं कुर्वित विस्तारा। आग्नेये तु र्य्यांगुलायतं नालं कार्य्यं पंचदशां
गुलं। तुर्य्यांगुलायतं चतुरंगुल सूत्र वेष्टन परिमितं। रुद्रयामले। नालमेखलयोर्मध्ये परिधिःस्थापनायच। रंध्रं कुर्य्या
त्तथा विद्वान् द्वितीय मेखलोपरि। पुरश्चरणचंद्रिकायां तु एतद्वचनात् पूर्वे स्थला दारस्य नालं स्यात्योनि मूलस्य धारणो
द्यपर्द्धं परिधौ स्तद्भिन्या सानाल छंदोग परिशिष्टे बाहुमात्राः परिधय ऋजवः सत्वचो/व्रणाः। त्रयोमवर्वस्य शीर्णा ग्रा
एकेषांतु चतुर्णा प्रागग्रावमितः पश्चादुदगग्रमथापरं। न्यसेत् परिधिमन्यश्च उदगग्रः सपूर्वतः। अव्रणाश्छिद्र

८७

तिथि०)

दिताः। असितः अग्नेः पार्श्वे द्वये दक्षिणोत्तरतस्तथा। पश्चात् पश्चिमे उदगग्रमुत्तराग्रं। त्रैलोक्यसारे कुंभद्वयसमायु
क्ता अश्वत्थदलवद्वृता। अंगुष्ठमेखलायुक्ता मध्ये त्वास्य स्थितिस्तथा। कुंभद्वयसमायुक्ता गजकुंभाकारमूलाद्या युक्ता
नतानता अंगुष्ठमेखलायुक्ता अंगुष्ठमृत्तमृद्घटितमेखलावेष्टनयुक्ता तथा त्वेतस्यागलितास्य स्थितिः। कुंडे तत्पातो
भवतीत्यर्थः। अन्तरव मत्स्याशो वे अंगुष्ठमानोष्ठः कंठाकारोऽश्वत्थदलाकृतिः। अंगुष्ठमानौष्ठः कंठे यस्या योनेः सा तथा
गुष्ठो/त्राग्रं। पंचरात्रे कल्पयेदंतरे नाभिं कुंडसंपावुजसन्निभां। मुष्टिरत्न्येकहस्तानां नाभिरुत्सेधविस्तृता। नेत्रवेदांगुलो
पेता कुंडेष्वन्येषु वर्द्धयेत्। यवद्वयक्रमेणैव नाभिं पृथगुदारधीः। नाभिक्षेत्रं त्रिधा भित्वा मध्ये कुर्वीत कर्णिकां। वहि
रंशद्वये नाष्टौ पत्राणि परिकल्पयेत्। खादिरादिस्रुवाभावे तु राघवभट्टधृतसंहितायां। पलाशपत्रे निश्छिद्रे रुचिरे
स्रुक्स्रुवौ स्मृतौ। विदध्याद्वाश्वत्थपत्रैः संक्षिप्ते होमकर्मणि। तत्र कुंडदोषानाह विश्वकर्मा खाताधिके भवेद्रोगी खा

न हीने धनक्षयः। वक्रकुंडेतु संतापो मरणं छिन्नमेखले। मेखलारहिते शोकोऽभ्यधिके वित्तसंक्षयः। भार्याविं
नाशकं कुंडं प्रोक्तं योन्या विनाकृतं। अपत्यध्वंसनं प्रोक्तं कुंडं यत्कंठवर्जितं। अत एव वशिष्ठसंहितायां तस्मात्
सम्यक्परीक्ष्यैवं कर्त्तव्यं शुभवेदिकं। हस्तमात्रे स्थंडिले वा संक्षिप्ते होमकर्म्मणि। क्रियासारेपि। कुंडमेवं विधं न
स्यात् स्थंडिलं वा समाश्रयेत्। शारदातिलकेपि। नित्यं नैमित्तिकं काम्यं स्थंडिले वा समाचरेत्। हस्तमात्रं तु तत्कुर्या
च्चतुरस्रं समंततः। महाकपिलपंचरात्रे संख्यानुक्तौ शतं साष्टं सहस्रं वा जपादिषु। होमे स्वाहांततामाह याज्ञव
ल्क्यः आदाय दक्षिणे पाणौ स्रुवं त्रिमधुरं हविः। प्राङ्मुखो वह्निजायांते जुहुयान्मंत्रपाणिना। त्रिमधुरं घृतमधु
रं घृतमधुशर्करात्मकं वह्निजाया स्वाहा। मंत्रे ओंकारपूतेन स्वाहांतेन विचक्षणाः। स्वाहावसाने जुहुयात् ध्यायन्
वै मंत्रदेवतामिति स्मृतेः। विष्णुधर्मोत्तरे। दूर्वाहोमः परः प्रोक्तस्तेन स्वर्गे महीयते तस्माद्दशगुणं पुण्यमिक्षुभिः प्राप्नु

४८

तिथि०३

याकृते। तस्माद्दशगुणं तस्यै त्रीहिसिद्धिर्गुणं भवेत्। यवश्चान्तु गेणं प्रोक्तं तिले दशगुणं स्मृतं। विल्वे दशगुणं प्रोक्तं घृ
तेनाष्टगुणं ततः। इति घृतस्य सर्वोत्कृष्टत्वसिद्धं। स्वाहांतमंत्रे स्वाहांतरं निषेधयेति मंत्रतंत्रे प्रकाशः। नमोंतेन नमोद्
घात् स्वाहांते द्विठमेव च। पूजायामातु तेनैव सर्वत्रायं विधिः स्मृतः। अत्रांत शब्दोऽवसानार्थः द्विठः स्वाहा। ठकारेण
लिपिसाम्याद्विंदुरुच्यते तस्य द्वित्वं तेन विसर्गः स च शक्तिरूपः तेन द्विठशब्दे नाग्निशक्तिः स्वाहोक्तेति राघवभट्टः तथा
च द्विठः स्वाहानलप्रियेति वर्णाभिधानं। अत्र तु स्वाहाशब्दः स्वीयद्रव्यत्यागात्मकः। तथाहुः। उपविष्टहोमाः स्वाहा
कारप्रदानान्तु होतय इति हरिशर्मोद्धृतं। स्वाहाकारेणा स्वाहेति पदेन प्रदानं त्यागो यास्तु तास्तथा अत एव स्वाहाका
रस्य प्रदानार्थत्वात् हविस्त्यागस्यामूायसिद्धत्वेनैव कृतत्वात् द्वितीयस्याम्नानमनर्थकमिति भट्टभाष्यं। प्रदानार्थेनु
तत्रैव यत्र मंत्रस्थ नाम्नि चतुर्थ्यन्तता। अतो जयंती मंगला काली त्यादौ नमः स्वाह योयेथायथं पुनर्दीयतेति। न्युब्ज पाणिने

४१

तिर्य्यक्स्थं तरीयं । उत्ताने नैव हस्तेन ह्यंगुलाग्रेण पीडितं । संहतांगुलपाणिस्तु मुकुलया ह्यग्रयतो हविरिति महादान
निर्णय धृत गोलीय वचनात् एतद्वचनं परिशिष्टीयमिति माधवाचार्य्यैः । प्रविष्ट आहुतिं च घृतादीनां स्रुवेणाधोमुखेन
न तु । कुनेति तथाप्याहुतीस्तु दैवेनोत्तानपाणिना । स्रुवस्तु पंचांगुलां स्पृक्त्वा शंखमुद्रया धार्य्यैः पंचांगुलान् वहिस्पृक्त्वा
धारयेच्छंखमुद्रयेति वाचस्पतिकृत महादान निर्णय धृत वचनात् । अग्नेर्नामानि च गोभिलसूत्र कृत गृह्यासंग्रहे ।
लौकिके पावकोऽप्यग्निः प्रथमं परिकीर्तितः । अग्निस्तु मारुतो नाम गर्भाधाने विधीयते । पुंसवने चंद्रनामा शुंगाकर्म्म
णि शोभनः । सीमंते मंगलो नाम प्रगल्भो जातकर्म्मणि । नाम्नि स्यात् पार्थिवोऽप्यग्निः प्राशने च शुचिस्तथा । सत्यनामा
थ चूडायां व्रतादेशे समुद्भवः । गोदाने सूर्य्यनामा च केशांते ह्यग्निरुच्यते । वैश्वानरो विसर्गे तु विवाहे योजकः स्मृतः ।
गोदाने गोदानाख्य संस्कारे । चतुर्थ्यां तु शिखीनाम धृतिरग्निस्तथा परे । अपरे धृतिहोमादौ । प्रायश्चित्ते विधुश्चैव पा

८९

तिथि०)

कयज्ञेन साहसः। प्रायश्चित्ते प्रायश्चित्तात्मक महाव्याहृति होमादौ। पाकयज्ञे पाकांगक होमे वृषोत्सर्गे गृह प्र
तिष्ठा होमादौ। लक्षहोमेच वह्निः स्यात् कोटिहोमे हुताशनः। पूर्णाहुत्यां मृडोनाम शांतिके वरदस्तथा। पौष्टिके ब
लदश्चैव क्रोधाग्निश्चाभिचारके। वश्यार्थे कामदोनाम वनदाहे तु सूतकः। कोष्ठे तु जठरोनाम क्रव्यादो मृतभक्षणे।
गुणविष्णुधृताश्रुतिः। आहूयचैव होतव्यं योयत्र विहितोनलः। तथा शुभं पात्रं तु कांस्यं स्यात् तेनाग्निं प्रणयेद्बुधः
तस्याभावे शरावेणानवेनाभिमुखं चतं। सर्वतः पाणिपादांतः सर्वतोक्षिशिरोमुखः। विश्वरूपो महानग्निः प्रणीतः
सर्वकर्मसु। अग्निप्रणयनानंतरं सर्वत इत्यस्य पाठो युज्यते। प्रणीत इति मंत्रलिंगात् अन्यथा स्थापनानंतरमे
तदभिधानं व्यर्थं स्यात्। गुणविष्णुनापि श्रुतिरिति कृत्वा सर्वतः पाणिपादांत इति लिखितं। एवं च दुर्गा पूजनस्य।
पौष्टिककर्मत्वात् तदंगहोमे बलदनामाग्निरिति। ध्यानमाहादित्यपुराणे। पिंगभ्रूश्मश्रुकेशाक्षः पीनांग जठरोरुणः

९०

भागस्थः साग्निसूत्रोऽग्निः सप्तार्चिः शान्तिधारकः। यत्तु प्रकृत वैगुण्य दोष प्रशमनाय शाट्यायन होमाभिधानं भवदे-
व भट्ट सम्मतं तन्न तस्मादपि महाप्रामाणिके गोभिलभाष्ये तदप्रमाणीकृतत्वात् दोषपरिशिष्टेपि प्रायश्चित्ता-
र्थे प्रकारत्रयमात्रमुक्तं। यथा यत्र व्याहृतिभिर्होमः प्रायश्चित्तात्मको भवेत्। चतस्रस्तत्र विज्ञेयाः स्त्रीपाणिग्रहणे य-
था। अपि वा ज्ञातमित्येषा प्राजापत्यापि वाहुतिः। होतव्या त्रिविकल्पोयं प्रायश्चित्तविधिः स्मृतः। त्रिविकल्प इत्यने-
न कल्पांतर निषेधात् गोभिलीय कर्मणि शाट्यायन होमो न युक्तः किंतु व्यस्त समस्त महाव्याहृतिभिश्चतसृभिः
प्रायश्चित्त होमो युक्तः। विशारद प्रभृतयोप्येवं शाट्यायन होमस्य समूलत्वेपि शाखांतरीयत्वं। अग्नेः शुभलक्षणा-
माह वायुपुराणं। अर्चिष्मान् पिंडितशिखः सर्पिः कांचनसन्निभः। स्निग्धः प्रदक्षिणश्चैव वह्निः स्यात् कार्यसिद्धये
।ब्रह्मपुराणे क्षुत्तृट्क्रोधत्वरायुक्तो हीनमंत्रं जुहोति यः। अप्रवृद्धे सधूमे वा सोंऽधः स्यादन्यजन्मनि। अल्परूक्षेस

९०

तिथि०

स्फुलिंगे वामावर्त्ते भयानके। आर्द्रकाष्ठैः सुसंपूर्णो फुत्कारवति पावके। कृष्णार्चिषि सुदुर्गंधे तथा लिहति मेदिनीं जु
हुयाद्दाहुतिं यस्तु तस्य नाशो भवेद्ध्रुवं। आपस्तंबः। नाप्रोक्षितमिंधनमग्नावादध्यादिति। पूजामात्रमोर्केउय पुरा
र्णां संपूजयेत्ततो वह्निं दद्याच्चैवाहुतीः क्रमात्। कर्कमतसंवादिनी स्मृतिः। आदौ तु देवतोद्देशं तैत्तिरीयकठशा
खिनो। कान्नमाध्यंदिनानां च पश्चादुल्लेखयेत्सुरान्। अन्येषां नास्त्येव देवतोद्देशः। स्मृत्यर्थसारे मदनपारिजातयो
: सन्निधौ यजमानः स्यादुद्देशत्यागकारकः। असन्निधौ तु पत्नी स्यादुद्देशत्यागकारिका। असन्निधौ तु पत्न्याः स्या
दध्वर्युस्तदनुज्ञया। उन्मादे प्रसवे चार्त्तौ कुर्वीतानुज्ञया विना। अध्वर्युर्यजुर्वेदीयहोमकर्त्ता। पूर्णाहुतिस्तु सर्वैरे
वोत्थाय दातव्या यथाग्निपुराणे मूर्द्धानं दिवमंत्रेण संश्रवेणावधारया। दद्यादुत्थाय पर्णां वै नोपविश्य कदाचन।
परार्द्धभविष्येपि मूर्द्धानं दिवेति यजुषां मंत्रः। सामगानां पूर्णाहोममित्यादि। शांतिदीपिकायां वशिष्ठः। रेशान्यामाह

११

रेखास्मत्सुवावाथ स्रुवेण वा। वंदनां कारयेत्तेन शिरः कंठांसकेषु च। कश्यपस्येति मंत्रेण यथानुक्रमयोगतः। ततः शां
ति प्रकुर्वीत अवधारणवाचनं। दक्षिणाच प्रदातव्या ग्रहादीनां विसर्जनं। शांति वामदेव्यगानादिः। पर्युक्षणं च स
र्वत्र कर्त्तव्यमदितेऽन्विति। अंते च वामदेव्यस्य गानमित्यथवा त्रिधेति छंदोगपरिशिष्टात्। गानं कुर्य्यो दृच त्रिधेति
वा पाठः। अवधारणं आशिषावधारणं तेन आशिषावधारणं दक्षिणानंतरं कर्त्तव्यं न तु पाठक्रमादरः। वृथावि
प्रवचो यस्तु गृह्णाति मनुजः शुभे। अदत्वा दक्षिणां वापि स याति नरकं ध्रुवमिति नारदीयात्। अत एव भवदेवभट्टे
नापि वामदेव्यगानानंतरं दक्षिणानोक्ता तथा वशिष्ठेन दक्षिणानंतरं विसर्जनाभिधानेन श्राद्धे पि तथा दर्शनेना
निर्दिष्ट कालकांगस्य प्रधानकालकर्त्तव्यत्वेन शारदायाः पूजायां नवम्यामेव दक्षिणादेया। व्यक्तं मात्स्यसूक्ते ब्रतक
ल्पे। नवम्यां पूर्ववत् पूजा कर्त्तव्या भूतिमिच्छता। दक्षिणां वस्त्रयुग्मं च आचार्याय निवेदयेत्। ततो देवी विसर्जनानंत

९१

तिथि२

रं दक्षिणोत्ति दुर्गां भक्तितरं गिरा युक्तं युक्तं उत्तरेणानवम्यां तु बलिभिः पूजयेच्छिवां । श्रवणेन दशम्यां तु प्रणिपत्य वि
सर्जयेद्दिव्यनेन । आर्द्रायां बोधयेद्देवीं मूलेनैव प्रवेशयेत् । पूर्वोत्तराभ्यां संपूज्य श्रवणेन विसर्जयेदित्यत्र क्वापि दे
शेन च नवम्युत्तराषाढयोः पूजा न ता प्रतीयते । आश्विने मासि शुक्ले तु कर्त्तव्यं नवरात्रिकं प्रतिपदादिक्रमेणैव या
वत्त्व नवमी भवेत् त्रिरात्रं वापि कर्त्तव्यं सप्तम्यादि यथाक्रमं इति कृत्यकल्पलताधृत भविष्योत्तर वचने पूजनस्यनव
म्यंतता प्रतीतेः कर्म्मांते छंदोग परिशिष्टेन दक्षिणाभिधानात् । यथोक्तस्मरणे दक्षिणा देया यत्र या परिकीर्त्तिता । कर्म्मां
तेनुच्यमानायां पूर्णपात्रादिका भवेत् । त्रुयणा इति कर्म्म कारयितुरुपलक्षणं । अत्र नवरात्रिकमित्यौत्सर्गिकं तिथिवृद्धि
क्षयाभ्यामधिकन्यूनतासंभवात् । अत एव प्रतिपदादिनवतिथिषु कृत्यमाह भविष्ये । केशसंस्कारद्रव्याणि प्रदद्यात्
प्रतिपद्दिने । पट्टडोरं द्वितीयायां केशसंयमहेतवे । दर्पणं च तृतीयायां सिंदूरालक्तकं तथा । मधुपर्कं चतुर्थ्यां तु तिलकं

९२

नेत्रमंडनं।पंचम्यामंगरागंच भ्रान्त्यालंकरणानि च।षष्ठ्यां बिल्वतरौ बोधं सायं संध्यासु कारयेत्।सप्तम्यां प्रातरानी
य गृहमध्ये प्रपूजयेत्।उपोषणं तथाष्टम्यामष्टशाकेः प्रपूजनं।नवम्यामुग्रचंडायां स्नाद्दु देवार्चनं दिवा।पूजा च बलि
दानं च तद्वन्मातॄः प्रपूजयेत्।कुमारीपूजनीयाच भूषणीयाच भूषणैः।संपूज्य प्रेषणं कुर्याद्दशम्यां शाबरोत्सवै अ
नेन विधिना यस्तु देवीं प्रीणयते नरः।स्कंदवत् पालयेत्तंतु देवी सर्वापदि स्थितं।पुत्रदारधनर्द्धीनां संख्या तस्य न विद्यते
।भुक्त्वेह परमान्भोगान् प्राप्य देवीगणो भवेत्।अत्र कल्पे प्रतिपदि ब्रह्मकलस [illegible] स्थापनं।यजमानस्नानार्थं दुर्गो
भक्तितरंगिण्यां यदुक्तं तन्न युक्तं तस्य देवीपूजानंगत्वेन तत्र तद्विधानस्यायुक्तत्वात् मात्स्यपुराणो ग्रहयागे उक्तत्वाच्च
यद्यपि अग्नि ब्रह्मा भवानीच गजवक्त्रो महोरगः।स्कंदो भानु मातृगणो दिक्पालाश्च नवग्रहाः।एषां घटेतु प्रत्येकं पूज
यित्वा यथाविधि।मूर्तिं पवित्र मेकैकं दद्यादेव समाहित इति कालिकापुराणीयेन प्रतिपदि ब्रह्मपूजनमात्र मुक्तं तन्न यु

९२

तिथि०

कं। ब्रह्मपूजनवदग्न्यादिपूजनस्यापि तद्वचनोक्तत्वेन तदभिधानस्यापि युक्तत्वात् किंतु तद्वचनं सामान्यतः पूजां
तत्र विधाय कर्तव्या बोध्यं। मात्स्ये अर्थहीनो दहेद्राष्ट्रं मंत्रहीनस्तथर्त्विजः। आत्मानं दक्षिणाहीनो नास्ति यज्ञसमो रिपुः
। अर्थो द्रव्यं। देवीयात्राकाले निर्मंजनविधिमाह रत्नाकरे देवीपुराणं। भक्त्यापि घृतप्रदीपाद्यैश्चूताश्वत्थादिपल्लवैः।
उपधीमिश्रमेध्याभिः सर्वबीजैर्यवादिभिः। नवम्यां पर्वकालेषु यात्राकाले विशेषतः। यः कुर्याच्छ्रद्धया वीर देव्या नी
राजनं नरः। शंखभेर्यादिनिनदैर्जयशब्दैश्च पुष्कलैः। यावन्तो दिवसान् वीर देव्या नीराजनं कृतं तावत्कल्पसहस्राणि
दुर्गालोके महीयते। यस्तु कुर्यात् प्रदीपेन सूर्यलोके महीयते। पर्वकाले उत्सवकाले देव्या इति स्त्रीत्वमविवक्षितं
तथाचारात्। यागाधिकारे हरेः स्तुतिमाह मत्स्यपुराणं प्रीयतां पुंडरीकाक्षः सर्वयज्ञेश्वरो हरिः। तस्मिंस्तुष्टे जगत्तु
ष्टं प्रीणिते प्रीणितं जगत्। कृत्यमहार्णवे भविष्यशिवरहस्ययोः। दशम्यां बलिदानं तु दीयते यत्र मानवैः। तद्राष्ट्रं नाश

९३

नाशमायाति मरकोपद्रवैः स्फुटं। अत्र विरुद्धवचनानि भोजदेव जीमूतवाहन हलायुध धृतानि रत्नाकर दुर्गाभक्ति
तरंगिणी वाचस्पति मिश्र रायमुकुट कृत्यमहार्णव प्रभृतिभिर् लिखितानि विजयादशमी मधिकृत्य दशमीयः समुल्लं
घ्य प्रस्थानं कुरुते नृपः। तस्य संवत्सरं राष्ट्रे न क्वापि विजयो भवेत्। अशक्तो खड्गादि यात्रामात्र राजमार्तण्डः कार्य्यवशा
त् स्वयमगमे भूभर्तुः केचिदाहुराचार्य्याः। छत्रायुधाद्यमिष्टं वैजयिकं निर्गमे कुर्य्यात्। ज्योतिषे हस्तांगतेतु मित्रे यथा
दिशा खंजनं नृपो यातं पश्येत् यात्रिया तस्य क्षिप्रमरातिर्वशमुपैति। मित्रे सूर्ये। तथा कृत्वा नीराजनं राजा बलवृद्धौ
यथाबलं। शोभनं खंजनं पश्येज्जलगोगोष्ठसन्निधौ। ॐ नीलग्रीव शुभग्रीव सर्वकामफलप्रदः। पृथिव्यामवतीर्णो
सि खंजरीट नमोस्तु ते। वसंतराजे दृष्टोदिते ऽगस्त्य मुनौ सुदेशे सुचेष्टितं खंजनकोविदध्यादितुपक्रमस्यत्वं योगयुक्तो
मुनिपुत्रकस्त्वं महर्षपतामे विशिखोद्गमेन। सं दृश्यसे प्रावृषि निर्गतायां त्वं खंजनाश्चर्यमयो नमस्ते। एतद्वचनात् य

९९

तिथि०)

दाशिरसि शिखो दाम सदा खंजनो न दृश्यते। अगस्त्योदयानन्तरं शिखाविगमात् पुनर्दृश्यते। दर्शनफलं। अब्जेषु
गोषु गजवाजिमहोरगेषु राज्यप्रदः कुशलदः शुचिशाद्वलेषु। भस्मास्थिकेशनखलोमतुषेषु दृष्टो दुःखं ददातिब
हुशः खलु खंजरीटः। वध्ये कृत्ये वित्तं ब्रह्मराशि कार्यसिद्धिरतुला शाके हुताशे भयं याम्यामग्निभयं सुरद्विषि कलिर्लो
मः समुद्रालये। वायव्यां वरवस्त्रगंधसलिलं दिव्यांगनावोत्तरे ऐशान्यामरसां ध्रुवं निगदितं दिग्लक्षणं खंजने। स्थै
र्यीकृते श्रुते प्येवं मूत्रुः केचित्तु कोविदाः। श्रुते तु मदनपारिजातधृतं। जीवेति स्तुवतो ब्रूयाज्जीवेत्युक्तस्त्वयासह म
था स्तुतोत् पतनं गृहेषु जीवोक्ति यंगुलिध्वनिः। शत्रोरपि च कर्तव्यो न कृते ब्रह्महा भवेत्। अशुभं खंजनं दृष्ट्वा देवब्रा
ह्मणपूजनं। दानं कुर्वीत कुर्याच्च स्नानं सर्वौषधीजलैः॥ * ॥ इति दुर्गापूजातत्त्वं समाप्तम्॥ ॐ॥ अथैकादशीतत्त्व
परयुता याह्या युग्मात्। आग्नेये गृहस्थो ब्रह्मचारी च आहिताग्निस्तथैव च। एकादश्यां न भुंजीत पक्षयोरुभयोरपि कृ

७५

ष्णायां पुत्रवतो गृहस्थस्य निषेधमाह ब्रह्मपुराणे आदित्येऽहनि संक्रान्त्यां व सिते एकादशी दिने । व्यतीपाते कृते श्राद्धे
पुत्री नोपवसेद् गृही । तस्यैव शयनबोधनमध्ये प्रतिप्रसवमाह ब्रह्मवैवर्ते: शयनीबोधनीमध्ये या कृष्णैकादशी भ
वेत् । सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचन । वैष्णवस्य यावत् कृष्णायामुपवासमाह नारदः । नित्यं भक्तिसमायु
क्तैर्नरैर्भक्तिपरायणैः कृष्णपक्षे च कर्तव्यमेकादश्यामुपोषणं । सपुत्रश्च सभार्यश्च स्वजनैर्भक्तिसंयुतः । एकादश्या ९४
मुपवसेत् पक्षयोरुभयोरपि । तत्त्वसागरे यथा शुक्ला तथा कृष्णा यथा कृष्णा तथेतरा । तुल्ये ते मन्यते यस्तु स वै वैष्णव उ
च्यते । इति वैष्णवलक्षणमप्युक्तं । विद्धोपवासे भोजनचतुष्टयनिवृत्तिमाह महाभारते । सायमाद्यन्तयोरह्नोः सायं प्रा
तश्च मध्यमे । उपवासफलं प्रेप्सोर्वर्ज्यं भक्तचतुष्टयं । पुत्रवतो ब्रह्मपुराणोक्तरविवाराद्युपवासनिषेधस्तु तन्निमित्तोप
वासपरः । तन्निमित्तोपवासस्य निषेधाय समुदाहृतः । नानुषंगकृतो ग्राह्यो यतो नित्यमुपोषणमिति जैमिनिवचनात् ।

तिथि०

गु भानुदिनोपेता सूर्य्यसंक्रान्तिसंयुता । एकादशी सदोपोष्या पुत्रपौत्रविवर्द्धिनीति विष्णुधर्म्मोत्तरवचनाच्च । तन्निमित्तकोपवा
सस्याह संवर्तः । अमावस्या द्वादशी च संक्रान्तिश्च विशेषतः । एताः प्रशस्तास्तिथयो भानुवारस्तथैव च । अत्र स्नानं जपो होमो
देवतानां च पूजनं । उपवासस्तथा दानमेकैकं पावनं स्मृतं । पितृवासरादेस्तु वराहपुराणविष्णुधर्म्मोत्तरकात्यायनाः उपवा
सो यदा नित्यः श्राद्धं नैमित्तिकं भवेत् । उपवासं तदा कुर्य्यादाघ्राय पितृसेवितं । रविवारे ऽर्कसंक्रान्त्यामेकादश्यां सितेतरे । पा
रणं चोपवासं च न कुर्य्यात् पुत्रवान् गृहीति पारणनिषेधो रविवारसंक्रान्तिमात्रप्राप्तोपवासनिषेधवत् रविवारसंक्रा
न्तिमात्रप्राप्तिपारणपरः । तयोरेव पारणान्तु सप्तवारानुपोष्यैव सप्तधा संयतेन्द्रियः । सप्तजन्मकृतं पापं ततत्क्षणादे
व नश्यतीति संवत्सरप्रदीपधृतेन । नित्यं द्वयोरयनयोर्नित्यं विषुवतो द्वयोः चन्द्रार्कयोर्ग्रहणयोर्व्यतिपातेषु पर्वसु
अहोरात्रोषितः स्नानं श्राद्धं दानं तथा जपं । यः करोति प्रसन्नात्मा तस्य स्यादक्षयं तु तत् । इति ब्रह्मपुराणवचनाच्च
शनिवारोपवाससंक्रान्तिपूर्वदिनोपवासविधानेन प्राप्तमिति । विधवायास्तु सर्वथा नित्यत्वमाह कात्यायनः विधवा

१५

यामेव नारी भुंजीतैकादशीदिने। तस्याश्च सुकृतं नश्येद् ब्रह्महत्या दिने दिने। स्मृतिः। अष्टाब्दादधिको मर्त्यो ह्यपूर्णाशीतिवत्स
रः। भुंक्ते यो मानवो मोहादेकादश्यां स पापकृत्। एकादशीव्रतं नित्यमाह ब्रह्मवैवर्ते: इति विज्ञाय कुर्वीत वैष्णवैकादशीव्र
तं। विशेषनियमाशक्तो/ होरात्रे भुक्तिवर्जितः। भविष्ये नित्यमेतद्व्रतं नाम कर्तव्यं सार्ववर्णिकं। सर्वाश्रमाणां सामान्यं सद्
धर्मेष्वनुत्तमं। एकादश्यां न भुंजीत पक्षयोरुभयोरपि। प्रचेताः पूर्णाप्येकादशी त्याज्या द्वितयं वर्द्धते यदि। द्वादश्यां पार
णालाभे पूर्णैव प्रतिगृह्यते। एकादश्यां पूर्णत्वं विशेषयति सौरधर्मे: आदित्योदयवेलायाः प्राङ्मुहूर्तद्वयान्विता। सै
कादशीति संपूर्णा विद्धान्या परिकीर्तिता। द्वितयं एकादशी द्वादशी च वर्द्धते परदिनगामिनी। द्वादश्यां पारणायाः अला
भे पूर्णापरिग्रहे अधिकारिभेदमाह स्कांदे संपूर्णैकादशी यत्र प्रभाते पुनरेव सा तत्रोत्तरां यतिः कुर्यात् स्यात् पूर्वामुप
वसेद्गृही। कौर्म्ये एकादशी प्रवृद्धा चेत् शुक्ले कृष्णे विशेषतः। उत्तरां तु यतिः कुर्यात् पूर्वामुपवसेद्गृही। पुनः प्रभाते सम

९५

तिथि०

ये घटिकैका यदा भवेत् तत्रोपवासो विहितो वनस्थस्य यतेस्तथा। विधवायाश्च तत्रैव परतो द्वादशी न चेत्। एकादश्येव प्रक
र्षेण वृद्धा न द्वादशीत्यर्थः। तत्रैव उत्तरार्धमेव यत्र तु पूर्वदिने दशमीविद्धा परदिने द्वादशीमिश्रा तत्र सर्वैरेव परदिने द्वा
दशीपारणालाभे तदलाभेपि परैव पोष्या एकादशी द्वादशीमिश्रा परतोपि न वर्द्धते गृहिभिर्यतिभिर्वापि सैवोपोष्या स
दा तिथिरिति स्मृतेः। अपि भिन्नक्रमे न वर्द्धतेपि द्वादशीत्यर्थः। एतद् द्विस्पृशि त्रिस्पृशि च संभवत्यविशेषात्। अत्रैव त्रयो
दश्यां पारणाफलमाह एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणं। यत्तु द्वादशा
द्वादशी हंति त्रयोदश्यां तु पारणमिति तदुपवासपरदिने द्वादशीलाभे तां विहाय पारणो बोध्यं तथा च ब्रह्मपुराणं।
एकादश्यामुपोष्यैव द्वादश्यां पारणं स्मृतं त्रयोदश्यां न तत्कुर्याद् द्वादशीक्षयात्। कालविवेकसंवत्सरप्रदीपप्रभृति
षु कूर्मपुराणं एकादशीमुपवसेत् द्वादशीमथवा पुनः विमिश्रां वापि कुर्वीत न दशम्या युतां क्वचित्। कुर्यादलाभे संयतो

द्वादश २

१६

नालाभेपि प्रवेशिनी। उपोष्या द्वादशी तत्र त्रयोदश्यां तु पारणं। उदयात् प्राग्दशम्यास्तु शेषः संयोग इष्यते। उपरि चेत्प्र
वेशस्तु तस्मात्तां परिवर्जयेत्। द्वादश्यां कलाइमात्रे मध्येकादश्यनिर्गमे यदि दशमी नोदयं स्पृशति उदयात् प्रागरुणोदयका
लएवावतिष्ठते। तदा संयुक्तोच्यते। सैवोपोष्या अत्रैव विषये एकादशी दशाविद्धापरतोपि नवर्द्धते इतिहिमियेतिभिश्चैवसे
वोपोष्या सदा तिथिरिति भविष्यपुराणादिवचनानि दशमीविद्धाकर्तव्यबोधकानि संयुक्तापराणि बोध्यानि अत्र द्वादश्या
मेकादश्यलाभ एव अरुणोदयविद्धायाः कर्तव्यतोपदेशात्। द्वादश्यामेकादशीलाभे तादृगविद्धां न कुर्यादित्यर्थेतोऽवग
ते सात्रपरैकादश्युपोष्येति गम्यते। एतद्विषय एव षष्टिदंडात्मिकायास्तिथेर्निवृत्तमरुणोपरे। अकर्मण्यं तिथिमलं विद्या
देकादशीविनेति संगच्छते। यथा कालमाधवीये गारुडे आदित्योदयवेलायां आरभ्य षष्टिनाडिकाः संकीर्णैकादशीनाम
त्याज्या धर्मफलेप्सुभिः। अत्रापि त्रयोदश्यां द्वादशीलाभ एव परोपोष्यत्वं बोध्यं। न चेत्तत्र पूर्वामुपोष्य परदिने द्वादश्याद्यपा

६६

तिथि०)

दमुत्तीर्य्य पारणं कुर्य्यात् विद्धाप्येकादशी ग्राह्या परतो द्वादशी नचेदिति । मुहूर्त्तं द्वादशी नस्यात् त्रयोदश्यां यदा मुने । उपोष्या
दशमीविद्धा सर्वैरेकादशी नरैरिति । त्रयोदश्यां यदा न स्यात् द्वादशी घटिकाद्वयं दशम्येकादशी विद्धा सेवोपोष्या सदा तिथिः ।
रिति मात्स्यपुराणात् कूर्म्मपुराणात् वराहनारदीयवचनेभ्यः । अत्र मुहूर्त्तं घटिकेति पारणायोग्यकालोपलक्षणं । कलाद्धा द्वाद
शी दृष्टा निशीथादूर्द्ध्वमेव हि । आमध्याह्नाः क्रियाः सर्वाः कर्त्तव्याः शंभुशासनादिति श्रीधरस्वामिधृतवचनदर्शनात् । अथो
दयानंतरवर्त्तिनी दशमीयद्येकादशीं स्पृशति तदासा प्रवेशिनीपदवाच्यातां विहाय द्वादशीमेवोपवसेत् तदिदमुक्तं नालाभेपि
प्रवेशिनीमिति । अलाभेपि परदिने एकादश्यलाभेपि अतएव करावेः । उदयोपरि विद्धा तु दशम्येकादशी यदि । दानवेभ्यः
प्रीणनार्थं दत्तवान् पाकशासनः । स्कांदे दशम्येकादशी विद्धा गांधारी तामुपोषिता । तस्याः पुत्रशतं नष्टं तस्मात्तां परिवर्जयेत्
। ये कारयंति कुर्वंति दशम्येकादशीयुतां । आलोक्य तन्मुखं ब्रह्मन् सूर्य्यदर्शनमाचरेत् । अथारुणोदयविद्धमपि दं डैकाद

९७

शी पूर्णैकादश्यो व्यवस्थायामविशेष इति चेन्न द्वादश्यां पारणालाभे पूर्णैव परिगृह्यते। इत्यवैष्णवेनापि पूर्णोपोष्यति
। अरुणोदयविद्धा तु एकादशी द्वादशी पारणस्यालाभेपि वैष्णवैर्नोपोष्येति किंतु खंडैकादश्युपोष्येति गम्यते। दशमीशे
ष संयुक्तो यदि स्यादरुणोदयः नैवोपोष्यं वैष्णवेन तद्दिनैकादशीव्रतमिति गारुडे वैष्णवेनाप्यभिधानात् तत्रापि कृष्णपक्षे
ऽरुणोदयविद्धैवोपोष्या शुक्लपक्षे न तथेति विशेषः। एकादशी दशाविद्धा वर्द्धमानेपि वर्जयेत् पक्षहानौ स्थिते सोमेलं
घयेद्दशमीयुतामिति कालविवेककृत्यमहार्णवधृत भविष्यपुराणोक्तवाक्यात्। अरुणोदयकालमाह स्कंदपुराणं।
उदयात् प्राक्चतस्रस्तु नाडिका अरुणोदयः। अत्र स्नानं प्रशस्तं स्यात्तद्धि पुण्यतमं स्मृतं। नाडिका दंडः॥ तदयं संक्षेपः
गृहस्थादीनामुभयपक्षैकादश्यामुपवासेऽधिकारः। कृष्णैकादश्यां पुत्रवतो गृहस्थस्य नाधिकारः हरिशयनाद्यंतरेण
स्याप्यधिकारः। वैष्णव पुत्रवद्गृहस्थस्य सर्वकृष्णायामधिकारः शुक्रवारादावप्येकादश्यामुपवासे फलाधिक्यं विध

९७

तिथि०)

वायास्तु सर्वेषां त्राधिकारः। अत्राष्टाब्दाधिका पूर्णाशीतिवर्षे मानवो नित्याधिकारी। एकादशीव्रतं नित्यं पारणादिने द्वादशीलाभे
सर्वैरेव पूर्णां त्यक्त्वा खंडामुपवसेत्। तदलाभे गृही पूर्वां तदन्यः परां विधवा च। यदा तु पूर्वदिने दशम्या परदिने द्वादश्या युतैका
दशी तदोत्तरामुपोष्य द्वादश्यां पारणां कुर्य्यात्। पारणादिने द्वादश्यनिर्गमे तु त्रयोदश्यामपि। यदा तु सूर्य्योदयानंतरं दशमी
युतैकादशी अपरदिने न निःसरति तदा तां विहाय परदिने द्वादशीमुपवसेत्। यदा तु सूर्य्योदयपूर्वकालीनदशमीविद्धैए
कादशी परपूर्वदिने न निःसरति तदा तामुपवसेत्। यदा तु तथाविधा सती परदिनेपि निःसरति तत् परदिने च द्वादशी तदा
तां विहाय खंडामुपोष्य द्वादश्यां पारयेत्। यदा तूभयदिने तद्विधैकादशी तत् परदिने च न द्वादशी तदा वृद्धिं दंडात्मिकां वि
द्धामुपोष्य परदिने द्वादश्याद्यपादमुत्तीर्य्य पारयेत्। वैष्णवस्तत्रापि शुक्लपक्षे परामुपोष्य त्रयोदश्यां पारयेदिति॥०॥एका
दश्युपवासस्य सूतकादावपि कर्त्तव्यमाह भविष्योत्तरपद्मपुराणयोः। एकादश्यां न भुंजीत पक्षयोरुभयोरपि। सूतके मृतके वा

९४

पि अन्यस्मिन्न प्यशौचके । सर्वथा न परित्याज्या इत्युक्तां श्रियमात्मनः ॥ स्त्रियास्तु पुलस्त्यः । एकादश्यां न भुंजीत नारी दृष्टे रजस्यपि ।
अशक्तं प्रति नारदीये । अनुकल्पो नृणां प्रोक्तः क्षीणानां वरवर्णिनि । वायुपुराणे । उपवास निषेधेतु किंचिद्भक्ष्यं प्रकल्पयेत् । न
दुष्यत्युपवासेन उपवास फलं लभेत् । उपवास निषेधात् सामर्थ्ये भक्ष्याणां प्रकार माह नारदीये । फलं मूलं पयस्तोयमुपभोग्यं
भवेच्छुभं । न त्वेवं भोजनं केश्चिदेकादश्यां प्रकीर्त्तितं ॥ एवमित्यनुकल्पातिरिक्तं वायुपुराणे । नक्तं हविष्यान्न मनोदनं च फलं ति
लाः क्षीरमथाम्बु चाज्यं । यत् पंचगव्यं यदि वाथ वायुः प्रशस्तमत्रोत्तरमुत्तरं च । फलाहारादावपि तुलसी रहितत्वे दोषमाह ग
रुडपुराणे । तुलसी विना यत् क्रियते न पूजा स्नानं न तद्यत्तुलसी विनाकृतं । भुक्तं न तद्यत्तुलसी विवर्जितं पीतं न तद्यत्तुलसी
विवर्जितं । अत्र श्रीभगवद्वाक्यं । मच्छयने मदुत्थाने मत्पार्श्वपरिवर्तने । फलमूल जलाहारी हृदि शल्यं समर्पयेत् । हविष्या
न्नमाह स्मृतिः । हैमंतिकं सितास्विन्नं धान्यं मुद्गास्तिला यवाः । कलायकंकुनीवारा वास्तूकं हिलमोचिका । षष्टिका कालशाकं च

२८

तिथि०

मूलकं केमुकेतरत् । लवणे सैंधव सामुद्रं गव्येच दधिसर्पिषी । पयोनुद्धृतसारंच पनसाम्रं हरितकी । तिंतडीजीरकंचैवनाग
रंगंच पिप्पली । कदलीनवनीधात्रीफलान्यगुडमैक्षवं । अतैलपक्वं मनयो हविष्यान्नं प्रचक्षते । अत्रास्विन्नधान्यमित्युपादाना
त् अन्यत्र स्विन्नधान्यतंडुलेन दोषः । हैमंतिकमित्यमिधायागस्त्यसंहितायां नारिकेलफलंचैव कदली नवनी तथा । आम्रमामल
कंचैव पनसंच हरितकी । व्रतांतरप्रशस्तंच हविष्यं मन्यते बुधः । शाकानुग्रहस्थपरिशिष्टे मनुः । प्रभुः प्रथमकल्पस्य योनकल्पे
न वर्तते । न सांपरायिकं तस्य दुर्मतेर्विद्यते फलं । अनुकल्पेपि द्वादश्यां विश्णूपासनं पारणांच कर्तव्यं । एकमक्तेननक्तेना
थैवायाचितेनच । उपवासेन दानेन नैवाद्वादशिको भवेदिति मार्कंडेयपुराणवचनात् । दानेन ब्रह्मवैवर्तोक्तेन यथा उप
वासासमर्थस्तु एकं विप्रंतु भोजयेत् । तावद्धनानि वा दद्याद्यद्भक्ताद्द्विगुणं भवेत् । सहस्रसंमितां देवीं जपेद्वा प्राणसंयमान्
कुर्याद्द्वादशसंख्यकान् यथाशक्तिव्रतेनरः । देवीगायत्री मासे दशम्यां नियताहारो मांसमैथुनवर्जितः । एकादश्यां न भुंजीत

११

पक्षयोरुभयोरपि । शातातपः । गंधालंकारवस्त्राणि पुष्पमाल्यानुलेपनं । उपवासे न दुष्यंति दंतधावनमंजनं । हरिसं
तोषे । कांस्यं मांसं मसूरं च चणकं कोरदूषकं । शाकं मधु परान्नं च त्यजेदुपवसन् स्त्रियं । चनकं छोले इति । अत्रोपवसन्निति न
दिने भोजनासंभवात् सामीप्यात् पूर्वापरयोर्ग्रहणं । स्मृतिः शाकं मांसं मसूरं च पुनर्भोजनमैथुनं । द्यूतमत्यंबुपानं च दशम्यां
वैष्णवस्त्यजेत् । स्मृतिः प्रातःसंध्यां ततः कृत्वा संकल्पं बुध आचरेत् । वाराहे गृहीत्वौदुंबरं पात्रं वारिपूर्णमुदङ्मुखः
उपवासं तु गृह्णीयाद्यद्वा वाप्येवधारयेत् । एकादश्यां निराहारो भूत्वाहं चैवापरेऽहनि । भोक्ष्येऽहं पुंडरीकाक्ष शरणं मे
भवाच्युत । यद्वेति ताम्रपात्राभावे जलपात्रं गृहीत्वा संकल्पयेदित्यर्थः । कालमाधवीये धृतस्कांदे । उपवासं तु संकल्प्य
मंत्रपूतं जलं पिबेदिति । मंत्रमाह कात्यायनः । अष्टाक्षरेण मंत्रेण त्रिर्जपेनाभिमंत्रितं । उपवासफलं प्रेप्सुः पिबेत्पा
त्रगतं जलं । आचमनवन्नात्र दूषणं । ततः प्रार्थयेत् । ॐ इदं व्रतं मया देव गृहीतं पुरतस्तव । निर्विघ्नां सिद्धिमाप्नोतु व

९८

तिथि०

त्प्रसादाज्जनार्दन। ब्रह्मपुराणे एकादश्यां शुभे पक्षे निराहारः समाहितः। संपूज्य विधिवद् विष्णुं श्रद्धया सुसमाहितः। या
ति विष्णोः परं स्थानं नरो नास्त्यत्र संशयः। नरसिंहपुराणे। उपवासो नरश्रेष्ठ एकादश्यां विधीयते नरसिंहं समभ्यर्च्य सर्वे
पापैः प्रमुच्यते। द्वादशीमधिकृत्य कात्यायनः प्रातःस्नात्वा हरिं पूज्य उपवासं समर्पयेत्। ॐ अज्ञानतिमिरान्धस्य व्रतेना
नेन केशव। प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भव। मंत्रं जपित्वा हरये निवेद्यो पोषणं व्रती। द्वादश्यां पारणं कुर्याद् द्विजे
यित्वा ह्युपोदकीं। उपोदकी पूतिका शाकं। द्वादशी लंघने दोषमाह नारदीये महाहानिकरी ह्येषा द्वादशी लंघिता नृ
णां। कृष्ण कृष्ण कृपालुस्त्वं अगतीनां गतिर्भव। संसारार्णवमग्नानां प्रसीद मधुसूदन इत्यनेन निवेदयेदिति। विष्णुध
र्मोत्तरे। द्वादश्याः प्रथमः पादो हरिवासरसंज्ञकः। तमतिक्रम्य कुर्वीत पारणं विष्णुतत्परः। स्मृतिः कलार्द्धा द्वादशी
दृष्टा निशीथादूर्द्धमेव हि। आसंध्यान्ताः क्रियाः सर्वाः कर्त्तव्याः शंभुशासनात्। निशीथादूर्द्धं सार्द्धप्रहरत्रयोपरि। अत्रा

१००

सामर्थ्ये कात्यायनः संध्यादिकं भवेन्नित्यं पारणान्तु निमित्ततः। अदिनस्तु पारयित्वा तु नैत्यिकान्ते मुक्तिक्रिया। व्रतांते उपरा
णां। कांस्यं मांसं सुरां क्षौद्रं लोभं वितथभाषणं व्यायामं च व्यवायं च दिवास्वप्नं तथांजनं। शिलापिष्टं मसूरांश्च द्वादशैतानि वै
ष्णवः द्वादश्यां वर्जयेन्नित्यं सर्वपापैः प्रमुच्यते। वामनपुराणे एकादश्यां जगत्स्वामि शयनं परिकल्पयेत्। शेषाहिभोग
पर्यंकं कृत्वा संपूज्य केशवं अनुज्ञां ब्राह्मणेभ्यश्च द्वादश्यां प्रयतः शुचिः। लब्ध्वा पीतांबरधरं देवं निद्रां समालयेत्।
अनुज्ञां लब्धेत्यन्वयः। एकादशी समये दिवा घ्रयनीय परिकल्पनं रात्रौ द्वादशीप्रयोगो निद्रेति ॥*॥ अथचातुर्मास्यव्र
तविधिः। आषाढस्य सिते पक्षे एकादश्यामुपोषितः चातुर्मास्यव्रतानां तु कुर्वीत परिकल्पनं। नारदीये एकादश्यां च
गृह्णीयात् संक्रांत्यां कर्कटस्य वा। आषाढ्यां वा नरो भक्त्या चातुर्मास्यव्रतक्रियां। वृहं वाराहे आषाढशुक्लद्वादश्यां पौ
र्णमास्यामथापि वा। चातुर्मास्यव्रतारंभं कुर्यात् कर्कटसंक्रमे। अभावे तु तुलार्केपि मन्त्रेण नियमं व्रती। कार्तिके शुक्ल

१००

तिथि०

द्वादश्यां विधिवत् तत्समापयेत्। चतुर्ष्वपि हि तत्त्वीर्शो चात्र मोस्यं व्रतं नरः। कार्त्तिक्याः शुक्लपक्षे तु द्वादश्यां तत्समापयेत् मा
स्येचतुरो वार्षिकान्मासान् देवस्योत्थापनाविधि। मधुस्वरो भवेन्नित्यं नरो गुडविवर्जनात्। तैलस्य वर्जनादेव सुंदरांगः प्रजाय
ते। कटुतैलपरित्यागाच्छत्रुनाशः प्रजायते। लभते संततिं दीर्घां स्थालीपाकमभक्षयन्। सदा मुनिः सदा योगी मधुमांसस्य वर्ज
नात् निर्व्याधिर्नीरुगो नस्वी विष्णुभक्तः प्रजायते। एकांतरोपवासेन विष्णुलोकमवाप्नुयात्। धारणान्नखलोम्नां च गंगास्नानं
दिने दिने। नमो नारायणायेति जप्त्वाऽनशनजं फलं। पादाभिवंदनाद्विष्णोर्लभेद्गोदानजं फलं। एवमादिव्रतैः पार्थ तुष्टिमा
याति केशवः। सनत्कुमारः। ॐ इदं व्रतं मयादेव गृहीतं पुरतस्तव निर्विघ्नां सिद्धिमाप्नोतु प्रसन्ने त्वयि केशवे। गृहीतेऽस्मि
न्व्रते देव यद्यपूर्णे त्वहं म्रिये। तन्मे भवतु संपूर्णं त्वत्प्रसादाज्जनार्दन। समाप्नोतु ॐ इदं व्रतं मयादेव कृतं प्रीत्यै तव प्र
भो। न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्दन। अत्रैव यतिमधिकृत्य काठकगृह्ये। एकरात्रं वसेद्ग्रामे नगरे पंचरात्रकं। व

१०१

बोध्योऽन्यत्र वर्षो तु मासांश्चतुरो वसेत् । इत दशक्तविषयं । अशक्तविषये तु द्वंद्वं वार्षिकाणां मासानां नैकस्थानवासीति
शंखोक्तेः । मासेषु शेते विष्णुः सदाषाढे भाद्रे च परिवर्तते कार्त्तिके परिबुध्येत शुक्लपक्षरवे दिने भविष्यनारदीययोः । मैत्रा
द्यपादे स्वपितीह विष्णुर्वैष्णव्यमध्ये परिवर्ततेच । पौष्णावसाने च सुरारिहंता प्रबुध्यते मासचतुष्टयेन । मैत्रमनुराधा वै
ष्णवं श्रवणा पौष्णं रेवती । भविष्ये निशि स्वापो दिवोत्थानं संध्यायां परिवर्तनं । अन्यत्र पादयोगेऽपि द्वादश्यामेव कारयेत् । अ
न्यत्र स्वापादिविहितनरात्र्यादीतरकाले दशमीप्रतिपदोश्च किं तन्मैत्राद्यपादेन दशम्यंशेन यो दिवा । पौष्णशेषेण किं तेन प्र
तिपद्यथयो निशि । दशम्यंशेन दशम्या अंशो यत्र पादे तेन यः पादो दिवा वा प्राप्तस्तेन वा किं अत्र दशमीप्रतिपदोर्वर्जनात्त
दितरैकादश्यादिपंचतिथिषु मैत्रादिनक्षत्रपादविशेषलाभे द्वादशीं विनापि शयनादिरिति प्रतीयते । वचनांतरे रेवत्यंतो
पदो रात्रौ द्वादश्या च समायुतः । तदा विबुध्यते विष्णुर्दिनांते प्राप्य रेवतीं । दिनांते त्रिधा विभक्तदिनतृतीयभागे दिवोत्थानमि

१०१

तिथि०

स्पनुरोधात् । विष्णुधर्मोत्तरे । विष्णुर्दिवा न स्वपिति न रात्रौ प्रतिबुध्यते । द्वादश्या ऋक्षसंयोगे पादयोगो न कारणं । अप्रा
प्ते द्वादशी ऋक्षे उत्थानशयने हरेः । पादयोगेन कर्त्तव्ये नाहोरात्रे विचिंतयेत् । वराहपुराणं द्वादश्यां संधिसमयेन
ऋक्षनाम संभवे । आभाकासितपक्षेषु शयनावर्त्तनादिकं । आभाकानां आषाढ भाद्र कार्त्तिकानां । ततश्च द्वादश्यां
निशादौ नक्षत्रमात्रयोगात् द्वादश्यां ऋक्षाभावे तिथ्यंतरे निशाद्यन्तादरे वा पादविशेषयोगात् तदभावे द्वादश्यां संध्या
समये बोधनं द्वादश्यां रात्रौ रेवत्यंत पादयोगे दिनतृतीयभाग इति विशेषः । शयने मंत्रमाह वराहपुराणं ॐ नमो ना
रायणेत्युक्त्वा इदं मंत्रमुदीरयेत् । प्रसुप्तं मेघा घोपि मेघश्यामं सुपागतं सवमाने महीमिमां । निद्रां भगवान् गृह्णातु लो
कनाथ वर्षाश्चिमं पश्यतु मेघवृंदं । तात्वा च पश्चैव च देवनाथ मासांश्चत्वारि वैकुंठ स्वपतु पश्यनाथ । ॐ सुप्ते त्वयि जगन्ना
थ जगत्सुप्तं भवेदिदं विबुद्धे त्वयि बुद्धेत जगत्सर्वं चराचरं । इत्यनेन पूजयेत् । पार्श्वपरिवर्त्तने तु ॐ वासुदेव जगन्नाथ

प्राप्तेयं द्वादशी तव । पार्श्वेन परिवर्त्तस्व सुखं स्वपिहि केशव । त्वयि सुप्ते जगन्नाथ इत्यनेन पूजयेत् । नैयत्त कालिकल्प
नरो ब्रह्मपुराणं । कार्त्तिकशुक्लपक्षमधिकृत्य उपवासं प्रकर्त्तव्य एकादश्यां प्रजागरः द्वादश्यां वासुदेवस्य पूजितव्य
:प्रयत्नतः । उत्थानेतु महेन्द्ररुद्रैरभिनूयमानो भवानृषिवृंदैरिति वंदनीयः । प्राप्तात्वेयं किल कौमुद्याख्या जागृष्व जागृष्व
च लोकनाथ । मेघागता निर्म्मल पूर्णचंद्रः शरद्यपुष्पाणि च लोकनाथ । अहं ददानीति च पुण्यहेतोः जागृष्व जागृष्व च
लोकनाथ । उत्तिष्ठोत्तिष्ठ गोविंद त्यज निद्रां जगत्पते । त्वया चोत्थीयमानेन उत्थितं भुवनत्रयमिति पठेत् । मात्स्यपुरा
णे । यद्यपृष्यां चतुर्दश्यां द्वादश्यामथ भारत । अन्येष्वपि दिनर्क्षेषु न शक्तस्त्वमुपोषितुं । ततः पुण्यामिमां भीमतिथिं पा
पप्रणाशिनीं । उपोष्य विधिनानेन गच्छेद्विष्णोः परं पदमिति । भीमतिथिं भीमाख्येन ख्याता एकादशी विस्तारस्त्वेकादशी
तत्वे/नुसंधेयः । विष्णुधर्मोत्तरे मृगशीर्षे शशधरे माघे मासि प्रजायते । एकादश्यां सिते पक्षे सोपवासो जितेन्द्रियः द्वा

दश्यां षट्तिलाचारं कृत्वा पापात् प्रमुच्यते। तिलस्नायी तिलोद्वर्ती तिलहोमी तिलप्रदः। तिलभुक् तिलवापी च षट्
तिली नावसीदति। सकृत् षट्तिली भूत्वा सर्वपापैः प्रमुच्यते। त्रिंशद्वर्षसहस्राणि स्वर्गलोके महीयते।।॥ अथ
द्वादशी। सा चैकादशीयुता ग्राह्या युग्मात्। नारदीये। वैशाखे शुक्लपक्षे तु द्वादशी तिथिरीरिता। तस्यां शीतलतो
येन स्नापयेत् केशवं शुचिः। इयं पिपीतकी द्वादशी अत्र षष्ठी समेता कर्त्तव्या सप्तमी नाष्टमीयुता। पतंगोपास
नायेह षष्ठ्या माकुरूपोषणं एकादश्यां प्रकुर्वीत उपवासं मनीषिणः। उपासनाय द्वादश्यां विष्णोर्येद्वदियं तथा।
इति भविष्यपुराणेन। एकादश्युपवासानंतरं द्वादश्यां विष्णूपासनस्योक्तत्वात् अत्रापि तथा व्यवहरंतीति नात्र यु
ग्मादरः द्वादशीक्षये उपवासानंतर्ये विनापि पूजेति इयं पूर्ववचनोक्तषष्ठीयुता सप्तमी। आषाढद्वादश्यादिषु श
यनादिकं प्रागुक्तवचनात्। श्रावणेन समायुक्ता मासि भाद्रपदे सिता। द्वादशी सा महापुण्या नाम्ना तु विजयप्रदा इति

103

कालमाधवीय विष्णुरहस्यवचनात् भाद्रशुक्लद्वादश्यामेव। भविष्योत्तरे द्वादशी श्रवणोपेता सर्वपापहरा तिथिः।
बुधवारसमायुक्ता ततः शतगुणा भवेत्। तामुपोष्य समाप्नोति द्वादश द्वादशीफलं। उभयदिने तल्लाभे एकादशीयुता
ग्राह्या द्वादशी च प्रकृते त्वा एकादश्या युता विभो। सदा कार्या च विद्वद्भिर्विष्णुभक्तैश्च मानवैः इति स्कंदात्। यदा त्वेका
दश्यामेव श्रवणं तदा तामुपवसेत्। तथा च नारदः याः काश्चित्तिथयः प्रोक्ताः पुण्या नक्षत्रयोगतः। तास्वेव तद्व्रतं कुर्या
च्छ्रवणद्वादशीं विना। भविष्योत्तरेऽपि। एकादशी यदा तु स्यात् श्रवणेन समन्विता। विजया सा तदा प्रोक्ता भक्तानां विजय
प्रदा। तिथिनक्षत्रसंयोगे उपवासो यदा भवेत्। तावदेव न भोक्तव्यं यावन्नैकस्य संक्षयः। विशेषेण महीपाल श्रवणं व
र्द्धते यदि। तिथिक्षयेण भोक्तव्यं द्वादशीं नैव लंघयेत्। तिथिक्षयेण एकादशीक्षयेण भोक्तव्यं द्वादश्यां पारयेदित्यर्थः॥
अत्र हेतुर्द्वादशीमित्यादि। यदा त्वेकादश्युपवासदिने श्रवणं नास्ति परदिने द्वादश्यां तु श्रवणं तदोपवासद्वयमाह ब्रह्म

१०२

तिथि०

वैवर्ते: । एकादशीमुपोष्यैव द्वादशीमुपोषयेत् । नचात्रविधिलोपःस्यादुभयोर्देवता हरिः । अत्रच असमाप्ते व्रते पूर्वे
नैवकुर्य्याद्व्रतांतरमितिस्मृतेः । पारणास्याकरणेन पूर्वोपवाससमाप्त्यनुपवासांतरारंभे विधिलोपो न भवेदित्यर्थः ।
हेतुमाह उभयोरित्यादि उभयोः पूर्वापरयोः उभयोपवाससामर्थ्ये तु श्रवणद्वादश्यैवोपोष्या तथाच स्मृतिः । वरमे
कादशींमुक्त्वा द्वादशीमुपोषयेत् । पूर्वोपवासजं पुण्यं सर्वं प्राप्नोत्यसंशयं । तथाउपोष्य द्वादशीं पुण्यां विष्णुऋक्षेण
संयुतां । एकादश्युद्भवं पुण्यं नरः प्राप्नोत्यसंशयं । द्वादश्युपवासः काम्यः तथाच मार्कंडेयः द्वादश्यामुपवासेन सि
द्धात्मा नृप सर्वशः । चक्रवर्तित्वमतुलं संप्राप्नोत्यचलां श्रियं । अत्रकालिकापुराणा शक्रोत्थानविधिर्लिख्यते । अथा
तः शृणु राजेंद्र शक्रोत्थानं ध्वजोत्सवं । यत्कृत्वा भूपतिर्याति न कदाचित् पराभवं । अर्जुनश्चाश्वकर्णश्च प्रियकोधव
एवच । उदुंबरश्च पंचैते केतवर्थे सत्तमाः स्मृताः । अन्येच देवदार्वाद्याः शालाद्यास्तरवस्तथा । तंच वृक्षं तु देज्ञात्रैस्पृष्ट्वा

१०५

मंत्रमिमं पठेत्। उदत् छेदयेत्। ॐ यानि वृक्षेषु भूतानि तेभ्यः स्वस्ति नमस्तु वः। उपहारं गृहीत्वेमं क्रियतां वासवध्वज
:। ॐ पार्थिव त्वां वरयते स्वस्ति ते स्तु नगोत्तम। ध्वजार्थं देवराजस्य पूजेयं प्रतिगृह्यतां। तथापरेह्नि तं छित्वा मूलमष्टांगु
लं पुनः। जले क्षिपेत्तदग्रस्याप्छित्वैव चतुरंगुलं। ततो नीत्वा पुरं द्वारं केतुं निर्माययेत्तत्रवै। शुक्लाष्टम्यां भाद्रपदे केतुं वे
दीं प्रवेशयेत्। द्वाविंशहस्तमानं तु अधमः केतुरुच्यते। द्वात्रिंशत्तु ततो ज्यायान् द्वाचत्वारिंशदुत्तमः। कुमार्यः पंच
कर्तव्याः शक्रस्य नृपसत्तम। शानमध्यस्तुताः कार्य्या अपरा शक्रमातृका। केतोः पादप्रमाणेन कार्य्याः शक्रकुमारि
काः। मातृकार्द्धप्रमाणानि यंत्रं हस्तद्वयं तथा। एवं कृत्वा कुमारीश्च मातृकां केतुमेव च। एकादश्यां सिते पक्षे यष्टीना
मधिवासनं। अधिवास्य ततो यष्टिं गंधद्वारादिमंत्रकैः। द्वादश्यां मंडलं कृत्वा वासवं विस्तृतात्मकं। अच्युतं पूजयित्वा
च शक्रं पश्चात्प्रपूजयेत्। शक्रस्य प्रतिमां कृत्वा कानकीं दारवीं च वा। कानकी कनकमयी दारुमयी अन्यतेजसमूर्तां वा

तिथि०)

सर्वो भावेन तन्मयी । तां मंडलस्य मध्ये तु पूजयित्वा विशेषतः । ततः शुभे मुहूर्ते तु केतुमुत्थापयेन्नृप । उक्ते वज्रहस्तासुरारि
घ्न वज्रनेत्र पुरंदर । सोमार्थे सर्वलोकानां पूजेयं प्रतिगृह्यतां । एवं हि सर्वो मे रसिद्ध संघे रमिष्टो वज्रधरामरेश स
मुत्थितस्त्वं श्रवणाद्यपादे गृहाण पूजां भगवन्नमस्ते । इंद्रमंत्रेणानेनैव नानानैवेद्य वंदनैः । घटेषु दशादिक्पालानग्रतो
ऽस्य परिपूजयेत् । साध्यादीन् सकलान् देवान् मातृः सर्वाः प्रपूजयेत् । ततः शुभे मुहूर्ते च स्नानि वर्द्धकिसंयुतः । केतुस्था
पनभूमिं तु यत्नेव घाश्च पश्चिमे । विप्रैः पुरोहितैः सार्द्धं गच्छेद्राजा सुमंगलैः । रज्जुभिः पंचभिर्वद्धं यंत्रशिष्टं समातृकं
कुमारीभिश्च संयुक्तं दिक्पालानां च पट्टकैः । यथावर्णं यथादेशं योजितैर्वस्त्रवेष्टितैः । युक्तं तत्र किंकिनीजालैर्वृहद्घंटा
चचामरैः । चित्रमाल्याम्बरैश्चापि चतुर्भिरपि तोरणैः । उत्थापयेन्महाकेतुं राजामात्यैः शनैः शनैः । प्रतिमां तां नयेन्मूलं के
तोः शक्रं विचिंतयन् । यजेत्तु पूर्ववत्तत्र शचीमातलिमेव च । जयंतं तनयं तस्य गजमैरावतं तथा । ग्रहांश्चाप्यथ दिक्पालान्

105

सर्वोऽस्य गणा देवताः । पूजितानां च देवानां शम्बरो मे समाचरेत् । होमांते तु बलिं दद्याद् वासवाय महात्मने । तिलं घृतं चाक्षतं
च पुष्पं दूर्वां तथैव च । एतत्स्वनुकुर्यात्तान् स्वैः स्वै मंत्रैर्नरोत्तम । ततो होमवसाने तु ब्राह्मणानपि भोजयेत् एवं प्रपूजयेन्नित्यं
सप्तरात्रं दिने दिने । त्रातारमिति मंत्रोऽयं वासवस्य प्रियः स्मृतः । एवं कृत्वा दिवा भागे शक्रोत्थापनमादितः । श्रवणस्ते युतायां च
द्वादश्यां पार्थिवः स्वयं । अंत्यपादे भरण्यां तु निशि शक्रं विसर्जयेत् । सुप्तेषु सर्वलोकेषु यथा राजा न पश्यति । ॐ साऽद्य सुरासुरना
थोः पुरंदर शतक्रतो । उपहारं गृहीत्वेमं महेंद्र ध्वज गम्यतां । उत्पाते सप्तरात्रादि तथोपप्लव दर्शने । व्यतीत्य शतिभोमो
च अन्यस्मै च विसर्जयेत् । यस्मिं कस्मिन् दिने चैव सूतकांते विसर्जयेत् । तथा वस्तो नृपः केतुन पतेत् क्षुद्रेति येथा । शनैः शनैः
पातयेत्तु यथोत्थापनमादितः । विसृष्टं शक्रकेतुं तु सालंकारं तथा निशि । क्षिपेद् दनेन मंत्रेण अगाधे सलिले नृपः । ॐ तिष्ठ
केतो महाभाग यावत्संवत्सरं गते । भवाय सर्वलोकानां मंत्रराय विनाशकः । उत्पातोपद्रवैः सर्वलोकस्य वै पुनः । एवं

१०५

तिथि०

यः कुरुते पूजां वासवस्य महात्मनः । न तस्य राष्ट्रे दुर्भिक्षं नेतयो व्याधयोऽस्य च । ईतयश्च अतिवृष्टिरनावृष्टिः शलभा मू-
षिकाः खगाः । प्रत्यासन्नाश्च राजानः षडेते ईतयः स्मृताः । भविष्योत्तरे । इंद्रध्वजसमुत्थानं प्रमादान्न कृतं यदि । तदा द्वाद-
श मे वर्षे कर्तव्यं नागरापुनः । भैमीपर द्वादश्यां घट तिलाचारं कर्तव्यं प्राग्युक्त वचनात् । फाल्गुने शुक्लपक्षे तु पुष्यर्क्षे द्वाद-
शी यदि । गोविंदद्वादशी नाम महापातकनाशिनी ॥ अत्र गंगायां पद्मपुराणीयो मंत्रः । ॐ महापातकसंज्ञानि यानि पापा-
नि संति मे । गोविंदद्वादशीं प्राप्य तानि मे हर जाह्नवि ॥ * ॥ अथ त्रयोदशी । सा च शुक्ला द्वादशीग्राह्या । त्रयोदशी प्रक-
र्तव्या द्वादशी सहिता विभो इति ब्रह्मवैवर्तात् । कृष्णा तु परयुता । षष्ठ्यष्टमी त्वमावास्या कृष्णा चैव त्रयोदशी । एताः प-
रयुताः पूज्याः पराः पूर्वेण संयुताः इति निगमवचनात् परासप्तम्यादयः । एवं पूर्ववचनं शुक्लाविषयं । सामान्यविशेष-
न्यायात् । प्रौष्ठपद्यां कृष्णत्रयोदश्यां मघायुक्तायां अनिषिद्ध यत्किंचिद् द्रव्येण श्राद्धमावश्यकं शंखादिविधिवाक्येन श्र

106

त्र विशिष्टतिथिश्रुतेः। ततश्च केवलत्रयोदश्यां केवलमघाश्राद्धं वादा अपि क्लृप्तविशिष्टविधिप्राप्तकर्मेतरो नित्यत्व
बोधकाननुविद्धेतरकल्पकागौरवात्। तथा च शंखः पौष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीं प्राप्य श्राद्धं हि कर्तव्यं
मधुना पायसेन तु। मनुः यत्किंचिन्मधुना मिश्रं प्रदद्यात्तु त्रयोदशीम्। तदप्यक्षयमेव स्याद्वर्षासु च मघासु च। विष्णुधर्मो
त्तरे। पौष्ठपद्यामतीतायां तथा कृष्णात्रयोदशी। एतांस्तु श्राद्धकालान्वै नित्यानाह प्रजापतिः। शातातपः पितरः स्पृ
हयन्त्यन्नमष्टकासु मघासु च। तस्माद्दद्यात्सदायुक्तो विद्वत्सु ब्राह्मणेषु च। अत्रान्नमात्रश्रुतेर्मनुवचने यत्किंचिदिति
श्रुतेश्च। शंखोक्तपायसफलातिशयार्थः। गुणविशेषे फलविशेष इति न्यायात्। व्यक्तं विष्णुधर्मोत्तरे। मघायुक्ता
च तत्रापि शस्ता राजंस्त्रयोदशी। तत्राक्षयं भवेच्छ्राद्धं मधुना पायसेन च। तत्राश्वयुक्कृष्णपक्षे। तत्र यच्छ्राद्धं तन्मधु
योगेन पायसयोगेन वा अक्षयं भवेत्। अत एव मनुवचने यत्किंचिन्मधुना मिश्रमित्यनेन मधुमात्रयुक्तत्वमुक्तं अतो/

१०६

तिथि०)

त्र सुतरां शूद्रस्याधिकारः। अत्र गजच्छाया योगे फलातिशया। तथा कृत्यचिंतामणौ स्मृतिः। कृष्णपक्षे त्रयोदश्यां मघास्विं
दुः करे रविः। यदा तदा गजच्छाया श्राद्धे पुरोपेरवाप्यते। करे हस्तान हस्ते कन्या दशमांशोपरि सपादत्रयो विंशांश इतिया
वत्। अविभक्तानामप्यत्र पृथक् श्राद्धमावश्यकं। यथा श्राद्धचिंतामणौ स्मृतिः अविभक्ता विभक्ता वा कुर्युः श्राद्धमदैविकं।
मघासु च तथान्यत्र नाधिकारः पृथग् विना। अदैविकं प्रत्याब्दिकैकोद्दिष्टं। अन्यत्र कृष्णपक्षादौ नाधिकारः नित्याधिका
रः। सपिंडीकरणांतानि यानि श्राद्धानि षोडश। पृथङ् नैव सुताः कुर्युः पृथग्द्रव्या अपि क्वचित्। अत्रापि नाममुविनानाम
पृथग्द्रव्याणां पुंसां सपिंडीकरणांतानीति विशेषणात् तदुत्तर श्राद्धानां पृथक्त्वमपि प्रतीयते। मघात्रयोदशी श्राद्धे पुत्र
वता पिंडा न देयाः। भौजंगी तिथि मासाद्य यावच्चंद्रार्कसंगमं तत्रापि महती पूजा कर्तव्या पितृदैवते। कृष्णे पिंडदानं तु
ह्यैषे पुत्री विवर्जयेत् इति देवीपुराणात्। भौजंगी पंचमी चंद्रार्कसंगमो / मावस्या पितृदैवत कृष्णमघायां। शातातपः

107

पिंडनिर्वापरहितं यत्तु श्राद्धं विधीयते। स्वधावाचनलोपोऽत्र विकिरस्तु न लुप्यते। अक्षय्यं दक्षिणा स्वस्ति सौमनस्यं
यथास्थिति। विकिरोऽग्निदग्धपिंडः। स्कंदपुराणे वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी गंगायां यदि लभ्येत सूर्यग्रह
शतैः समा। वारुणं शतभिषा। शनिवारसमायुक्ता सा महावारुणी स्मृता। गंगायां यदि लभ्येत कोटिसूर्यग्रहैः समा। शु
भयोगसमायुक्ता शनौ शतभिषा यदि। महामहेति विख्याता त्रिकोटिकुलमुद्धरेत्। कुलं पुरुषमिति याज्ञवल्क्यदीपक
लिका। तथा च मेदिन्यां कुलं जनपदे गोत्रे सजातीयगणेपि च। भवने च तनौ क्लीबे कंटकार्यां मधौ कुली। अत्र संज्ञा वि
धेः सार्थकत्वाय निमित्तत्वेन मासपक्षतिथ्युल्लेखानंतरं महावारुणी महावारुण्यप्युल्लेखनीये श्राद्धे पार्वणादिसंगोल्ले
खवत्। पौर्णमास्यमावास्यायाः पक्षोल्लेखवच्च। मासपक्षतिथीनां च निमित्तानां च सर्वशः उल्लेखनं सकृद्वा स्नानेन तस्य
फलभाग्भवेदिति वचनात्। तेन चैत्रे मासि कृष्णे पक्षे त्रयोदश्यां तिथौ महावारुण्यां महामहावारुण्यां वेति यथायथं प्र

१०७

तिथि०

योऽयं। वारस्तु सूर्य्योदयात्सूर्य्योदयपर्य्यंतं तथाच सूर्य्यसिद्धांतः। सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा। मध्यमग्र
हभुक्तिश्च सावनेन प्रकीर्त्तिता। उदयादुदयाद्भानोर्भौमसावनवासराः। दिनाधिपस्य रव्यादेर्भोग्यं दिनवाररूपं सा
वनगणनोक्तं भौमेति पित्रादिदिनव्यावृत्यर्थं। कौर्म्मपाद्मयोः। द्वौ तिथ्यंतावेकवारे यत्र स स्याद्दिनक्षयः। वशिष्ठः एक
स्मिन्सावने त्वह्नि तिथीनां त्रितयं यदा। तदा दिनक्षयः प्रोक्तस्तत्र साहस्रिकं फलमित्येतयोरेकवाक्यतया पि तथावग
म्यते। रेखापूर्वापरयोरित्यादिकं तु ज्योतिःशास्त्रोक्तकालहोरादिज्ञानार्थमिति। संक्रांतिषु व्यतीपाते ग्रहणे चंद्रसू
र्य्ययोः। पुष्ये स्नात्वा तु गंगायां कुलकोटीः समुद्धरेदिति ब्रह्मपुराणे ग्रहणमात्रे त्रिकोटिकुलोद्धरणविधानात्। ततो
ऽधिकेषु वारुण्यादिषु उत्तरोत्तरगुरुषु महामहावारुण्यामपि यत्त्रिकोटिकुलोद्धरणमुक्तं तदुद्धरणगततारतम्ये
नाविरुद्धं। यं यं क्रतुमधीयेत तस्य तस्याप्नुयात्फलं इति याज्ञवल्क्योक्ताध्ययनादेर्यथा तत्तद्यागकरणेऽधिकं फलं श्र

108

तएव ग्रीष्मानामादरोपि तथेति । न चात्र स्नानं कुर्वीत यानाप्यश्राद्धे शतभिषांगते । सप्तजन्मभवेपुस्ताडुमेगा विधवाघ्र
वं । त्रयोदश्यां तृतीयायां दशम्यांच विशेषतः । शूद्रविट्क्षत्रियाः स्नानं नाचरेयुः कथंचनेति प्रचेतो जाबालवचनाभ्यां
स्त्रीणां शूद्रादीनां च स्नाननिषेध इति वाच्यं । भोगाय क्रियते यत्तु स्नानं यादृच्छिकं नरैः । तन्निषिद्धं दशम्यादौ नित्यं नै
मित्तिकेन तु इति हेमाद्रिधृतवचनेन रागप्राप्तस्नानस्यैव निषेधात् नक्षत्रेपि तथा कल्पनाच्च । अत्र त्रयोदश्यांपू
र्णायां पूर्वाह्नेतरकाले नक्षत्रादिसत्वे परदिने पूर्वाह्ने तिथिनक्षत्रलाभेपि पूर्वदिन एव स्नानं । तथाच कालमाध
वीये नारदीयं आदित्योदयवेलाया आरभ्य षष्टिनाडिकाः । तिथिस्तु साहि शुद्धा स्यात् सार्वतिथ्यो ह्ययं विधिः । अ
त्र पूर्वतिथेः शुद्धत्वाभिधानात् न परतिथेः शुद्ध्यभिधानं प्रतीयत इति । रात्रावपि गंगायां वारुण्यादि स्नानं । दिवारा
त्रौ च संध्यायां गंगायांच प्रसंगतः । स्नात्वाश्वमेधजं पुण्यं गृहेप्युद्धृतजलैरिति ब्रह्मांडपुराणे गंधर्ववाक्यंच । अ

१०८

तिथि०)

तो रात्रौ प्राप्नुवतो जलं ब्रह्मविदो जनाः । गर्हयंति जनान् सर्वान् वनस्थानृपतीनपि । तत्राज्ञेनस्य प्रतिवचनं । समुद्रे हि
सवत्पार्श्वे न घामस्या च दुष्मेते । रात्रावहनि संध्यायां कस्य गृह्य परिग्रहः । असंबाधा देवनदी स्वर्गसंपादिनी शुभा ।
कथमिष्टसि तां रोद्धुं नैष धर्मः सनातनः । अनिवार्य्यमसंबाधं तव वाचा कथं वयं । तस्पृशेम यथाकामं पुण्यं भागीरथी
जलमिति रात्रिंचराधिकारमुपक्रम्य आदिपर्वणि । सर्व एव शुभः कालः सर्वे देशास्तथा शुभः । सर्वो जनस्तत्र पात्रं स्ना
नादौ जाह्नवीजले । इति भविष्यपुराणोनच सामान्यतः प्रतिप्रसवात् । पात्रं अधिकारी । गृहस्थरत्नाकरे देवलः महा
निशानु विज्ञेया मध्यमं प्रहरद्वयं । तस्यां स्नानं न कुर्वीत काम्यनैमित्तिकादृते । अतो महानिशायामपि काम्यनैमित्ति
कस्नानं प्रतीयते । भविष्ये चैत्रशुक्लत्रयोदश्यां मदनं दमनात्मकं । कृत्वा संपूज्य विधिवद्वीजयेद्व्यजनेन च । तत्र संधु
क्षितः कामः पुत्रपौत्रविवर्द्धनः । कामदेवस्त्रयोदश्यां पूजनीयो यथाविधि । रतिप्रीतिसमायुक्तो ह्यशोकमणिभूषितः ।

१०७

दमनो दमनकवृक्षः। संघुष्ठितः प्रशीनः। कामदेवध्यानं तु। ॐ चापेषुधृक् कामदेवो रूपवान् विश्वमोहनः। तत्र मंत्र
:ॐ पुष्पधन्वने नमस्तेऽस्तु नमस्ते मीनकेतन। मुनीनां लोकपालानां धैर्यच्युतिकृते नमः। माधवात्मज कंदर्प संवरारे र
तिप्रिय। नमस्तुभ्यं जिताशेषभुवनाय मनोभुवे। आधयो मम नश्यंतु व्याधयश्च शरीरजाः। संपद्यतां ममाभीष्टं मे संपदः
संतु मे स्थिराः। नमो माराय कामाय देवदेवस्य मूर्त्तये। ब्रह्मविष्णुशिवादीनां धैर्यच्युतिकृते नमः। एवं यः कुरुते पूजामनं
नंगस्य महात्मनः। भवंति नापदस्तस्य तस्मिन्नब्दे कथंचन॥*॥ अथ चतुर्दशी। सा च शुक्ला पूर्णिमायुता ग्राह्या युग्मात्

१०८

कृष्णा पूर्वयुता। कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी। पूर्वविद्धैव कर्त्तव्या परविद्धा न कुत्रचित्। उपवासादिकार्ये
षु एष धर्मः सनातन इति निगमवचनात्। अपराह्णव्यापित्वे तु शुक्लचतुर्दश्यपि पूर्वविद्धा ग्राह्या चतुर्दशी तु कर्त्तव्या
त्रयोदश्या युता विभो। मम भक्तैर्महाबाहो भवेद्या चापराह्णिकी। दर्शे विद्धा न कर्त्तव्या राका विद्धा महामुने। इति स्कंदपुरा

तिथि०

स्यात्। मम भक्तैरिति ईश्वरोक्तेः शिवव्रतविषयं। त्रयोदश्यां दिवानत्तमुहूर्ते कृष्णचतुर्दश्यलाभे पुद्मपुराणं। एकादश्य
ष्टमी षष्ठी उभे पक्षे चतुर्दशी। अमावस्या तृतीया च उपोष्याः स्युः परान्विताः। एतद्विषये एव शिवा घोरा तथा प्रेता सावि
त्री च चतुर्दशी। कृत्युक्तैव कर्तव्या कुम्भामे वहिपारणं। इति यमवचनं। यमः दत्वाञ्जलाञ्जलीन् सप्त कृष्णपक्षे चतुर्दशी
धर्मराजं समुद्दिश्य सर्वपापैः प्रमुच्यते। लिंगपुराणे। उपवासश्चतुर्दश्यां महापातकनाशनः। पराशरः मेषे वा वृषभे वा
पि सावित्रीं तां विनिर्दिशेत्। तां चतुर्दशीं। ज्येष्ठकृष्णचतुर्दश्यां सावित्री मत्र्यैयंति याः। वटमूले सोपवासा न ता वैधव्यमाप्नु
युः। राजमार्तण्ड कृत्यचिंतामण्योः। ज्येष्ठमासि चतुर्दश्यां सावित्रीव्रतमुत्तमं। अवैधव्याय कुर्वंति स्त्रियः श्रद्धासमन्वि
ताः। व्रतमात्रे/नंतचतुर्दशी वदाचरंति। दृष्टपरिकल्प्यन्यायात् तदुक्तं मत्स्यपुराणे। गर्भिणी सूतिका नक्तं कुमारी च
रजस्वला। यदाशुद्धा तदान्येन कारयेत् क्रियते सदा। उपवासाशक्तौ नक्तं भोजनं कुर्वीत। उपवासेष्वशक्तानां नक्तं भोजनमि

110

ष्यते इति तद्धित वचनात्। अशुद्धा चेत् पूजां कारयेत् कायिकोपवासादिकं सदा शुद्ध्या शुद्ध्या वा स्वयं क्रियते। ए
वमेव स्मृति परिभाषायां वेदमानोपाध्यायाः। नारदः दिवाभागे त्रयोदश्यां यदा चतुर्दशी भवेत्। तत्र पूज्या महासाध्वी दे
वी सत्यवतासह। दिवाभागे दंड द्वयमात्र सत्वेपि अत एव प्रदोषे व्रतमाचरंति। पूर्वाह्णे तद्विधत्वेपि पराह्णे त्रिसंध्यव्यापि
त्वे पराह्ण एव त्रिसंध्यव्यापिनीति वचनात्। यदा तु पूर्वापरयोर्न तथाविधा पराह्ण एव। यथा ज्योतिषे चतुर्दश्या ममावास्या
यदा भवन्नारद उपोष्य पूजनीया सा चतुर्दश्यां विधानतः। सा सावित्री ततश्चामावस्यायां सावित्रीव्रतविधानं शिवाघो
रेति वचनं चैतत्परं। पराशरः सावित्रीमद्वेयित्वा च फलाहारा परेहनि। ततश्चाविधवा नारी वित्तभोगीन्लभेत्सदा।
भविष्योत्तरे भाद्रे मासस्य सिते पक्षे अघोराख्या चतुर्दशी तामुपोष्य नरो याति शिवलोकमयत्नतः। भविष्ये अनंतव्रत
मेतद्धि सर्वपापहरं शुभं। सर्वकामप्रदं नृणां स्त्रीणां चैव विशेषतः। तथा शुक्ल चतुर्दश्यां मासि भाद्रपदे भवेत्। तस्यां

११०

तिथि०

ध्यानमात्रेण सर्वं पापं प्रणश्यति । व्रतारंभप्रतिष्ठयोर्वर्ज्ये कालमाहज्योतिषे । गुरोर्भृगोरस्तबाल्ये वार्द्धके सिंहगे गुरौ वक्रि-
णी वा पृथिवीशेऽह्नि गुर्वादित्ये दशाहिके । पूर्वराशावनायाताऽतिचारि गुरुवासरे । प्राग्राशिं गते जीवस्य चातिचारे त्रिपक्षके
कं पापग्रहद्युतसप्ताहे नीचस्थेऽप्यमलिम्लुचे । मातुलङ्घितके मासि क्षये राहुयुते गुरौ । पौषादिकचतुर्मासे चरणां किल व-
र्षेशो । एकेनाह्ना चैकदिने द्वितीयेन दिनत्रये । तृतीयेन तु सप्ताहे मंगल्यानि विवर्जयेत् । विद्यारंभकर्णवेधौ चूडोपनय-
नोद्वहान् । तीर्थस्नानमनावृत्तं तथानादि सुरेक्षणं । परीक्षारामयज्ञांश्च पुरश्चरणदीक्षणे । व्रतारंभप्रतिष्ठे च गृहारंभ-
प्रवेशने । प्रतिष्ठारंभणे देवकूपादे परिवर्जयेत् । द्वात्रिंशद्दिवसाश्चास्ते जीवस्याग्रे वस्यतु । द्विसप्ततिमेत्यस्ते पादास्ते
द्वादशकमात् । अस्तात् प्राक् परयोः पक्षं गुरोर्वार्द्धकबालते । पक्षं वृद्धो महास्तेतु भृगुर्बालो दशाहिकः । पादास्तेतु दशाहा-
नि वृद्धो बालो दिनत्रयं । तेच मध्याह्ने भोज्यवेलायां समुत्तीर्य सरित्तटे । ददर्श शीलासास्त्रीणां समूहं रक्तवाससां । चतुर्दृश्या

॥१॥

मन्त्रैर्यन्त तत्र देवं पृथक्पृथगिति भविष्योत्तरीयान्मध्याह्न व्यापिनी तिथि ग्राह्येति वाच्यं पूर्वाह्णो वै देवानामिति श्रुत्यादि
भिः पूर्वाह्णस्य देवकार्ये विधानात् विरुद्ध समभिव्याहृतार्थवादे तद्विधायोगात् किन्तु तस्यैव गौणकाल बोधकं तत् । काल
माधवीयेप्येवं भविष्येपि पूजाविधायकेन मध्याह्नो नोक्तः । यथा कृत्वा दर्भमयानन्तं [illegible] वारि धान्यानि वेश्य च । पूजयेद्गन्ध
पुष्पाद्यैर्नैवेद्यैर्विविधैरपि । चतुर्दश फलैर्मूलैर्जलजैः कुसुमैरपि । यवगोधूमशालीनां चूर्णेनैकतमस्य च । कृत्वापूप
द्वयं तस्मै दद्यादेकं घृतान्वितं । स्वयमेकं तु भुंजीत करे बध्वा सुडोरकं । चतुर्दश ग्रन्थियुक्तं कुंकुमेन विलेपितं । सुविन्यस्त
विष्णुनाम प्रतिग्रन्थि समन्वितं । चतुर्दश सूत्रमयं कार्पासस्यैकमेव च । पूजा डोरक मंत्रस्तु रत्नाकरे । अनन्त संसार महासमु
द्रे मग्नान् समभ्युद्धर वासुदेव । अनन्त रूपेण नियोजयस्व अनन्त रूपाय नमो नमस्ते । इति मंत्र मुक्त्वा अनेन डोरक बद्ध्वा भो
क्तव्यं सुस्थ मानसैरित्युद्दे भविष्योत्तरीयं काल कौमुद्यां लिखितमिति । तथा पापोहं पापकर्माहं पापात्मा पापसंभवः त्रा

११२

तिथि०

हि मां पुण्डरीकाक्ष सर्वपापहरो भव। अद्य मे सफलं जन्म जीवितं च सुजीवितं। यत्तवांघ्रियुगाब्जाग्रे मूर्द्धा मे भ्रमरायितः इत्या
भ्यां नमस्कुर्यात्। अनंतकथामप्यत्र शृण्वंति। नैगे कार्त्तिके कृष्णपक्षस्य तु चतुर्द्दश्यां दिनोदये। अवश्यमेव कर्त्तव्यं स्नानं नरक
भीरुभिः। अपामार्गपल्लवं च भ्रामयेच्छिरसोपरि। ततश्च तर्पणं कार्यं धर्मराजस्य नामभिः। नरकाय प्रदातव्यो दीपः संपूज्य
देवताः। नरकाय नरकनिवृत्तये। अर्थाभिधेयरैवस्तु प्रयोजननिवृत्तिष्विति निवृत्तावपि तादर्थ्ये इत्यनेन चतुर्थी विधाना
त्। अपामार्गभ्रमणे मंत्रः शीतलोष्टसमायुक्त सकंटकदलान्वितः। हर पापमपामार्ग भ्राम्यमाणः पुनः पुनः। ततः प्र
दोषसमये दीपान् दद्यात्प्रयत्नतः। ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु च। कार्त्तिके भौमवारे च चित्राकृष्णचतुर्द्दशी।
तस्यामाराधितः स्थाणुर्लोके शिवपुरं ध्रुवं। यां कांचित्सरितं प्राप्य कृष्णपक्षे चतुर्द्दशी। यमुनायां विशेषेण नियतस्तर्पयेद्
यमान्। यमाय धर्मराजाय मृत्यवे चांतकाय च वैवस्वताय कालाय सर्वभूतक्षयाय च। ॐ उडुंबराय दध्नाय नीलाय परमेष्ठिने

वृकोदराय चित्राय चित्रगोप्ताय वै नमः। एकैकस्य तिलैर्मिश्रांस्त्रीन्दद्याज्जलाञ्जलीन्। संवत्सरकृतं पापं तत्क्षणादेव नश्य
ति। अत्राचाराच्चतुर्दश शाकभक्षणं च कर्त्तव्यं। तत्र निर्णयामृतधृतं। उक्तं केमुक वास्तूकं सर्षपं कालं च निम्बजयां शाल
ञ्ची हिलमोचिकां च पटुकं सौल्फं गुडूचीं तथा। मण्टाकीं मुनिमरावकं शिवदिने खादन्ति ये मानवाः। प्रेतत्वं न च यान्ति कार्त्तिक
दिने कृष्णे च भूते तिथौ। जयां जयन्तीं पटुकं पटोलं। भविष्ये वृश्चिके शुक्लपक्षे तु या पाषाणचतुर्दशी। तस्यामाराधयेद्गौ
रीं नक्तं पाषाणभक्षणैः। पाषाणाकारपिष्टकभोजनैः। यमः माघे मासि सिते पक्षे रटन्त्याख्या चतुर्दशी
तस्यामुदयवेलायां स्नातानावेक्षते यमं। उदयवेलायां अरुणोदयवेलायां। अनकोभ्युदिते काले माघे कृष्णचतुर्दशीस
तारव्योमकालेषु तत्र स्नानं महाफलं। स्नात्वा संतर्प्य तु यमान् सर्वपापैः प्रमुच्यते। अत्र तिथिकृत्यचाद्यौ राचंद्रोदरः। अत्रा
रुणोदय एव स्नानं प्रागुक्तचतुर्दशायेमतर्पणं च। यत्तु उदयवेलायां सूर्योदयवेलायां अनकोभ्युदित इति तदर्थे नज्ञव्याख्या।

तिथि०

नं ततः समुद्रकरमाघ्यधृत सतारत व्योमेत्युद्योतनवलोकनेनेति ॥*॥ अथ शिवरात्रिव्रतं। कालमाधवीये स्कांदे नागर
खंडे। माघमासस्य शेषे या प्रथमे फाल्गुनस्य च। कृष्णचतुर्दशी सा तु शिवरात्रिः प्रकीर्तिता। अत्रैकस्यास्तिथेर्माघीयत्व
फाल्गुनीयत्वे गौणमुख्यवृत्तिभ्यां। ततस्तु माघ्यनंतरा चतुर्दशी शिवरात्रिः। अस्यामुपवासः प्रधानं न स्नानेन न वस्त्रेण न
धूपेन न चार्चया। तुष्यामि न तथा पुष्पैर्यथा तत्रोपवासतः इति शंकरोक्तेः स्कांदे ततो रात्रौ प्रकर्त्तव्यं शिवप्रीणनतत्परैः
प्रहरे प्रहरे स्नानं पूजा चैव विशेषतः। अत्र वीप्सया प्रहरचतुष्टयसाध्यव्रतं प्रतीयते। नरसिंहाचार्यधृतेश्वरसंहि
तायां शैवो वा वैष्णवो वापि यो वा स्यादन्यपूजकः सर्वपूजाफलं हंति शिवरात्रिबहिर्मुखः। संवत्सरप्रदीपे। दुग्धेन प्र
थमं स्नानं दध्ना चैव द्वितीयके तृतीयेन तथाज्येन चतुर्थे मधुना तथा। ईशानसंहितायां। माघकृष्णचतुर्दश्यां रविवारो य
दा भवेत्। भौमो वापि भवेद्देवि कर्त्तव्यं व्रतमुत्तमं। शिवयोगस्य योगेन तद्भवेदुत्तमोत्तमं। शिवरात्रिव्रतं नाम सर्वपापप्रणा

113

शानं। आचांडालमनुष्याणां भुक्तिमुक्तिप्रदायकं। नागरखंडे। उपवासप्रभावेन बलादपि च जागरात् शिवरात्रेस्तथा तस्य
लिंगस्यापि प्रपूजया। अक्षयाल्लभते लोकान् शिवसायुज्यमाप्नुयुः। पाद्मे वर्षे वर्षे महादेवि नरो नारी पतिव्रता। शिवरात्रौ म
हादेवं कामं भक्त्या प्रपूजयेत्। ईशानसंहितायां। एवमेतद्व्रतं कुर्यात् प्रतिसंवत्सरं व्रती। द्वादशाब्दिकमेतद्धि चतुर्विंशाब्दि
कं तथा। सर्वान् कामानवाप्नोति प्रेत्य चेह च मानवः। हेमाद्रिधृता स्मृतिः प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्दशी। प्रदोष
माह वत्सः प्रदोषोऽस्तमयादूर्ध्वं घटिकाद्वयमिष्यते। ऊर्ध्वमनेनांतरं। वायुपुराणे। त्रयोदश्यस्तगे सूर्ये चतसृष्वेव नाडिषु
। भूतविद्धा तु या तत्र शिवरात्रिव्रतं चरेत्। ईशानसंहितायां। माघकृष्णचतुर्दश्यामादिदेवो महानिशि। शिवलिंगतयोद्भूतः
कोटिसूर्यसमप्रभः। तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिः। अर्द्धरात्रादधश्चोर्ध्वं युक्ता यत्र चतुर्दशी। व्याप्ता सा दृश्यते य
स्यां तस्यां कुर्याद्व्रतं नरः। अत्र महानिशा द्वे घटिके रात्रेर्मध्यमयामयोरिति देवलोक्ता महानिशा घटिकात्र दंडः। एवं च यदि

११२

तिथि

ने प्रदोष निशीथोभय व्यापिनी चतुर्द्दशी तद्दिने व्रतं । उभय व्याप्त्यनुरोधात् । कालमाधवीये प्येवं एतेन परदिने उभयव्यापि
त्वेपि पूर्वदिवसीय रात्रि द्वितीय यामप्रभृति चतुर्द्दशी सत्वे चतुष्प्रहर व्यापिनीत्वेन पूर्वदिन एव व्रतमिति निरस्तं । यदातु
पूर्वेद्युर्निशीथ व्याप्तिः परेद्युः प्रदोष मात्र व्याप्तिस्तथा पूर्वेद्युर्व्रतं प्रधान काल व्याप्त्यनुरोधात् । पूर्वेद्युरपरेद्युर्वा महानि
शि चतुर्द्दशी । व्याप्ता स्यादृश्यते यस्यां तस्यां कुर्य्याद्व्रतं नरः इतीशान संहिता वचनाच्च एतद्विषय एव भविष्यपुराणं अर्द्धरा
त्रात् पुरस्तात्तु जया योगो भवेद्यदि । पूर्वविद्धैव कर्त्तव्या शिवरात्रिः शिव प्रियैः । विष्णुधर्मे । जयंती शिवरात्रिश्च कार्य्ये
भद्रजयान्विते । कृत्वोपवासं तिथ्यंते न दा कुर्य्यात्तु पारणं । तिथ्यंते पारणं तु जयंती मात्रपरं अत्र चतुर्द्दश्यामेव तत् । ब्रह्मा
ण्डोदरमध्ये तु यानि तीर्थानि संति वै । पूजितानि भवंतीह भूतायां पारणे कृते । इति स्कंदात् । दिनमान प्रमाणेन यावद्रात्रौ चतु
र्द्दशी । शिवरात्रिस्तु सा ज्ञेया यावच्चतुर्द्दश्यां तु पारणमिति गौतमीयाच्च । यदा तु न पूर्वे दिने न निशीथ व्याप्तिः परदिने प्रदोष व्या

११५

पिनी तदा परा ग्राह्या प्रदोषव्यापिनीति प्राग्युक्तात् । एतद्विषयमेव लिंगपुराणं । शिवरात्रिव्रते भूतां कामविद्धां विवर्जये
त् एकैनैवोपवासेन व्रतसेह त्यां व्यपोहति अत्रामावस्यायामेव पारणं । शिवा घोरा तथा प्रेता सावित्री च चतुर्दशी कुहू
युक्ते व कर्तव्या कुम्भामेव हि कारणामिति वचनात् ॥*॥ तदयं संक्षेपः । यदि हि ने प्रदोषनिशीथोभयव्यापिनी चतुर्दशी त
द्दिने व्रतं । यदा तु पूर्वेद्युर्निशीथव्यापिनी परेद्युः प्रदोषमात्रव्यापिनी तदा पूर्वेद्युर्व्रतं । यदा तु न पूर्वेद्युर्निशीथव्यापि
: परे दिने प्रदोषव्यापिनी तदा परदिने । पारणं तु परदिने चतुर्दशी लाभे चतुर्दश्यां तदलाभे ऽमावस्यायां । तत्र प्रयोगः
। प्रातरुदङ्मुखः । ॐ नमः सदिग्भुम्बाप्ये सूर्यः सोम इति पठित्वा जलादीनादाय संकल्प मंत्रेणानेन गृह्णीयान्नियमं मतिमा
न्नरः । शिवरात्रिव्रतं ह्येतत् करिष्येहं महाफलं । निर्विघ्नमस्तु मे चात्र त्वत्प्रसादाज्जगत्पते । इति शिवरहस्यात् । शिव
रात्र्यां त्वादिना नियमस्य जलादीन्यादाय । चतुर्दश्यां निराहारो भूत्वा शंभो परेहनि । भक्ष्येहं भुक्तिमुक्त्यर्थं शरणं मे भवेश्वर इति

११४

तिथि०

पठेत्। रात्रौ प्रथमप्रहरे प्रतिष्ठिते लिंगे ऽप्रतिष्ठिते वा प्रतिष्ठां विधाय पूजां कुर्य्यात् हः अस्त्राय फडिति पादत्रयघाते
न विघ्ननिःसार्य्य तेनैव तालत्रयेन करच्छोटिकायाश्च दशदिग्बंधनं कृत्वा भूतशुद्धिं विधाय हां रुद्राय नम इति हृदये
ह्रीं शिरसे स्वाहेति शिरसि हूं शिखायै वषडिति शिखायां हैं कवचाय हुं इति कराभ्यां सर्वांगसमार्ज्य हौं नेत्रत्रयाय वौ
षडित्यंगुलित्रयं नेत्रत्रये हः अस्त्राय फट् इति हौमिति मंत्रेण प्राणायामं विधाय पूजयेत् पार्थिवशिवलिंगे चेत्तदा
वक्ष्यमाणपूजाविधिना पूजयेत्। तत्रायं विशेषः ॐ हौं ईशानाय नम इति प्रथमप्रहरे दुग्धेन स्नापयित्वा पुनर्जलेन
स्नापयित्वा शिवरात्रिव्रतं देव पूजाजपपरायणः। करोमि विधिवद्दत्तं गृहाणार्घ्यं महेश्वर इत्यनेनार्घ्यं दत्वा गंधादि
भिः संपूज्य जपित्वा प्रणम्य गीतनृत्यादिभिस्तं प्रहरं नयेत्। तद्ध्यानं तज्जपः स्नानं तत्कथाश्रवणादिकं उपवासकृतो
ह्येते गुणाः प्रोक्ता मनीषिभिरिति देवीपुराणे सामान्यतः श्रवणादत्रापि तथा। द्वितीयप्रहरे तु विशेषः। ॐ हौं अघोरा

यनम इति दध्ना स्नानं अर्घ्यमंत्रस्तु ॐ नमः शिवाय शान्ताय सर्वपापहरायच शिवरात्रौ ददाम्यर्घ्यं प्रसीद उमयासह।
तृतीयप्रहरे ॐ ह्रौँ वामदेवायनमः इति घृतेन स्नपनं अर्घ्यमंत्रस्तु ॐ दुःखदारिद्र्यशोकेन दग्धोहं पार्वतीश्वर शिवरा
त्रौ ददाम्यर्घ्यं मुमाकान्त गृहाणमे ॥ चतुर्थेतु ॐ ह्रौँ सद्योजातायनम इति मधुना स्नपनं अर्घ्यमंत्रस्तु ॐ मया कृतान्यने
कानि पापानि हर शंकर। शिवरात्रौ ददाम्यर्घ्यं मुमाकान्त गृहाणमे। ततः ॐ नमः शिवायेति मूलमंत्रं जपित्वा प्रभाते(वि
घ्नेनेत्यादिमंत्रान्पठेत् तथाच गरुडपुराणे मूलमंत्रं यथाजप्त्वा प्रभाते तत्समापये। ॐ अविघ्नेन कृतं देव त्वत्प्रसादात्स

115

मर्पितं। स्वामिन्सर्वजगतां नाथ त्रैलोक्याधिपते हर। यन्मयाद्य कृतं पुण्यं तद्रुद्रस्य निवेदितं। त्वत्प्रसादान्मयादेव व्रतम
द्यसमर्पितं। प्रसन्नोभवमेश्रीमन्मद्भूतिं प्रतिपद्यतां। तदालोकनमात्रेण पवित्रोस्मि नसंशयः। परदिने ब्राह्मणान्भोजयि
त्वाचतुर्दशीलाभे तत्र तदभावे त्वमावस्यायां पारणं कुर्यात्। तत्र मंत्रः ॐ संसार क्लेशदग्धस्य व्रतेनानेन शंकर प्रसीदसुमुखो

तिथि०)

नाथ ज्ञान दृष्टि प्रदो भव ॥०॥ अथ पार्थिव शिवलिंग पूजा विधिः शिव वाक्यानुसारे विप्रस्य च सदैवाहं शुचेरप्यशुचेर
पि । गृह्णन्वै लिंगं प्रवक्ष्यामि विप्राणां शिव दर्शनात् वै लिंगं पूजां । तथा शूद्रः कर्म्मणि यो नित्यं स्त्री यानि कुरुते प्रिये । तस्या
त्सर्वान् गृह्णामि चंडखंड विभूषिते । तथा नमोऽन्तेन शिवे नैव स्त्रीणां पूजा विधीयते । एवकारेण प्रणव निवृत्तिः । एवं शू
द्रोपि तथा च नृसिंह तापनीये । सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्री शूद्रयोर्नेच्छंति । सावित्रीं प्रणवं यजुर्लक्ष्मीं यदि स्त्री शूद्रो ।
जानीयात् स मृतोऽधोगच्छतीति नेच्छंतीति पर्य्यंतं पराशर माधवेपि गोविंद भट्ट धृतं स्वाहा प्रणव संयुक्तं शूद्रे मंत्रं ददद्वि
जः शूद्रो निरय माप्नोति ब्राह्मणः शूद्रतामियात् । रात्रौ चोदङ्मुखः कुर्यात् देवकार्य्ये सदैव हि । शिवार्च्चनं सदाप्येवं शुचि
ः कुर्यादुदङ्मुखः । सदा दिवा रात्रौ । अत्र हेतुमाह रुद्रयामले । न प्राची मग्रतः शंभोर्नोदीचीं शक्ति संस्थितां । न प्रतीचीं य
तः पृष्ठ मतो दक्षं समाश्रयेत् । यजमानः शंभोः प्राची मवस्थित येन समाश्रयेत् शंभो जगत्संहारकस्याग्रतः सम्मुखतः ।

116

पंचवक्त्रपक्षे प्रधानं वक्त्रं प्राच्यवस्थितं । एकवक्त्रपक्षे तु नरांतथा । तद्रूपमाहात्म्ये दित्यपुराणे । सोमस्य मौलीं तु मुक्तमुखमे
कवक्त्रं चतुर्भुजं । शूलपंकजहस्तं च वरदाभयपाणिकं । आयाताक्षं सुरैराध्यं सर्वाभरणभूषितं । शिवरूपं गृहे कु
र्यात् प्रासादे वाप्यनिंदितं । अत्राग्रे पूजानिषेधात् । देवाग्रे स्वस्य चाप्यग्रे प्राची प्रोक्ता गुरुकर्मणि इत्यस्य न विषयः ।
किं त्वभिधानादिप्रसिद्धप्राची एतदनुसारादेव पूर्वोद्याग्रेष्यत पूजा । अत एव तंत्रांतरं । यत्रैव भानुस्तु वियत्युदेति
प्राचीति तां वेदविदो वदंति । अतोऽपरां पूजकपूज्ययोस्तु सदागमज्ञाः प्रवदंति तां तु । एवं च देवांतरपूजा पूर्वोक्ते प्राङ्
मुखेन सायं पश्चिमाभिमुखेन रात्रावुदङ्मुखेन कार्या । प्राक्पश्चिमोदगास्यश्च सायंप्रातर्निशासु चेति वचनादिति वाच
स्पतिमिश्रः । सैवं पूजारत्नाकरोक्त भविष्यपुराणीय सप्ताक्षरसूर्यमंत्रप्रस्ताव एव प्रागादिदिङ्नियमा अभिधानात् व्यवहा
रेऽप्यन्यत्र नतथेति । लिंगपुराणे विना भस्मत्रिपुंड्रेन विना रुद्राक्षमालया । पूजितोपि महादेवो न स्यात्तस्य फलप्रदः । तस्मा

११६

तिथि० ३

न्मृदापि कर्तव्यं ललाटेपि त्रिपुंड्रकं । संवत्सरप्रदीपे । त्रिपुरस्यवधेकाले रुद्रस्याक्ष्णो ऽपतं स्तुये । अश्रुणो बिंदवस्तेनरु
द्राक्षा अभवन्भुवि । यद्यपि एकादिचतुर्दश मुखरुद्राक्षेषु फलमंत्रविशेषाः संति तथापि तुल्यभावात् पंचवक्त्रे फलमंत्रौ
विधीयते । यथास्कंदे पंचवक्त्रः स्वयं यत्र कालाग्निर्नाम नामतः । अगम्यागमनाच्चैव अभक्ष्यस्य च भक्षणात् । मुच्यते सर्व
पापेभ्यः पंचवक्त्रस्य धारणात् ॐ ह्रां नम इति शिवाज्ञसा प्रक्षाल्य धारणीयं । विनामंत्रेण यो धत्ते रुद्राक्षं भुवि मानवः स
याति नरकं घोरं यावदिंद्राश्चतुर्दश । नंदिपुराणे आयुष्मान् बलवान् श्रीमान् पुत्रवान् धनवान् सुखी । वरमिष्टं लभेल्लिंगं
पार्थिवं यः समर्चयेत् । तस्मात्तु पार्थिवं लिंगं ज्ञेयं सर्वार्थसाधकं । भविष्ये मृद्भस्मगोशकृत्पिंडं ताम्रं कांस्यमयं तथा । कृ
त्वा लिंगं सकृत्पूज्य वसेत्कल्पायुतं दिवि । वार्क्षे वृत्तप्रदं लिंगं स्फाटिकं सर्वकामदं । नर्मदागिरिजं श्रेष्ठं मन्यदपि हि लिंगव
त् । कृत्वापूजय विप्रेंद्र लप्स्यसे वांछितं फलं । लिंगवत् लिंगाकारं । कालकौमुद्यां अशक्तादल्पपरीमाणेन लिंगं कुर्वचिन्नरः

कुर्वीतांगुष्ठतो ह्रस्वं न कदाचित्समाचरेत् अष्टो/रतीतिरत्तिकाः तथा चामरः गुंजाः पंचाद्यमाषकाः ते षोडश शा
णः कर्षोस्त्रीति। अंगुष्ठतः ते बृहत् पर्वग्रथितः। अंगुष्ठांगुलिमानं तु यत्र यत्रोपदिश्यते। तत्र तत्र बृहत् पर्वग्रथिभिर्मि
नुयात्सदेति छंदोगपरिशिष्टात्। शिवधर्मे। सहस्रमत्त्वं ये ल्लिंगं निरयं सन गच्छति। रुद्रलोकमवाप्नोति मुक्त्वा भोगान
नुत्तमान्। तथा वालुकानि च लिंगानि पार्थिवानि च कारयेत् सहस्रपूजनात्सोपि लभते वांछितं फलं। ततस्त्वामुकति
था वारभ्यामुकलाभकामः सहस्रमित पार्थिव शिवलिंग पूजामितिच यथास्थानं वाक्यदेयं। ब्रह्मपुराणे यावन्न
दीयते चार्घ्यं भास्कराय निवेदितं। तावन्न पूजयेद्विष्णुं शंकरं वा महेश्वरीं। राघवभट्ट धृतं। सर्वत्रैव प्रशस्तो ब्रः शि
वसूर्ययोस्तु नं विना। अब्रः शंखः तल्लिंगैः पूजयेन्मंत्रैः सर्वे देवान् पृथक पृथक। ध्यात्वा प्रणव पूर्वं तु तन्नाम्ना सुसमाहित
ःनमस्कारेण पुष्पादि विन्यसेत्तु पृथक पृथक्। देवीपुराणे। मृदाहरणसंघट्ट प्रति षाभ्यानमेव च। स्नपनं पूजनं चै

व विसर्जने मतः परं । हरो महेश्वरश्चैव शूलपाणिः पिनाकधृक् । पशुपतिः शिवश्चैव महादेव इति क्रमात् । तत्र पूर्वोक्तसर्वक
र्माणि परवचनोक्तसप्तनामभिः । क्रियानुरूपविभक्तिमद्भिर्यथायथं कार्याणि अदृष्टार्थे क्रमाग्रमवेन पाठक्रमादेवावा
हनात् प्राक् प्रतिष्ठा आद्ये कुशासनदानवदिति । तत्रानुष्ठानं ॐ हराय नमः इति मृदाहरणं ॐ महेश्वराय नमः इति संघट्टनं ॐ शू
लपाणे इह सुप्रतिष्ठितो भवेति प्राणप्रतिष्ठा । ॐ ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं रत्नाकल्पोज्ज्वलाङ्गं पर
शुमृगवराभीतिहस्तं प्रसन्नं । पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववीजं निखिलभयहरं पञ्च
वक्त्रं त्रिनेत्रं इति ध्यात्वा ॐ पिनाकधृगिहावाहनं ॐ पशुपतये नमः इति स्नपनं । एतत् पाद्यं ॐ नमः शिवाय नमः इति एवमर्घ्या
दिना पूजयेत् । विसर्जन पूर्वं भविष्यपुराणोक्तं स्वभावप्रसिद्ध प्राच्यैशान्यादिष्वष्टदिक्षु वामावर्तेन पूजनं । यथा ॐ सर्वाय क्षि
ति मूर्तये नमः ॐ भवाय जलमूर्तये नमः ॐ रुद्राय अग्निमूर्तये नमः ॐ उग्राय वायुमूर्तये नमः ॐ भीमाय आकाशमूर्तये नमः ॐ

११४

पशुपतये यजमानमूर्त्तये नमः ॐ महादेवाय सोममूर्त्तये नमः ॐ ईशानाय सूर्य्यमूर्त्तये नमः । मूर्त्तयो ह्यष्टौ शिवस्यैताः पूर्वादिक्र
मयोगताः । आग्नेय्यन्ताः प्रयुज्यास्ता वेद्यां लिंगे शिवं यजेत् । ततः ॐ महादेव क्षमस्वेति विसर्जयेत । अत्र नमोऽन्ततावश्यमारणानंदि
पुराणवचनात् नंदिपुराणे । गोभूहिरण्यवस्त्रादि बलिपुष्पनिवेदयेत् [illegible]यो नमः शिवायेति मंत्रः सर्वार्थसाधकः । सर्वमंत्राधिक
श्चायमोंकाराद्यः षडक्षरः । तन्मंत्रजापी तत्कर्म्मरतस्तद्गतमानसः । निष्कामः पुरुषो राजन् स रुद्रपदमश्नुते । भविष्ये पंचाक्ष
रमुपक्रम्य अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा महापातकयुक्तो वा मनुष्यास्तु जपेद्यथा । अधिकारी भवेत्सर्वे इति दे
वोऽब्रवीच्छिवः इति सर्वार्थः यथापदानुरोधात् तेन यथाधिकारी भवेत्तथाब्रवीदित्यर्थः । ततः सर्वेषामेव पात्राणां परं पात्रं
महेश्वरः पतंतं त्रायते यस्माद्गतीव नरकार्णवात् शिवमुद्दिश्य यद्दत्तं सर्वकल्याणकारणं । तदनंतफलं दानुभवतीह किमद्भु
तं । दत्वा नैवेद्यवस्त्रादि नाददीत कदाचन । त्यक्तव्यं शिवमुद्दिश्य तद्दानेन तत्फलं । आदानमग्रहणं । शिवधर्मोत्तरस्मात्पुष्पैः फलैः

११८

तिथि०

पत्रैस्तोयैरपि च यत्फलं तदनंतफलं ज्ञेयं भक्तिरेवात्र कारणं भविष्ये लिंगानुलेपनं कार्य्यं दिव्यगंधैः सुगंधिभिः। वर्षकोटिशतं दि-
व्यं शिवलोके महीयते। शिवधर्मे तस्मात् पुष्पप्रदानेन लिंगेषु प्रतिमासु च। अशीतिवर्षकोटीनां दुर्गतिं न नरो व्रजेत्। स्कांदेऽपि
स्कान्यपि च पत्राणि श्रीवृक्षस्य सदैव हि दातव्यानीति शेषः। भविष्ये धुस्तूरकैश्च यो लिंगं सकृत् पूजयते नरः। स गोलक्षफलं प्रा-
प्य शिवलोके महीयते। विल्वपत्रैस्तु खंडैश्च यो लिंगं पूजयेत् सकृत् सर्वपापविनिर्मुक्तः शिवलोके महीयते। तथा सर्वकामप्रदं
विल्वं दारिद्र्यस्य विनाशनं। विल्वपत्रात् परं नास्ति येन तुष्यति शंकरः। तथा केशकीटापविद्धानि निशिपर्युषितानि च। स्वयं
पतितपुष्पाणि त्यजेदुपहतानि च। तथा देवदारुसमेतं च सर्जश्रीवासकुंदुरु। श्रीफलं चाज्यसंमिश्रं दत्वाप्नोति परां गतिं स-
र्जः सालरसः श्रीवासः सरलद्रवः कुंदुरुः शैलेयं। रम्यः सौगंधिकं धूपं यद्दत्सहस्रगुणोत्तरं। अगुरु शतसाहस्रं द्विगुणं च
शिलागुरुं। गुग्गुलं घृतसंयुक्तं साक्षाद्दहति शंकरः। तथा तैलेनापि हि यो दद्याद्घृताभावेन मानवः तेन दीपप्रदानेन शिवव

।७

जायते भुवि । नंदिकेश्वरे । अथ भक्त्या शिवं पूज्य नैवेद्यमुपकल्पयेत् । यद्यदेवात्मनः श्रेयस्तत्तदीशाय कल्पयेत् । शालितंडु
लप्रस्थं तु कुर्य्यादन्नं सुसंस्कृतं । शिवाय च चरुं दद्यात्तु दर्शपा विशेषतः । प्रस्थमानं प्रायुक्तं । शिवधर्म्मे स्कांदे एकमाम्रफलं
पाकं यः शंभोर्विनिवेदयेत् । वर्षाणामयुतं भोगैः क्रीडते स शिवे पुरे । एकं मोचाफलं पक्वं यः शिवाय निवेदयेत् । वर्षलक्षं
महाभोगैः शिवलोके महीयते । शिवपुराणे । नैवेद्यं घृतसंयुक्तं मधुपर्कं निवेदयेत् । अग्निष्टोमस्य यज्ञस्य फलमाप्नोति मा
नवः । मोचाफलं कदलीपरिपक्वं स्यात् सुसंसृष्टं माज्यसिक्तं सुसंस्कृतं । शिवाय मांसं दत्वा तु मृगस्य यत्फलमाप्नुयात् । अशेष
फलदानेन यत्फलं परिकीर्तितं तत्फलं प्राप्नुयान्नित्यं सर्वं मांसनिवेदनात् शिवधर्म्मे लिंगवेदीमवे देवी लिंगं साक्षान्म
हेश्वरः । तयोः संपूजनात्स्यातां देवी देवश्च पूजितौ । देवीपुराणे सर्व्वं व्रजेत्तत्तो / सर्व्वं प्रणानं नैवलंघयेत् एवमेव प्रकारे
ण कुर्य्याच्छंभुप्रदक्षिणां । एकीभूय मनोरुद्रेयः कुर्यात् त्रिप्रदक्षिणां । छिन्नस्तेनमवग्रंथि नतस्य पुनरुद्भवः । मविष्ये नातु

११९

तिथि॰)

भ्यांचैव पाणिभ्यां शिरसा च विचक्षणः कृत्वा प्रणामं देवेश सर्वान् कामानवाप्नुयात् लिंगपुराणं। गंधधूपनमस्कारैर्मुखवाद्यै
श्च सर्वेशः योसौ मामर्चयेन्नित्यं तदानुध्याम्यहं सदा। महाभारते सर्वलक्षणहीनोपि युक्तो वा सर्वपातकैः। सर्वं तरति तत्पा
पं भावयन् शिवमात्मना। राघवभट्टधृतं। अधोमुखे वामहस्ते ऊर्द्ध्वास्यं दक्षहस्तकं क्षिप्त्वांगुलीरंगुलीभिः संपूज्य परिव
र्त्तयेत् प्रोक्ता संहारमुद्रेयमर्पणे तु प्रशस्यते। अर्पणे आत्मनीति शेषः स्कांदे निर्माल्यं यो हि मद्भक्त्या शिरसा धारयिष्य
ति। अशुचिर्भिन्नमर्यादो नरः पापसमन्वितः नरके पच्यते घोरे तिर्यग्योनौ च संभवेत् ब्रह्महापि शुचिर्भूत्वा निर्माल्यं यस्तु
धारयेत् तस्य पापं महच्छीघ्रं नाशयिष्ये महाव्रते। शुचिः स्नानादिनेति शेषः। एवं च स्पृष्ट्वा रुद्रस्य निर्माल्यं सवासा आप्लुत
शुचिरिति कालिकापुराणीयमशुचिविषयं अनुपनीतविषयमिति श्रीदत्तः। बह्वृचगृह्यपरिशिष्टे अथाहं शिवनैवेद्यं
पत्रं पुष्पं फलं जलं शालग्रामशिलास्पर्शात् सर्वं याति पवित्रतां। भोजदेवधृतं। चैत्रकृष्णचतुर्दश्यां मंगारकदिनं भवेत् पि

१२०

शाचत्वं पुनर्नेस्याद्गंगायां स्नानभोजनात्‌ राजमार्गे उद्धवलितकलसन्यस्तारक्तपताका स्नुही भवने। चैत्रासितभूतदिने पापरुजं
दूरतो धत्ते। चैत्रकृष्णचतुर्दश्यां कठिन्यादिभिः शुक्लीकृतघटस्नुही शाखारक्तपताकायुक्तं विधाय गृहोपरि स्थापयेत्‌॥ ०॥
अथ मदनचतुर्दशी। स्कंदपुराणीयसौरागमयोः मधुमासे तु संप्राप्ते शुक्लपक्षे चतुर्दशी। प्रोक्ता मदनभंजीति सिद्धिदा तु महो
त्सवैः। पूजयिष्यंति ये मर्त्या नदंगमवपल्लवैः। ते यांति परमं स्थानं मदनस्य प्रसादतः। चैत्रे मासि चतुर्दश्यां मदनस्य महोत्स
वे जुगुप्सितोक्तिभिस्तत्र गीतवाद्यादिभिर्नृणां। भगवांस्तुष्यते कामः पुत्रपौत्रसमृद्धिदः। न मानयंति ये पर्वे मादनस्य नराधमा
ः तेषां पुराणफलं दत्तं भयाते चैत्रमासिकं। देवलः चैत्रशुक्लचतुर्दश्यां यः स्नायाच्छिवसन्निधौ। पिशाचत्वं न तस्य स्याद्गंगायां तु वि
शेषतः॥ ०॥ अथ पौर्णमासी। सा च चतुर्दशीयुता ग्राह्या युग्मात्‌ यमः पक्षांते स्रोतसि स्नायाज्जेन नायाति मनत्पुरं। विष्णुः दृश्येते
सहितौ यस्यां दिवि चंद्रबृहस्पती। पौर्णमासीति महती तैयासंवत्सरे तदा। तस्यां स्नानोपवासाभ्यां मक्षयं परिकीर्तितं। सहि

१२०

तिथि०

तौ मास संज्ञादि निमित्त कृत्तिकादि नक्षत्र गतौ मत्वा कार्त्तिकादि दर्शनात् तथा च राजमार्तण्डः मास संज्ञे यदा कृष्णे चंद्रः संपूर्णमं
डलः। गुरुस्तायाति संयोगे सा तिथिर्महती स्मृता। एकादश मासयोः। पौर्णमासीषु चैतासु मासस्थेस हि तासु च। एतासां स्नानदा
नाभ्यां फलं दशगुणं स्मृतं। वैशाखीं प्रकृत्य यमः गौरान्वा यदि वा कृष्णां स्तिलान् क्षौद्रेण संयुतान्। प्रीयतां धर्मराजेति पि
तृन्देवांश्च तर्पयेत्। यावज्जीव कृतं पापं तत्क्षणादेव नश्यति। अब्दायुतं वतिष्ठेतु स्वर्गलोके न संशयः इति। ब्रह्मपुराणे महा
ज्यैष्ठ्यां तु यः पश्येत् पुरुषः पुरुषोत्तमं। विष्णुलोकमवाप्नोति सो स्नं गं गांतु मज्जनात्। ऐन्द्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा
पूर्णिमा गुरुवारेण महाज्यैष्ठी प्रकीर्तिता। ऐन्द्रे ज्येष्ठायां प्राजापत्ये रोहिण्यां विना गुरुवारेणापि ऐन्द्रे गुरुः शशी चैव प्राजापत्ये
रविस्तथा। पूर्णिमा ज्येष्ठ मासस्य महाज्यैष्ठी प्रकीर्तिता। अनुराधास्थचंद्रेपि व्याघ्रभूति ऐन्द्रर्क्षे त्वथ वा सेत्वे गुरुचंद्रौ यदा
स्थितौ। पूर्णिमा ज्येष्ठ मासस्य महाज्यैष्ठी प्रकीर्तिता। राजमार्तण्डे ज्येष्ठे संवत्सरे चैव ज्यैष्ठ मासस्य पूर्णिमा। ज्येष्ठामिन समायु

१२।

क्षामसङ्गाज्ज्यैष्ठी प्रकीर्त्तिताः। ज्यैष्ठसंवत्सरश्चाज्ज्येष्ठामूलोपगे गुरौ वे वर्षे स्याच्छुक्रदैवतं। इति विष्णुधर्मोत्तरोक्तो ग्राह्यः। ननु संव
त्सरादि पंच कान्तर्गत वर्षे विशेषः। ज्यैष्ठवर्षे विशेषस्यास्य वैयर्थ्यापत्तेः। संवत्सरे त्विति पाठः काल्पनिकः। प्रपंचस्तु मल
मासतत्त्वेऽनुसंधेयः। आषाढकार्त्तिकमाघवैशाखपौर्णमासीषु दानमावश्यकं। तथा चायोध्याकाण्डे भरतशपथे। आषाढी
कार्त्तिकी माघी तिथयः पुण्यसंभवाः। अप्रदानव्रतो यातु यस्यार्य्यानुमतो गतः। अप्रदानव्रतो दानरहितस्यैतास्तिथयो
यान्तु आर्य्यः श्रीरामचंद्रो गतो यस्यानुमत इत्यर्थः। उत्तरवाक्यस्थ यच्छब्दानुवृत्त तच्छब्दापेक्षा। विष्णुधर्मोत्तरे ब्रह्मपुराणोच।
मासे ज्यैष्ठे तु संप्राप्ते नक्षत्रे शक्रदैवते। पौर्णमास्यां तदा स्नानं सर्वपापं हरेद्द्विजाः। तस्मिन्काले तु ये मर्त्याः पश्यन्ति पुरुषो
त्तमं। बलभद्रं सुभद्रां च ते यान्ति परमव्ययं। स्कंदपुराणे ज्यैष्ठ्यामहं चावतीर्णोऽस्मि तत्पुण्यं जन्मवासरं। तस्यां स्नपनं कुर्य्यो
महास्नानविधानतः। ज्यैष्ठ्यां प्राप्तस्तु ते काले ब्रह्मरामसहितं च मां। रामं सुभद्रां संस्नाप्य मम लोकमवाप्नुयात्। विष्णुधर्मो

१२१

तिथि०

त्तरे पौर्णमासी तथा माघी श्रावणी च नरोत्तम। पौष्ठपद्यामतीतायां तथा कृष्णात्रयोदशी। एतांस्तु श्राद्धकालान्वै नित्याना
ह प्रजापतिः। अत्र पूर्वदिने संगवलाभे रोहिण्यालाभे वा परदिने संगवालाभे पूर्वदिने श्राद्धं। शुक्लपक्षस्य पूर्वाह्णे श्राद्धं कुर्या
द्विचक्षणः। कृष्णपक्षापराह्णे तु रोहिणीं तु न लंघयेत्। इति वायुपुराणात्। उभयदिने संगवलाभे तु परदिने। शुक्लपक्षे
तिथिर्ग्राह्या यस्यामभ्युदितो रविः कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः इति विष्णुधर्मोत्तरात् एवमक्षय्यतृतीया
दावपि॥०॥ अथ कोजागरकृत्यं कल्पतरौ ब्रह्मपुराणे। आश्वयुज्यां पौर्णमास्यां निकुंभो वालुकार्णवात्। आयाति से
नया सार्द्धं कृत्वा युद्धं सुदारुणं। तस्मात्तत्र नरैर्मार्गाः स्वगृहस्य समीपतः। शोधितव्याः प्रयत्नेन भूषितव्याश्च मंडलैः पु
ष्पाद्यैः फलमूलान्न सर्षपप्रकरैस्तथा। वेश्मानि भूषितव्यानि नानावर्णैर्विशेषतः। सुस्नातैरनुलिप्तैश्च नवैर्भोज्यसबांध
वैः। दिवा तत्र न भोक्तव्यं मनुष्यैश्च विवेकिभिः। स्त्री बाल वृद्ध मुख्यैश्च भोक्तव्यं पूजितैः सुरैः। पूजितैः सुरैरिति रिति विशेषयो

तृतीया तेन पूजित सुरैरित्यर्थः। पञ्चाश्रसफलैः पुष्पैस्तथा ह्वारोर्द्धमितनयः। ह्वारोपान्ते च दीप्तस्तु संपूज्य हव्यवाहनः। यवा
क्षतघृतोपेतैस्तंडुलैश्च सुतर्पितः। संपूजितव्यः पूर्णेन्दुः पयसा पायसेन च। रुद्रः समाख्येः स्कंदश्च तथा नंदीश्वरो मुनिः। गो
मद्भिः सुरभिः पूज्या छागवाह्नि हुताशनः। उरभ्रवद्भि वैरुणो गजवद्भि विनायकः। पूज्यः साश्वैश्च रेवंतो यथा विभव वि
स्तरैः। ततः पूज्यो निकुंभोऽपि समाषैस्तिलतंडुलैः। सुगंधिभिर्घृतोपेतैः कृसरान्नैश्च भूरिभिः। ब्राह्मणान्भोजयित्वा तु भोक्त
व्यं मांसवर्जितं। वह्निपार्श्वगतैर्नैया इष्टाक्रीडा पृथग्विधा। ततश्च ह्वारोर्द्धमिति हव्यवाहन पूर्णेन्दु समाख्ये रुद्रस्कंदनंदी
श्वरमुनयः सर्वैरेव पूज्याः ह्वारोर्द्धमिति शब्दो/त्र बहुवचनांतः नंदीश्वरमुनिरेकः। गोमता सुरभिश्छागवता हुताशनः मे
षवता वरुणः हस्तिमता विनायकः। अश्ववता रेवंतः सर्वैरेव निकुंभः पूज्यः। महाराणे वैलिंगपुराणे। आश्विने पौर्णमास्यां
तु चरेज्जागरणं निशि। कौमुदी सा समाख्याता कार्या लोकविभूतये। कौमुद्यां पूजयेल्लक्ष्मीमिंद्रमैरावतस्थितं। सुगंधिर्निशि

श्री

सद्भिर्यो अक्षैर्जागरणं चरेत्। तथा निशीथे वरदा लक्ष्मीः को जागर्तीति भाषिणी। तस्मै वित्तं प्रयच्छामि अक्षैः क्रीडां करोति यः। ना
रिकेलैश्चिपिटकैः पितॄन्देवान्समर्च्चयेत्। बंधूंश्च प्रीणयेत्तेन स्वयं तद्दशनो भवेत्। अत्र निशीति निशीथ इति चाभिधाना
द्रात्रिकृत्यमिदं। तत्तश्च प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा। प्रदोषोऽस्तमयादूर्ध्वं घटिकाद्वयमिष्यते। इति वत्सवच
नात्। यद्दिने प्रदोषनिशीथोभयव्यापिनी पौर्णमासी तद्दिने कोजागरकृत्यं उभयव्याप्त्यनुरोधात् यदा तु पूर्वदिने निशीथ
व्याप्तिः परदिने प्रदोषव्याप्तिस्तदा परेद्युस्तत्कृत्यं प्रधानपूजाकालव्याप्त्यनुरोधात्। यदा तु पूर्वेद्युर्निशीथव्याप्तिः परेद्यु
र्न प्रदोषव्याप्तिस्तदा सुतरां पूर्वेद्युस्तत्कृत्यं। अतः सुतिथयः पुण्याः कर्मानुष्ठानतो दिवा। नक्तादिव्रतयोगेतु रात्रियोगो वि
शिष्यते। इति वचनात् विसर्जयेदित्यनुवृत्तौ मात्स्यसूक्ते महालक्ष्म्याः सु तुलसीं ऽटिकां कांचनं तथा। लक्ष्मीध्यानमादित्य
पुराणे। पाशाक्षमालिकांभोजसृणिभिर्याम्यसौम्ययोः पद्मासनस्थां ध्यायेच्च श्रियं त्रैलोक्यमातरं। गौरवर्णां सुरूपां च सर्वाल

123

कारभूषितां। रौक्मपद्मव्यग्रकरां वरदां दक्षिणेन तु। पाशेति दक्षिणे पाशाक्षमालाभ्यां वामे पद्मांकुशाभ्यां भूषितां वाम
करे हेमपद्माभ्यां दक्षिणाकरे वरं दधतीत्यर्थः। ततः पाद्यादिभिः संपूज्य ॐ नमस्ते सर्वदेवानां वरदासि हरिप्रिये। या
गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्चनात्। इत्यनेन पुष्पांजलित्रयं दत्वा प्रणमेत्। तन्मंत्रः ॐ विश्वरूपस्य भार्यासि पद्मे
पद्मालये शुभे। सर्वतः पाहि मां देवि महालक्ष्मि नमोऽस्तु ते॥ ततः इंद्रं पूजयेत्। ध्यानमादित्यपुराणे। चतुर्दंतगजारू
ढो वज्रपाणिः पुरंदरः। शचीपतिश्च ध्यातव्यो नानाभरणभूषितः। ततः पाद्यादिभिः संपूज्य ॐ विचित्रैरावतस्थाय भा
स्वत्कुलिशपाणये। पौलोम्यालिंगितांगाय सहस्राक्षाय ते नमः। इति पुष्पांजलित्रयं दत्वा प्रणमेत्। ततः कुबेरः संपू
ज्य इति रुद्रधरः। तं पाद्यादिभिः संपूज्य ॐ धनदाय नमस्तुभ्यं निधिपद्माधिपाय च। भवंतु त्वत्प्रसादान्मे धनधान्यादि
संपदः इति पुष्पांजलित्रयं दत्वा प्रणमेत्। अत्र सर्वेषां प्रदोषे पूजेति रुद्रधरः। तत्र निकुंभपर्यंतानां पूर्वाह्न एव पूजनं

१२२

तिथि० ३

निरपवादमिति वाच्यं दिवा नक्तं न भोक्तव्यं इत्युपक्रम्य पूज्याश्च सफलैः पत्रै रित्यादिना विशेष्य पूजामभिधाय भोक्तव्यमित्यभि
धानात् रात्रावेव पूजाभोजने अवगम्येते । अतएव शाक्तानामेव भोक्तव्यं पूजितैः सुरैरित्यभिधानेन विशिष्य दिवा पूजाभोजने
विहिते । योगिनीतन्त्रे विरिञ्चेस्तु गृहे दक्कां घंटां लक्ष्मीगृहे त्यजेत् । सर्वं वा घण्टयी घंटां वाद्याभावे प्रवादयेत् । लक्ष्मीवाक्यं
प्रकीर्णभाण्डामनवेक्ष्यकारिणीं सदा च भर्त्तुः प्रतिकूलवादिनीं । परस्य वेश्माभिरतामलज्जामेवं विधां स्त्रीं परिवर्ज्जयामि सामा
कैंडेयः शिरःस्पृष्टं चरणौ तु पूजितौ वराङ्गनासेवनमल्पभोजनं । अनग्नशायित्वमपर्वमैथुनं चिरं प्रणष्टां श्रियमानयं
ति षट् । मानुषास्थि गृहे यत्र अहोरात्रं तु तिष्ठति । तत्र लक्ष्मिर्न वा वासस्तथान्ये बान्धवः खसा । सूर्पे दात्रादिकं यत्र पदाकर्षेण
था सनं । हरिवंशे यत्र क्रीः श्रीः स्थिता तत्र यत्र श्रीस्तत्र सन्नतिः । सन्नतिः क्रीस्तथा श्रीश्च नित्यं कृष्णे महात्मनि । मास्य पुराणं
स्थिरोपायो हि पुरुषः स्थिरश्रीरेव जायते । रक्षितुं नैव शक्नोति चपलश्चपलां श्रियं । तथा अवेस्य मृष्टोग वता श्रीरपाराम

१२५

वेसदा। ब्रह्मपोत्साहिता देवा ममंथुः पुनरंबुधिं। कृष्णकौमुद्यां नारिकेलोदकं पीत्वा अक्षैर्जागरतां निशि। तस्मै वित्तं
प्रयच्छामि को जागर्ति महीतले। अक्षक्रीडायां व्यासयुधिष्ठिरसंवादः प्रचरति। यथा युधिष्ठिर उवाच। अष्टकोष्ठा च
क्रीडायां मे ब्रूहि तपोधन। प्रकर्षेणो वयेनाथ चतूराजी यतो भवेत्। व्यास उवाच। अष्टौ कोष्ठान् समालिख्य प्रदक्षिणाक्र
मेणा च। अरुणं पूर्वतः कृत्वा दक्षिणे हरितं बलं। पार्थ पश्चिमतः पीतमुत्तरे श्यामलं बलं। राज्ञो वामे गजं कुर्यात्तस्माद
श्वं ततस्तारिं। कुर्यात्कौंतेय पुरतो युद्धे पत्तिचतुष्टयं। कोणे नौका द्वितीये श्व तृतीये च गजो वसेत् तुरीये च वसेद्राजा
वटिकाः पुरतः स्थिताः। पंचकेन वटी राजा चतुष्कोणेषु कुंजरः त्रिकोणे च चलत्यश्वः पार्थ नौका द्वयेन तु। कोष्ठमेकं
विलंघ्याथ सर्वतो याति भूपतिः। अग्र एव वटी याति बलं हंत्यग्रकोणगं। यथेष्टं कुंजरो याति चतुर्दिक्षु महीपते। ति
र्यक् तुरंगमो याति लंघयित्वा त्रिकोष्ठकं। कोणाकोष्ठद्वयं लंघ्य व्रजेन्नौका युधिष्ठिर। सिंहासनं च चतूराजी नृपाक्र

१२४

तिथि०)

मृंचषट् पदं। काककाष्टं वृहन्नौका नौकाकृष्टप्रकारकं। घाताघाते वटी नौका वलं हंति युधिष्ठिर। राजा गजो हयश्चापि स्यका
घातं निहंति च। अल्पं तं स्ववलं रक्षेत् स्वराजवलमुत्तमं। अल्पस्याल्पस्य या पार्थ हंतव्यं वलमुत्तमं। नौकाया श्चत्वारि पदानि
अश्वस्याष्टौ पदानि इत्याधिक्य मश्वस्य मतं गजस्य सर्वे रा राजा क्रीडति निर्भरं। तस्मात् सर्वे वलं दत्वा रक्षेत्कौंतेय कुंजरं। सिंहा
सनं चतूराजी यदधः स्थानतो भवेत्। सर्वे सैन्य गजे वापि रक्षितव्यो महीपतिः। अन्यद्राज पदं राजा यदा यातो युधिष्ठिर तदा
दा सिंहासनं तस्य मन्यते नृपसत्तम। राजा च नृपतिं हत्वा कुर्यात् सिंहासनं यदा। द्विगुणं वाहयेत् पराप मन्यथैक गुणं भवे
त्। द्विगुणं पराप ज्ञातव्य त्वेन प्रापयेत्। मित्र सिंहासनं पार्थ यदा रोहति भूपतिः। तदा सिंहासनं नाम सर्वेन यति तद्बलं। यदा
सिंहासनं कर्तुं राजा यत्र पदाश्रितः। तदा घाते पिहंतव्यो वलेन सुरक्षितः। विद्यमाने नृपो यत्र स्वकीये च नृपत्रयं। प्राप्नोति च
यदा तस्य चतूराजी तदा भवेत्। नृपे सो च नृपं हत्वा चतूराजी यदा भवेत्। द्विगुणं वाहयेत्तत्रे अन्यथैक गुणं भवेत्। स्वपदस्थं यदा

125

राजा राजानं हंति पार्थिव । चतुरंगे यदा भूप बालये च्च चतुर्गेहां । यदा सिंहासने काले चतूराजी समन्विता । चतूराजी भवत्येव नातु
सिंहासनं नृप । अत्रेदं वीजं उभयथापि परसिंहासनाधिकारात् परराजवधे शौर्याधिक्यं निष्कंटकत्व दर्शनात् क्रीडायामपित
था कल्प्यते । राजद्वयं यदा हंते आत्मनो राज्ञि संस्थिते । परे रासं हता स्रेकोवलेनाप्यवहार्यते । राजद्वयं हस्तेन स्या दन्यकरे परः
। तदा राजा हि राजानं घातेपि न हनिष्यति । नृपाकृष्टे यदा राजा गमिष्यति युधिष्ठिर । घाता घातेपि हंतव्यो राजा तत्र नरेश्वकः को
हां राजपदं तत्ता वटिकां तं यदा भवेत् । वटीषष्ठपदं नाम तदा कोष्ठ वलं नयेत् । यदि तत्र भवेत् पार्थ चतूराजी च षट्पदं । तदापि
च चतूराजी भवत्येव न संशयः । पदाते षट्पदे विद्धे राज्ञा वा हस्तिना तथा । षट्पदं न भवेदस्य अवश्यं शृणु पार्थिव । सप्तमे को
ष्ठके यास्या द्वृटिकादशके नवे । तदान्योन्यं च हंतव्यं सुखाय दुर्वलं वलं । त्रिवटी कस्य कोंतेय पुरुषस्य कदाचन । षट्पदं न भवत्ये
व इति गोतम भाषितं । नौकेका वटीका यस्य विद्यते खेलने यदि । गाटावटीति विख्याता पदं तस्य न दुष्यति । गाटा आघात्या पदं रा

१२५

तिथि०)

जपदं कोणपदं च । हस्तेवंगे बलं नास्ति काककोष्ठं तदा भवेत् । वदंति राक्षसाः सर्वे तस्य नस्तो जयाजयौ । प्रोथिते पंचमे राज्ञि गृहे
वर्ट्याश्च षट्पदे । अशीघ्रं स्यात्तदा हंति च लिताचालितं बलं । द्विराकृत्य गतो यस्मादुन्यात् परबलं जयी । पार्थे सिंहासने काले का
ककोष्ठं यदा भवेत् । सिंहासनं भवत्येव काककोष्ठं न भराप्यते । उपविष्टं च यत्स्थानं तस्योपरि चतुष्टयं । नौका चतुष्टयं यत्र क्रिय
ते जन्यनौकया । नौका चतुष्टयं तत्र वृहन्नौकेति भरापते । न कुर्यादेकदा राजन् हंतव्यो वामतो गजः ॥ इति चतुरंग कौतुकं ॥
* ॥ वैष्णवामृते स्कंदपुराणं । पौष्यां तु समतीतायां यावद्भवति पूर्णिमा । माघमासस्य राजेंद्र पूजा विष्णो विधीयते । इति पौ
र्णमास्यंत माघमुपक्रम्य । पितृणां देवतानां च मूलकं नैव दापयेत् । दद्यन्नरकमाप्नोति भुंजीत ब्राह्मणो यदि । ब्राह्मणो मूलकं
भुक्त्वा चरेच्चांद्रायणं व्रतं । अन्यथा नरकं याति स्वत्र विट्भूद्रएव च । वरं भक्षमभक्ष्यं तु पिबेद्वा गर्हितं च यत् वर्जनीयं प्रयत्नेन
मूलकं मदिरासमं । फाल्गुन पौर्णमास्यां दोलयात्रा माह तीर्थचिंतामणौ ब्रह्मपुराणं । नरो दोलगतं दृष्ट्वा गोविंदं पुरुषोत्तमं । फाल

126

गुन्यां संयतो भूत्वा गोविंदस्य पुरं व्रजेत् । स्कंदपुराणीय पुरुषोत्तममाहात्म्ये त्रिंशाध्याये फाल्गुन्यां क्रीडनं कुर्याद्दोला
यां मम भूमिप विष्णुपुराणे चतुर्दश्यष्टमी चैव अमावस्याथ पूर्णिमा । पर्वाण्येतानि राजेंद्र रविसंक्रांतिरेव च । स्त्रीतैलमांस
संभोगी पर्वस्वेतेषु मानवः । विण्मूत्रभोजनं नाम प्रयाति नरकं मृतः ॥ * ॥ भविष्यमात्स्यज्योतिषेषु । मृगकर्कटसंक्रांती द्वे
तूदग्दक्षिणायने । विषुवती तुलामेषे गोलमध्ये तथाऽपराः । मृगो मकरः गोलो राशिचक्रं । धनुर्मिथुनकन्यासु मीने च षड
शीतयः । वृषवृश्चिककुंभेषु सिंहे विष्णुपदी स्मृता । देवीपुराणे । यावद्विंशकला भुक्तास्तावत्पुण्यं चोत्तरायणे । निरंशे भास्क
रे दृष्टे दिनांते दक्षिणायने । अर्द्धरात्रे त्वसंपूर्णे दिवा पुण्यमनागतं । अर्द्धरात्रे व्यतीते तु विज्ञेयं चापरेऽहनि । संपूर्णे चार्द्ध
रात्रे उदये स्तमये पि वा । मानार्द्धे भास्करे पुण्यं असंपूर्णे सर्वेरी दिने । संपूर्णे तूभयोर्ज्ञेयं मितिरेके परेऽहनि । षडशीतिमुखेऽती
ते वृत्ते च विषुवद्वये । भविष्यत्ययने पुण्यमतीते चोत्तरायणे । आदौ पुण्यं विजानीयाद्दयघमिन्नातिथिमेवेत् । अर्द्धरात्रे व्यतीते तु

१२६

तिथि०२

विज्ञेयं चापरेऽहनि । विंशकला विंशतितमीकला संक्रान्तिक्षणात् ऊर्ध्वं यावत्तत्स्थानं भवति तावत् पुण्यं निरंशे/ स्याभून्ये संक्रान्ति
कालेऽपि अंशकेरहितो भास्करः । तस्मिन् दृष्टे दिवेति यावत् । दिनं च दिनकरकरसंस्पृष्टा त्रिंशन्नाडिका इति ज्योतिर्विदः । तदं
तं तत्समाप्तिं यावत् तावत् पुण्यं । तथा च वृद्धवशिष्ठः । त्रिंशत् कर्कटके नाड्यो मकरे विंशतिः स्मृताः । नाडी दण्डः । उत्पला
द्विपलं षष्ट्या विपलाच्च पलं नयेत् । पलात् षष्ट्या नयेन्नाडीं ततः षष्ट्या रवेर्दिनमिति सिद्धान्तसंदर्भात् । तत्रश्च देवीपुराणवृ
द्धवशिष्ठवचनयोरेकवाक्यतया कलानाड्योः पर्यायता । रात्रिसंपूर्णत्वात् अर्द्धरात्रेति ति असंपूर्णो कलान्यूनार्द्धरात्रेके
लोन्यूनार्द्धरात्रेतु यदि संक्रमणं भवेत् । तदहः पुण्यमित्युक्तं इति गार्ग्यगालवगौतमाः इति कृत्यचिन्तामणौ वर्षकृत्यधृतगर्ग
वचनात् । कालकौमुद्यां गालव इत्यत्र हारीत इति पाठः । तत्रश्च कलान्यूनार्द्धरात्राभ्यंतरे द्वादशस्वेव संक्रमणेषु । अनागतं
नागतं संक्रमणे न यत्र दिवा तदेव पुण्यं पुण्यजनकं । तत्र पूर्वेदिनं तत्रैव संक्रान्तेरनागतत्वसंभवात् । तेन संक्रमणकालादूर्ध्वं

127

गेव दिवापवापरार्द्धे स्नानादि कर्त्तव्यमित्यर्थः। अर्द्धरात्रे व्यतीते कलाधिकार्द्धरात्रव्यतीते संपूर्णो अर्द्धरात्रे रात्रिमध्यकल
योः कलान्यूनार्द्धरात्रे त्विति वचनानंतरं। अर्द्धरात्रे कलाधिक्ये यदा संक्रमते रविः। तदोत्तरदिने ग्राह्यं स्नानदानजपादिषु अ
र्द्धरात्रेतु संपूर्णो यदि संक्रमते रविः। प्राहुर्दिनद्वयं पुण्यं त्यक्त्वा मकरकर्कटाविति भुजबलभीम वचनाभ्यां तथा प्रतीतेः काल
विवेके कालकौमुद्यां च जावालिः पूर्णो चेदर्द्धरात्रे तु रविसंक्रमणं भवेत् प्राहुर्दिनद्वयं पुण्यं त्यक्त्वा मकरकर्कटाविति।
एतयो व्यवस्थामाह कालमाधवीये भविष्योत्तरं मिथुनात् कर्किसंक्रांति यदि स्याद्दंशुमालिनः। प्रदोषे वा निशीथे वा कुर्य्या
दहनि पूर्वतः। काम्येकंतु परित्यज्य ऋषभं संक्रमते रविः। प्रभाते वार्द्धरात्रे वा स्नानं कुर्य्यात् परेऽहनि। ततश्चरात्रिम
ध्यदेउ द्वयात्मकार्द्धरात्रे संक्रांता वुदयेऽस्तमयेपि वेत्यनेन उदयोपक्रमभस्तमयांतं च मानार्द्धे पुण्यं एवं च उदयादिने पु
ण्यकालेपि पूर्वदिनाकरणा एव परदिने तद्विहितं कार्य्ये श्वः कार्य्यम् अद्य कर्त्तव्यं पूर्वाह्णे चापराह्णिकं। नहीप्रतीक्षते मृत्युः कृ

१२७

तिथि०

तमस्यनवाक्कृतं इति लिंगपुरस्सरात् मोत्सर्गधर्म्मोद्धं । तत्रापि दक्षिणायने पूर्वे दिनार्द्धं मात्रं उत्तरायणे परदिनार्द्धमात्रमिति विशे
षः । मानार्द्धमिति भास्करोपलक्षिते काले दिवेति यावत् तस्मिन् संक्रमणेऽपि मानार्द्धं पुण्यं । एतच्च विषुवषडशीति विषये
अयनपुण्यकालयोः पूर्वमुक्तत्वात् विष्णुपद्यां चोभयतः षोडश कलानां पंचदशनाडिकानां च पुण्यत्वस्य शातातपवचनेन
वश्यमाणत्वात् तेन दिवा संक्रमणे एवायनादित्वेन पुण्यकाले विशेषः रात्रिसंक्रमणे तु अर्द्धरात्रीय मकरकर्कटसंक्रमव्य
तिरिक्ते सर्व्वेषां तुल्यतेति अपूर्णे शर्वरीदले कलान्यूनार्द्धरात्रे अत्रापि मानार्द्धमित्यनुवर्त्यते दिवा पुण्यमिति यावत् प्रा
गुक्तं अत्र तु तदेव मानार्द्धत्वेन विशेषितमित्यपुनरुक्तिः एवमुदयास्तमय यन्मानार्द्धमुक्तं तत् किमेकदिने दिनयोर्वेत्य
त्राह सं पूर्णे तूभयोरिति उभयोः पूर्वापरदिनयोर्मानार्द्धं पुण्यं तेन पूर्वदिनस्यास्तमयपर्यन्तं परदिवसस्योदयमारभ्य माना
र्द्धं पुण्यमित्यर्थः । अतिरेके अर्द्धरात्रात् परतः संक्रमणे परेऽहनि मानार्द्धमित्यनुवर्त्यते मानार्द्धं तु प्रहरद्वयं अर्द्धरात्रादधस्त

128

स्मिन्मध्याह्नस्योपरि क्रिया। उर्द्धं संक्रमणे भानो रुदयात् प्रहरद्वयं। पूर्णोर्द्धरात्रे संक्रान्तौ द्वे दिनार्द्धे तु पुण्यदे इति संवत्सर
प्रदीप गंगावाक्यावलीधृत वशिष्ठ सौरधर्म्म वचनैकवाक्यत्वात् अर्द्धरात्रादधश्चेव दिवार्द्धस्योपरि क्रिया उर्द्धं संक्रमणे
भानोरुदयात् प्रहरद्वयमिति भोजराज कृत्य चिन्तामणि धृतैकवाक्यत्वाच्च। अधः पूर्वमर्द्धे परत्र क्रिया स्नानादिका एवं च ग
र्गवचनस्थेन तदहरिति यामद्वयपरं। अन्यथा मूलभूत श्रुत्यन्तर कल्पनापत्तेः एवं च षडशीति मुखे/ तीत इत्यादि दिवासंक्र
मणविषयं। तेन दिवा षडशीति संक्रमणे भूते भविष्यन्मानार्द्धे पुण्यं एवं विषुवद्वयेपि वृत्ते दिनोत्तरायणेपि भविष्यद्विंश
ति दण्डानां पुण्यत्वे अत्रोत्तरायणस्य पृथगभिधानादयन इति पदं दक्षिणायनपरं गोवलीवर्द्दन्यायात् तेन दिवा दक्षिणा
यने भविष्यति। भूत त्रिंशद्दण्डानां पुण्यत्वं। एवं च षडशीति इत्यादि स्वावकाश मननमानं अर्वाक् षोडश विज्ञेया नाड्यः पश्चाच्च
षोडश। कालः पुण्योर्कसंक्रान्ते विद्वद्भिः परिकीर्त्तितः इति शातातपीयं अतीतानागतो भोगो नाड्यः पंचदश स्मृताः। इति देवी

१२८

तिथि०

पुराणीयंच वचनं दिवाविष्णुपदीविषयं। अतएव जाबालिवृहद्वशिष्ठौ पुण्यायां विष्णुपद्यांच प्राक्पश्चादपि षोडश। अर्द्ध
रात्रे विशेषमाहरात्रावित्यादि अर्द्धरात्रिसंक्रान्तावादौ पूर्वदिनएव स्नानाद्यं यद्यभिन्ना संक्रान्तिकाले पूर्वदिनेच एकैवतिथिमेवे
त्तेन मध्यरात्रसंक्रमसंयोगे उभयदिने स्नानाद्यं पुण्यमुक्तं तद्भिन्नतिथिविषयं अतीते पुनरर्द्धरात्रे पूर्वेणागतातिथ्यभेदेपिप
रस्यैव परार्द्धं पुण्यमिति तात्पर्यार्थः एवंच रात्रिसंक्रान्तौ दिनएव पुण्यत्वाभिधानात्। राहुदर्शनसंक्रान्तिविवाहात्ययवृ
द्धिषु। स्नानदानादिकं कुर्यान्निशि काम्यव्रतेषुचेति देवलेन दिनसंक्रमस्य रात्रिप्रविष्टपुण्यकालांशे संक्रान्तिनिमित्तत्वेन स्ना
नदानादि विधीयते इति यत्तु मंदा मंदाकिनी ध्वाङ्क्षी घोरा चैव महोदरी। राक्षसी मिश्रिता प्रोक्ता संक्रान्तिः सप्तधा नृप मं
दा ध्रुवेषु विज्ञेया मृदौ मंदाकिनी तथा। क्षिप्रे ध्वाङ्क्षी विजानीयादुग्रे घोरा प्रकीर्त्तिता। चरे चैव महोदरी ज्ञेया क्रूरैर्क्षैस्तु राक्षसी
मिश्रिता चैव विज्ञेया मिश्रितर्क्षैस्तु संक्रमे। इत्येते ह्युदशाश्चैव संक्रान्तिषु ध्रुवादिनक्षत्रयोगात् भेदादिरूपतया सप्तधाभिन्नासु

१२५

त्रिचतुः पंचसप्ताष्टनवद्वादशैरेवच। क्रमेण घटिकास्थेता स्तत्पुरायं पारमार्थिकं। इति देवीपुराणाएव त्रिचतुरादि घटिका
नां पुरायात्वमुक्तं तद्दिवारात्र्यो स्तेन कालोपदेशाद्वकाश मलभमानं संध्याद्वयसंक्रांति विषयमिति समयप्रकाशः। ध्रुवादिगणा
स्तु दीपिकायां उग्रः पूर्वे मघांतका ध्रुवगणास्त्रीण्युत्तराणि स्वभूर्वो ज्यादित्य हरित्रयं चरगणाः पुष्याश्विहस्ता लघुः। चित्रा मित्र
मृगांत्यमं मृदुगणास्तीक्ष्णोहि रुद्रेंदुयुक् मिश्रोऽग्निः सविशाखमः शुभफलाः सर्वे स्वकृत्येगणाः। अंतको मरणी स्वभूरोहि
णी वाज्यादित्य हरित्रयं स्वाती पुनर्वसु श्रवणा धनिष्ठा शतभिषाः मित्र मृगांत्यमं अनुराधा मृगशिरो रेवत्यः। अहिरुद्रेंदु
युग श्लेषा आर्द्रा मूलाग्नि कृत्तिकाः कल्पतरवस्तु क्रमेण यथासंख्येन एता घटिकास्तात्पुरायं तस्य संक्रमस्य पुरायहेतुत्वा
त् पुरायं पारमार्थिकं मुख्यं त्रुटेः सहस्रभागो यः स कालो रविसंक्रमः। इति सूक्ष्म संक्रमकालीनानुष्ठानजन्य समपुरायहे
तेव इत्याह त्रुटिस्तु लघ्वक्षर चतुर्भाग स्त्रुटिरित्यभिधीयते। त्रुटिद्वयनवः प्रोक्तो निमेषस्तु नव द्वयं इति स्मृत्युक्ते स्तादेवमतं

१२८

तिथि०

युक्तं अत एव देवलेन याया: सन्निहिता नाड्यस्तास्ता: पुण्यतमा: स्मृता:। इत्युक्तं एवं च रात्रौ घटिका: पुण्यतमा: स्मृता: इत्युक्तं
मानाद्यादि कं तु पुण्य मात्रमिति तस्यार्थो न संध्याविषयमिति संध्यासंक्रमविषयत्वे। पारमार्थिकमित्यनुपपत्ते: पुण्यमित्यनेनै
व सिद्धे: पारमार्थिकमित्यनेन कल्पतरुव्याख्यानानवलोकनादत्र रविसंक्रम इति पाठकल्पनं कल्पनमेव। समयप्रकाश
कृतापि तथा पाठलिखितत्वात् जीमूतवाहनोपि कालविवेके अह्नि संक्रमणे पुण्यमह: कृत्स्नं प्रकीर्त्तितं। रात्रौ संक्रमणे भा
नोर्दिनार्द्धं स्नानदानयो: इति वृहद्वशिष्ठादि वचनपर्य्यालोचनया दिवा संक्रान्तौ दिवा सोत्रं पुण्यं पुण्यतरास्तु विशेषविहिता ना
ड्य इत्याह अत एव वृद्धजाबालि वृहस्पति शातातप वचनमपि संगच्छते। तथा वर्त्तमाने तुलामेषे नाड्य स्तूभयतो दश। का
लमाधवीयेपि अह्नीत्याद्यभिधाय प्राशस्त्यतारतम्यमुक्तं तस्मात् षडशीति मुखे/ नीत इति पारमार्थिकं प्राशस्त्यपरं दिवासं
क्रान्तौ कृत्स्नं दिनं पुण्यमुक्तं। ननु देवीपुराणे दिवारात्र्यो: संक्रमे विशेष्य कालाभिधानात् संध्यासंक्रान्ते: क: काल इति चेत् त्रिंशन्मु

130

हूर्त्ते कथितमहोरात्रं तु यन्मयेति विष्णुपुराणोन संध्ययोः पृथगुपादानादिनरात्रिसंबंधित्वान्मुहूर्त्तोऽहन तयोरंतर्भावः। तथा
च दक्षः अहोरात्रेस्य यः संधिः सूर्यनक्षत्रवर्जितः। सा तु संध्या समाख्याता मुनिभिस्तत्त्वदर्शिभिः। योगियाज्ञवल्क्यः ह्रासवृद्धी तु
सततं दिनरात्र्योर्यथाक्रमं। संध्या मुहूर्त्तमाख्याता ह्रासे वृद्धौ समा स्मृता। वराहः अर्द्धास्तमयात् संध्या व्यक्तीभूता न तारका या
वत्। तेजःपरिहानिरुषाभानोरर्द्धोदयं यावत्। अत एव केनापि मुनिना नानादेशीयसंग्रहकारेणाच संध्यासंक्रांतित्वेन विशेषो
नाभिहितः॥ ०॥ तदयं संक्षेपः। दिनसंज्ञकमरोनतत् कृत्स्नेनं दिनं पुण्यं षडशीतिमुखे इत्याद्युक्तं पुण्यतरं। मंदाकिनीत्यादिरूप
त्रिचतुरादि घटिकाः पुण्यतमाः दिनवृत्तोत्तरायणादि विहित विंशति दंडादीनां रात्रिप्रविष्टभागस्यापि पुण्यत्वं रात्रिसंज्ञकमरोनतु
कलान्यून प्रथमार्द्धरात्रे तद्दिवसीय शेषयामद्वयं पुण्यं कलाद्वयात्मक मध्यरात्रे तद्दिवसीय तिथेरभेदे तद्दिवसीय शेषयामद्व
यं पुण्यं भेदे तु तद्दिवसीय शेषयामद्वयं परदिवसीयाद्य यामद्वयं च पुण्यं उभयदिन पुण्यकालेपि पूर्वे दिनाकरणाएव परदिने

१३०

तिथिं०

तत्र यद्विहितं कार्यं तिथिभेदाभेदयोर्दक्षिणायने तद्दिवसीयशेषयामद्वयं पुण्यं उत्तरायणे तु परदिवसीयाद्ययामद्वयं पुण्य
मिति। मध्यरात्रीयकलोत्तरशेषार्द्धरात्रिसंक्रमणमात्रे तु परदिनाद्ययामद्वयं पुण्यमिति संध्यासंक्रमणे तु दिनदंडे दिनस्परा
त्रिदंडे रात्रेर्व्यवस्थिति। ब्रह्मपुराणे शुक्लपक्षे तु सप्तम्यां यदि संक्रमते रविः। महाजया तदा सा तु सप्तमी भास्करप्रिया। स्नानदा
नं जपो होमः पितृदेवाभिपूजनं सर्वं कोटिगुणं प्रोक्तं तर्पणेन महोजसा। अत्र मासपक्षतिथीनां च निमित्तानां च सर्वशः। इति
प्राप्तत्युल्लेखे तद्विशेषणत्वेन महाजयेत्युल्लेखं संज्ञाविधेरेतदेव प्रयोजनं यन्नयानिर्देश इत्युक्तत्वात् एवं संक्रांतिविशे
षस्य निमित्तत्वेन प्राप्ते विषुवाद्युल्लेखोपि। स्कांदे एकांततो मया प्रोक्ताः कालाः संक्रांतिसंज्ञकाः। नैतेषु विद्यते निंद्यं ततस्त्वा
क्षयसंज्ञिताः। अश्रद्धयापि यद्दत्तमपात्रेष्वपि मानवे। अकाले विहितं सर्वं सत्यमक्षयतां व्रजेत्। मात्स्ये अयने कोटिगुणं
तं लक्षं विष्णुपदीषु च। षडशीतिसहस्रं तु षडशीत्यामुदाहृतं। शतमिंदुक्षये पुण्यं सहस्रं तु दिनक्षये। विषुवे शतसाहस्र

।३।

माकामावे व्यतीतकं । आकामावेषु आषाढ कार्त्तिक माघ वैशाख पूर्णिमासु । गंगास्नाने विशेषो भविष्ये अयने विषुवे चैव यः स्ना
या जाह्नवी जले । गंगास्नानस्य वर्षोद्भू कृतस्य फलमाप्नुयात् देवीपुराणे रविसंक्रमणे पुण्ये न स्नायाद्यस्तु मानवः । सप्तजन्मसु
सो रोगी निर्धनश्चोपजायते । दीपिकायां । नाडीनक्षत्र दिवसे रवि भौम शनिश्चराः । संक्रांतिं यस्य कुर्वन्ति तस्य क्लेशो भिजायते ।
गोमूत्र सर्षपैः स्नानं सर्वौषधिजलेन च । विसृज्य कांचनं दद्यात् नाडीदोषोपशांतये । नाडीनक्षत्राणि च । आद्य दशमोडशाष्टा
दशत्रयोविंश पंचविंशयः । रत्नमालायां तारावलादिंदु रथेंदुवीर्यौ द्विवाकरः संक्रमणाख्य उक्तः प्रलाश्च सर्वे सवितुर्वेलेन
महीसुताद्याः क्रमशः प्रशस्ताः । संवत्सरप्रदीपे धुस्तूर बीज सलिलैः स्नायात् संक्रांति शांतये । तथा सर्वौषधी मिश्र विष्णु
मंत्रांश्च संजपेत् । यदाह्नि मेष संक्रांति स्तुलासंक्रमणं निशि । तदा पूजा विवर्द्धन्ते धनधान्यसमृद्धिभिः । कुजार्के शनिवारे वा
महासंक्रमणं यदा । तदा भवेत् प्रजानाशो दुर्भिक्षादिभयं महत् । ब्रह्मवैवर्त्तेः अप्राप्ते भास्करे कन्यां शेषभूते त्रिभिर्दिनैः ।

१२१

तिथि०

अर्घ्यं दद्यादगस्त्याय गौडदेशनिवासिनः। भीमपराक्रमे। यस्तु भाद्रपदस्यांते उदिते कलसोद्भवे अर्घ्यं दद्यादगस्त्याय सर्वान्कामान्
लभेत सः नारसिंहे शंखे तोयं विनिःक्षिप्य सितपुष्पाक्षतैर्युतं। मंत्रेणानेन वै दद्याद्दक्षिणाशामुखः स्थितः। काशपुष्पप्रतीकाश अ
ग्निमारुतसंभव। मित्रावरुणयोः पुत्र कुंभयोने नमोस्तु ते। प्रार्थनं तु आतापिर्भक्षितो येन वातापिश्च महासुरः समुद्रः शोषितो येन
स मेऽगस्त्यः प्रसीदतु। गंधादिकं तु ॐ अगस्त्याय नम इत्यनेन दातव्यं विशेषानुपदेशेन सामान्यतः प्राप्तत्वात् दक्षिणामुख
स्थित इति गंधादावपि प्रयोगांगकर्तृधर्मत्वादिति रत्नाकरः। नारदीयं न मात्स्यं भक्षयेन्मासं न कौर्म्मं नान्यदेव हि। चांडालो
जायते राजन् कार्त्तिके मांसभक्षणात्। महाभारते। कौमुदं तु विशेषेण शुक्लपक्षं नराधिप। वर्जयेत्सर्वमांसानि धर्मोत्र
विधीयते। कौमुदं कार्त्तिकं। कार्त्तिकमधिकृत्य ब्रह्मपुराणे। एकादश्यादिषु तथा तासु पंचसु रात्रिषु। दिने दिने च स्नानं यः शी
तलासु नदीषु च। वर्जितव्या तथा हिंसा मांसभक्षणमेव च। ततश्च मांसभक्षणनिषेधे कार्त्तिकमासस्य शुक्लपक्षगतैकादश्या

132

रिपंचदिनानि शाकाशाकभेदात् पापनाशनत्वाद्धानि विज्ञानि। तुलांत उ ॐ दामोदराय नमसि तुलायां लोलया सह। प्रदीपं ते प्रय
च्छामि नमोऽनंताय वेधसे। लोलया लक्ष्म्या इति मंत्रेण यो दद्यात् प्रदीपं सर्पिरादिना। आकाशे मंडपे वापि स चाक्षयफलं लभेत् वि
ष्णुवेश्मनि यो दद्यात् कार्त्तिके मासि दीपकं। अग्निष्टोमसहस्रस्य फलं प्राप्नोति मानवः। नारदीये निष्पावान्राजमाषांश्च सम्प्रदे
वे जनार्द्दने। यो भक्षयति राजेंद्र चांडालाद्धिको हि सः। कार्त्तिके तु विशेषेण राजमाषांश्च वर्जयेत्। निष्पावान्मुनिशार्दूल याव
दाहूतनारकी। कदंबानि पटोलानि वृंताकसहितानि च। न त्यजेत्कार्त्तिके मासि यावदाहूतनारकी। एतानि भक्षयेद्यस्तु सुप्रे
देवजनार्द्दने। सप्तजन्मार्जितं पुण्यं दहते नात्र संशयः। निष्पावः शिंबिसदृशो दक्षिणापथे प्रसिद्ध इति कल्पतरुः। कदंबानीति
फलानीति नपुंसकनिर्देशात् कदंबानीत्यत्र कलंबानीति केचित् पठंति कलंबि त्विह न प्रसिद्धानीति व्याचक्षते। आहूतनारकी आ
भूतानि स्यादिपर्य्यंतानि प्रलयावधीति यावत् तावत्कालं नारकीत्यर्थः हकारश्चांद्रसः काशीखंडे तुर्जैयवान्नमश्नीयादेकान्नम

१२२

तिथि०२

थवा पुनः। वृंताकं सूरणं चैव शूकशिंबीं च वर्जयेत्। कार्त्तिके वर्जयेत्तैलं कार्त्तिके वर्जयेन्मधु। कार्त्तिके वर्जयेत्कांस्यं कार्त्तिके मासि सं-
धितं। उर्जे कार्त्तिके सूरणा मोलं संधितं आसवादि। गारुडे गवामयुते दानेन यत्फलं लभते खग। तुलसीपत्रकैकेन तत्फलं कार्त्ति-
के स्मृतं। भीमनाथधृतं। विहाय सर्वपुष्पाणि मुनिपुष्पेण केशवं। कार्त्तिके योऽर्च्चयेद्भक्त्या वाजिमेधफलं लभेत्। पद्मपुराणं तु-
लामकरमेषेषु प्रातःस्नानं विधीयते। हविष्यं ब्रह्मचर्यं च महापातकनाशनं। पितामहः कार्त्तिकस्य तु यत्स्नानं माघे मासि
विशेषतः। कृच्छ्रादि नियमानां च चांद्रायणप्रमाणतः। आरंभो कार्त्तिकादिस्नाने सौरचांद्रयोर्विकल्पानुष्ठानं। मदनपारि-
जाते धृतो विष्णुः दर्शे वा पौर्णमासीं वा प्रारभ्य स्नानमाचरेत्। पुण्यान्यहानि त्रिंशत्तु मकरस्थे दिवाकरे। दर्शे पौर्णमासी-
मिति पूर्वदिन संकल्पपरमिति नारायणोपाध्यायाः। वैष्णवामृते गवामेकं प्रसूतानां दशं दत्वा तु यत्फलं। तत्फलं लभ-
ते राजन् मेषे स्नात्वा तु जाह्नवी। कार्त्तिके मंत्रस्तु। ॐ कार्त्तिकेऽहं करिष्यामि प्रातःस्नानं जनार्द्दन। प्रीत्यर्थं तव देवेश दामोदर

१३३

नयासह।नयालक्ष्म्या। राजमार्त्तण्डे। यदुच्छिद्रिपुलान् सोगां श्वभ्र सूर्य्ये ग्रहोपमान्। कार्त्तिके सकले मासि प्रातःस्नायी भवे
त्सदा। यो ऽप्सु सगेलोके चिरं वासो येषां मनसि वर्त्तते। यत्र क्वापि जले तैस्तु स्नानं कं मृगभास्करे। मृगो मकारः तत्स्थे भास्क
रे। आयुरारोग्यसंपत्तौ रूपे शुभगतागुणे। येषां मनोरथास्तैस्तु तत्प्राज्यं माघमज्जनं। दारिद्र्यपापदौर्भाग्यपंकं प्रक्षालना
य वै। माघस्नानान्न चान्योस्ति उपायो नरसत्तम। मकरस्थे रवौ यो हि न स्नात्यनुदिते रवौ। कथं पापैः प्रमुच्येत कथं स त्रिदिवं व्र
जेत्। अकामो वा सकामो वा यत्र क्वापि बहिर्जले। इहामुत्र च दुःखानि माघस्नायी न पश्यति। यत्तु माघे मासि रटंत्यापः किं
चिदभ्युदिते रवौ। ब्रह्मघ्नमपि चंडालं कं पतंतं पुनीमहे। इति पद्मपुराणे। किंचिदभ्युदिते रवावित्युक्तं तत् प्रातःकालो
त्तरकालावधिरूपं प्रागुक्तास्तमयात्संध्येति वचनात्। अत एव यो माघमास्युषसि सूर्य्ये करामितार्धे स्नानं समाचरति
वारुनदीप्रवाहे उद्धृत्य सप्त पुरुषान् पितृमातृवंश्यान् स्वर्गं प्रयात्यमरदेहधरो नरो ऽसौ। इत्यत्रोषसीत्यभिधाय सूर्य्यकरा

१३२

तिथि०)

मिताग्र इत्युक्तं सूर्योदयात् प्रागपि तत्र करसंभवात् ननु सूर्याभिताग्र इत्युक्तं । गारुडे गंगां येऽत्रावगाहंते माघे मासि नराधि
प । चतुर्युग सहस्रांते न पतंति सुरालयात् । दिने दिने सहस्रं तु सुवर्णानां विशाम्पते । तेन दत्तं हि गंगायां यो माघे स्नाति मानवः ।
विधिमाह पाद्मे । ॐ माघमासमिमं पुण्यं स्नाम्यहं देव माधव । तीर्थस्यास्य जले नित्यं प्रसीद भगवान् हरे । दुःख दारिद्र्यनाशा
य श्री विष्णोस्तोषणाय च । प्रातः स्नानं करोम्यत्र माघे पापविनाशनं । मकरस्थे रवौ माघे गोविंदाच्युत माधव । स्नानेनानेन मे देव
यथोक्तं फलदं भव । इति मंत्रं समुच्चार्य स्नायान्मौनं समाश्रितः । वासुदेवं हरिं कृष्णं श्रीधरं च स्मरेत्ततः । ततः संध्यादिकं कृत्वा
सूर्यायार्घ्यं दद्यात् तत्र मंत्रः । ॐ दिवाकर जगन्नाथ प्रभाकर नमस्तु ते । पुरिपूर्णं कुरुष्वेदं माघस्नानं मया व्रतं । चांद्रस्नाने तु
मकरार्कोपृष्ठकाले मकरस्थे रवाविति मंत्रस्य न पाठः असमवेतार्थत्वात् आरब्धकार्त्तिकादिस्नाने तु व्याध्यादिना सामर्थ्या
भावेपि पुत्रादि प्रतिनिधिना कारयितव्यं नानुकल्पविधिना नित्यस्नानस्यैव तद्विधानादिति विद्याकरः । स्कंदपुराणे संप्राप्ते म

१३५

करादित्ये पुण्ये पुण्य प्रदे सदा। कर्तव्यो नियमः कश्चिद्व्रत रूपी नरोत्तमैः। षट्त्रिंशन्मत निगमो। संक्रान्त्यां पंचदश्यां च द्वादश्यां
श्राद्धवासरे। वस्त्रं न पीडयेत्तत्र न च क्षीरे स्नायो जये। संक्रान्त्यां च त्रयोदश्यां पक्षान्ते नवमी दिने। सप्तम्यां रविवारे च स्नानमामल
केस्त्यजेत्। रविवारे क्व संक्रान्त्यां पक्षान्ते सप्तमी तिथौ। आरोग्य कामस्तु नरो निंब पत्रं न भक्षयेत्। कृत्या चिंतामणौ गुणिसद्वे
ख्वेच। चैत्रे मासि च संपूज्यो घंटाकर्णो घटात्मकः। आरोग्याय स्नुही मूलं संक्रान्त्यां तत्र कारयेत्। पूजा मंत्रः। घंटाकर्ण महा
वीर सर्व व्याधि विनाशन। विस्फोटक भये प्राप्ते रक्ष रक्ष महाबल। शिवपुराणे घंटाकर्णो गणांश्री मातृ शिवस्यातीव वल्लभः।
कृत्य चिंतामणौ। मसूरं निम्ब पत्राभ्यां योत्ति मेष गते रवौ। अपि रोषान्वितस्तस्य तक्षकः किं करिष्यति। संवत्सर प्रदीपे तु उत्त
राद्धे मेषस्थे च रवौ तस्य नास्ति गे विषजं भयमिति स्मृतिः। मेषादौ शक्तवो देया वारि पूर्णा च गर्गरी। वारिदान मंत्रः। एष धर्मघटो
दत्तो ब्रह्म विष्णु शिवात्मकः। अस्य प्रदानात्सफला मम संतु मनोरथाः। वैशाखे यो घटं पूर्णं सभोज्यं वै द्विजन्मने। ददात्यमुक्ता

१३५

तिथि०)

राजेंद्र स याति परमां गतिं । पूर्णो जलेनेति शेषः । मत्स्ये वै । यो ददाति तिलैर्मिश्रा दोशकृतं तु घटान्वितान् । पितृनुद्दिश्य विप्रे
भ्यः सर्वपापैः प्रमुच्यते । विप्रेभ्यः पादुके छत्रं पितृभ्यो विषुवे शुभे । पितृभ्यः पितृनुद्दिश्य अत्र विषुवस्य पुण्यविशेषजनक
त्वे विवक्षितत्वान्मेषादावित्ति विषुवसंक्रांति पुण्यकालपरं अन्यथा कालद्वयकल्पनापत्तेः । कर्म्मोपदेशिन्यां व्यासः । संक्रांत्यां।
संक्रांत्यां पक्षयोरंते द्वादश्यां श्राद्धवासरे । सायं संध्यां न कुर्वीत कृते च पितृहा भवेत् । देवीपुराणे अतीतानागतो भोगो नाड्यः पंच
दश स्मृताः । सान्निध्यं तु भवेत्तत्र ग्रहाणां संक्रमे रवेः । पुण्यपापविभागेन फलं देवी प्रयच्छति । भागः पुण्यपापजनकयोग्यका
लः पुण्यपापविवेचने विश्वामित्र । यमाप्योः क्रियमाणां हि शंसंत्यागमवेदिभिः । स धर्मोयं विगर्हेति तमधर्म्मं प्रवक्ष्यते । आग
मवेदिभिः क्रियमाणामिति संबंधः । तांत्रिकस्तु विहितक्रियासाध्यो धर्म्मः पुंसो गुणो मतः । प्रतिसिद्धः क्रियासाध्यः स गुणोध
र्मो उच्यते । अत्रैकस्मिन्नेव काले पुण्यपापफलदर्शनात् । संक्रमणपुण्यकाल एव स्नानादिकृत् जैलादित्यागः । एवमेव गुरु

135

चरणाः। एकादशी प्रकरणोक्त संक्रान्त्युपवासस्य व्रतत्वेन भावरूपत्वात् भावघटितत्वाद् वोभयथापि तत्र पूर्व्वे विधेर्वृत्तिरि
त्यनेन पुण्यकाले युक्ताहोरात्रकर्त्तव्यता। अमृत्युपवासवदेकादशीवत्कुर्याद्विसृष्टं। एवं च रात्रिप्रागर्द्धसंक्रान्तौ दिवाशेषार्द्ध
मात्रस्य तत् पुण्यकालत्वाद्रात्रिमुहूर्त्तोर्द्ध सायं संध्योपासनं कार्य्यमेव। ब्रह्मपुराणे नित्यं द्वयोरयनयोर्नित्यं विषुवतोर्द्वयोः चं
द्रार्कयोर्ग्रहणयोर्व्यतीपातेषु पर्वसु। अहोरात्रोषितः स्नानं श्राद्धं दानं तथा जपं। यः करोति प्रसन्नात्मा तस्य स्यादक्षयं च तत्
। अहोरात्रोषितः पूर्वदिने कृतोपवासः। एतत्परमेव। अर्द्धरात्रे व्यतीते तु संक्रान्तिर्यदा भवेत्। पूर्वे व्रतादिकं कुर्यात् परे पु
ः स्नानदानयोः। भीमपराक्रमीयं स्नानदानयोरिति सप्तमी निर्द्देशात्। परदिवसीय स्नानदाननिमित्तकं पूर्वदिने उपवासः सं
यमरूपं व्रतादिकं कुर्यादित्यर्थः। अन्यथा पुण्यपापेति देवीपुराण विरोधः स्यात्॥०॥ अथ ग्रहणं। ज्योतिषे भत्रिपादान्तरे
राहोः केतोर्वा संस्थितो रविः। चतुष्पादान्तरे चंद्रस्तदा संभाव्यते ग्रहः। भत्रिपादान्तरे नक्षत्रस्य नक्षत्रयोर्वा त्रिपादाभ्यन्तरे य

१२५

तिथि०

स्मिन्नृक्षे रविकाल्लाद्वृनृद्दशगतः शशी । पूर्णो मा प्रतिपत्संध्यौ राहुणा ग्रस्यते शशी । एतदपि पूर्ववचनानुसारेणा तद्वृत्तुख्यादाभ्यं
तरे ज्ञेयं । तस्मात मार्ग्यं तत् परतो वेत्यर्थः । कृष्णपक्षे तृतीयायां मासर्क्षे यदि जायते । ततस्तथैव दशे सूर्ये राहुना ग्रस्यते रविः । मा
सर्क्षे कार्त्तिकादौ कृत्तिकादि एतदपि मपादाभ्यंतरे सति ज्ञेयं । राहोः पादभोगो मासद्वयेन रविभोमनवांशेन निरभ्रे ग्राससमादि
शेत् । बुधशौरि नवांशेन मलिनं धूम्रवर्षेणं । गुरोरंशक मोक्षाय दृश्यते सबलाहकः । शशि शुक्र नवांशेन प्रावृट्काले महज्ज
लं । अन्यत्रा व्यक्तमूतौ तो दृश्येते यदि ग्रासितां वशे । तौ चंद्रार्कौ । कृष्णे चिंतामसौ वराहुः श्वेते क्षेम सुभिक्षं ब्राह्मणा पीडं च निर्दि
शेद्राहो । अग्निभय मनलवर्णे पीडा च हुताशवृत्तीनां । हरिते रोगो/तु नापः शस्यानामितिनश्च विध्वंसः कपिले शीघ्र गसत्वं म्लेछ
ध्वंसो/थ दुर्भिक्षं अरुणाकिरणानुरूपे दुर्भिक्षं वृष्टयो त्रीत्या पीडा । धूम्राभे क्षेम सुभिक्ष मादिशेन्मंद वृष्टिं च कापोतारुणा कपि
लेश्यामाभे क्षुद्भयं विनिर्दिशेत् । कापोतं स्कृहारां व्याधिकरः कृष्णवर्णश्च विमलकमल पीताभो वैश्यध्वंसी भवेत् सुभिक्षाय श्च

136

द्विश्चान्यग्निभयं गेविकरूपे च पुत्रहानि। दूर्वाकांडे श्यामे हारिद्रे चापि निर्दिष्टो न्मरकं। अशनिभयसंप्रदायी पाटलिकुसुमोप
मोराहुः। राजमार्तंडे सप्तमाष्टजन्मशेषेषु चतुर्थे दशमे तथा। नवमे च तथा चंद्रे न कुर्यात् राहुदर्शनं। श्रीपतिव्यवहारनिर्णये
वशिष्ठः। जन्मभे जन्मराशौ च षष्ठाष्टमगते तयोः। चतुर्थे द्वादशे चंद्रे न कुर्याद्राहुदर्शनं ग्रासदर्शनमात्रेण चार्थहानिर्भयं मह
त्। जायते नात्र संदेहस्तस्मात्तत्परिवर्जयेत्। जन्मनक्षत्रापेक्षया षष्ठं योत् सप्तमतारायां निधने चेत्येकवाक्यत्वात्। जन्म
राश्यपेक्षया अष्टमे चंद्रे अत्राप्युपलक्षणं नवमे चंद्रे अंक इत्येकवाक्यत्वात् वराहसंहितायां जन्मसप्ताष्ट विपत्कांकंदश
मस्थे निशाकरे। दृष्टोरिष्टप्रदो राहुर्जन्मर्क्षे निधनेपि च। रिप्फ द्वादशराशिः। अंको नवमः। निधनं सप्तमतारा। तथा वैनाशि
कक्षे दृष्टं ग्रहणं सुधांशुभास्करयोः। जनयति रोगं बहुधा क्लेशं वित्तक्षयं च। जन्माष्टजायान्त्यखधर्मसंस्थे निशाकरे जन्मसु
तारकासु। दृष्ट्वा तमश्चंद्रमसं प्रयत्नादन्यक्षेत्रे दद्यात्कनकं द्विजाय। अत्र चंद्रमसमित्युपलक्षणं। सूर्येपि उपक्रमे सुधांशु

१२६

तिथि०

भास्करयोरिति निर्देशात् । वैनाशिक कृष्णे त्रयोविंशति नक्षत्र इति कश्चित् । वस्तुतस्तु वैनाशिकपदं निधनतारापरं निधनेचैत्येक
वाक्यत्वात् । वैनाशिक पदस्य गर्गेण विपत्तारादि साहचर्यात्त्रयोविंशति नक्षत्रस्यापि त्वपरिपदप्राप्तत्वादपि सप्तमतारायां पठितत्वा
च्च । यथा विपत्कर प्रत्यरि संस्थितेषु वैनाशिकर्क्षेषु कृतं हि कर्म । सर्वं नृणां निष्फलमेव नित्यं स्यात् कृते पि तत्रास्ति शुभं न किंचित् । ता
यां त्वपथ धर्म्मा सप्तम द्वादश दशम नवम राशयः । ननु ज्योतिःशास्त्रोक्त निषेधो हिंसावद्यादृष्टिक परोस्तु नतु वेधपरः सैवं राहु
दर्शन संक्रान्ति विवाहात्यय वृद्धिषु । स्नान दानादिकं कुर्युर्निशि काम्यव्रतेषु च । इति देवल वचने दर्शन पद श्रवणाद्दर्शने सति स्ना
दे मेहाभ्युदय हेतुत्वाद्दर्शनमपि विधेयं । तथा च संवत्सर प्रदीपे मार्कंडेयः एक रात्र मुपोष्यैव राहुं दृष्ट्वा स्वयं नरः । पुरां प्राप्नो
ति कृत्वा च स्नानं श्राद्धं विधानतः । अत तस्येव प्रकृतत्वेनोपस्थितस्य वेध दर्शनस्य पर्युदासो न तु रागप्राप्त दर्शनस्य निषेधोऽप्र
कृतत्वेनानुपस्थितेः । एवं च पदार्थांतर साकांक्षं विशेष्य मपहाय नदितरत्र सामान्य मन्वेतीति । सर्वत्र पदाहवनीयादौ सामान्यस्यापि

137

शेषपरत्वे बीजं । एवमेवात्र यथाऽहरहर्दद्यात् । दीक्षितो न ददातीति प्रतिषेधाद्दीक्षितेतरपरं । न रागप्राप्तनिषेधकं तदुक्तं मद्
पादैः त्रिधैव ज्ञायते कर्त्ता विशेषेण प्रतिक्रिया । योग्यत्वप्रतिषिद्धत्व विशेषणपदान्वयैः । यजमानः पठतीति श्रुत्यान्तस्योग्यो विद्वा
न्दीक्षितो न ददातीति प्रतिषेधात् दीक्षितेतरः स्वर्गकामोऽग्निष्टोमेन यजतीत्यत्र विशेषणात् स्वर्गकामः कर्त्तेति तेन सप्तमवर्ज्जादीन
रः राहुं दृष्ट्वा स्नायादिति लभ्यते एवं वैधदर्शन पर्युदासेऽपि निंदाप्रायश्चित्तयोः श्रवणात् रागप्राप्तदर्शनस्य प्रसक्तप्रतिषेधः । स्त्रीष्व
भिगमननियमे पर्वेणः पर्युदासत्वेऽपि तत्र रागप्राप्तगमनस्य प्रसक्तप्रतिषेधवदिति पूर्वं चिंतं मलमासतत्त्वे । अत एव भोजराज
: पौषे चैत्रे कृष्णपक्षे न वान्नं नाचरेद् बुधः भवेज्जन्मांतरे रोगी पितॄणां नोपतिष्ठते । तत्र निंदाश्रवणात् प्रसक्तानोपतिष्ठत इति
श्रवणात् पर्युदासत्वेति । देवलवचने निशीति पर्युदासः समयमात्रपरं । अन्यथा सायाह्ने विवाहादि राहुदर्शनसंक्रांतिनिमि
त्तस्नानादि न स्यात् अत एव ग्रहणोद्वाहसंक्रांतियात्रार्त्तिप्रसवेषु च । दानं नैमित्तिकं देयं रात्रावपि तदिष्यते इति दानदर्पणे

१३७

तिथि०)

धृतं वशिष्ठवचने राजा वपीत्यपि नाप्रतिषिद्धं कालांतरं समुत्त्रीयते । छंदोगपरिशिष्टं । यव्याद्वयं श्रावणादि सर्वा नद्यो रजस्वलाः ।
तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः । उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च । चंद्रसूर्यग्रहे चैव रजोदोषो न विद्यते । स्वधुन्य
म्भः समानि स्युः सर्वाण्यम्भांसि भूतले । कूपस्थान्यपि सोमार्कग्रहणे नात्र संशयः । यव्योमासः । नदीलक्षणमाह धनुःसहस्राण्यष्टौ
च गतिर्यासां न विद्यते । न ता नदीशब्दवहा गर्तास्ताः परिकीर्तिताः । यामेत्यर्थः । धनुःप्रमाणमाह विष्णुधर्मोत्तर प्रथमकांडे द्वा
दशांगुलिकः । शंकुस्तद्द्वयं च शयः स्मृतः । तच्चतुष्कं धनुः प्रोक्तं क्रोशो धनुःसहस्रकः । शयो हस्तः अत्र विशेषो मदनपारिजाते निग
मः । नद्युत्तीरवासिनामिति । तत्रैव व्याघ्रभूतिः । अभावे कूपवापीनामन्येनापि समुद्धृते । रजोदुष्टेपि पयसि ग्रामभोगो न दुष्य
ते । इति । अन्येनापि कुंभादिना । अत एव छंदोगपरिशिष्टकृता त्वित्यधिकरणेन निर्दिष्टं । देवलः गंगा च यमुना चैव प्लक्ष
जाता सरस्वती । रजसा नाभिभूयंते ये चान्ये नदसंज्ञकाः । कुरुक्षेत्रे या सरस्वती सा प्लक्षजाता । शोन सिंधु हिरण्याख्या कोकलो

138

हित घर्घेराः । शान्तनुश्चैन दांसप्र पावना त्रुस्नमाः सुताः । ग्रहणे कूपस्थजल प्रशंसया ग्रहणे प्राक्काले उत्तु न व्यावृत्तिः व्या

घ्रः आदित्यकिरणैः पूतं पुनः पूतं च वह्निना । जलं व्याध्यातुरः स्नायाद् ग्रहणे ह्युष्णवारिणा । एवंभूतायनोऽत्र उष्णवारिणा

पि स्नायादित्यर्थः । व्यासः । सर्वे भूमिसमं दानं सर्वे व्याससमा द्विजाः । सर्वं गंगासमं तोयं ग्रहणे नात्र संशयः । तथा इंदोर्लक्षगुणं

प्रोक्तं रवेर्दशगुणं च तत् । गंगातीरे च संप्राप्ते इंदोः कोटी रवेर्दश । इंदोर्लक्षमिति सामान्योदकस्नानविषयमेतत् । अत्र श्रा

द्धं नित्यं काम्यं च संयोगपृथक्त्वन्यायात् तथा च कृष्णशृंग शातातपौ सर्वस्वेनापि कर्त्तव्यं श्राद्धं वै राहुदर्शने । अकुर्वाणस्तु

श्राद्धं पंके सीदति गौरिव । चंद्रसूर्यग्रहे यस्तु श्राद्धं विधिवदाचरेत् । तेनैव सकला पृथ्वी दत्ता विप्रस्य वै करे । अत्राम श्राद्ध

माह वृद्धशातातपः । आपद्यनग्नौ तीर्थेषु चंद्रसूर्यग्रहे तथा । आमश्राद्धं द्विजैः कार्यं शूद्रेणापि सदैव हि । वशिष्ठः । शस्यक्षेत्र

गतं प्राहुः सतुषं धान्यमुच्यते । आमं वितुषमित्युक्तं स्विन्नमन्नमुदाहृतं । योगिनीतंत्रे । निरग्ने रामश्राद्धेतु अन्नं न खालये क्वचित् ।

१२८

तिथि०

वृद्धौ च क्षालयेदन्नं संक्रमे ग्रहणे तु च । ग्रहणनिमित्तकश्राद्धादि मलमासेपि कर्त्तव्यं । नित्यनैमित्तिके कुर्य्यात् प्रयतः सन्म
लिम्लुचे । तीर्थस्नानं गजच्छायां प्रेतश्राद्धं तथैव च । इति बृहस्पतिवचनात् । श्राद्धविवेकोप्येवं । चंद्रसूर्य्यग्रहे स्नानं श्राद्धदान
जपादिकं । कार्य्याणि मलमासेपि नित्यं नैमित्तिकं तथा । इति कालमाधवीयधृतवचनाच्च । अपि नान्ये कालदोषाः समुद्दिष्टा
ः । सारसंग्रहे सत्तीर्थे के विधुग्रासे तं तु दामनपर्वणोः । मंत्रदीक्षां प्रकुर्वाणो मासर्क्षादीन्न शोधयेत् । तं तु पर्व परमेश्वरोपवी
तदानतिथिः श्रावणी दामनपर्व दमनभंजनतिथिश्चैत्रशुक्लचतुर्दशी । रामार्चनचंद्रिकायां चंद्रसूर्य्यग्रहे तीर्थे सिद्धक्षेत्रे शि
वालये । मंत्रमात्रप्रकथनमुपदेशः स उच्यते । गारुडे चंद्रग्रहश्चंद्रवारे सूर्य्ये सूर्य्यग्रहस्तथा । चूडामणिरयं योगस्तत्रानंत
फलं स्मृतं । अन्यस्माद्ग्रहणात्कोटिगुणमत्र फलं लभेत् । देवीपुराणे । यस्य राशौ ग्रहाः पंचाथवा सप्तगुराधिपाः । ग्रहणं च
न्द्रसूर्य्यस्य ग्रहे वीषमसंस्थितैः । बलिदानं प्रकर्त्तव्यं मातृणां पूजनं हितं । सूर्य्यस्याभ्यर्च्चनं कार्य्यं शिवस्याशुभनाशनं । न च देव

१३९

लवचने राहुर्दृश्यते ऽनेनेति व्युत्पत्त्या राहुदर्शनं ग्रहणं न तु तस्य दर्शनमिति वाच्यं । चंद्रे वा यदि वा सूर्ये दृष्टे राहौ न स्नायते । अ
स्नायं कथितं पुण्यं तत्रापर्के विशेषतः इति मार्कंडेयवचने राहौ दृष्टे इत्यभिधानात् राहुं दृष्ट्वा स्नायं तेन इत्यभिधानात् यावद्दर्शन
गोचर इति वचनाच्च तच्च दर्शनं चाक्षुषं ज्ञानं न तु ज्ञानमात्रं चंद्रसूर्योपरागस्य स्नानादौ संक्रांतिवत् ज्ञातस्यैव निमित्तत्वात् ज्ञानेप्रा
प्ते राहुदर्शनमिति वचनेन चंद्रसूर्योपरागे च यावद्दर्शनगोचर इति जाबालवचनेन च दर्शनपदाच्चाक्षुषज्ञानविषयस्यैव निमि
त्तताभिधीयते । तत्रैव दृशेर्मुख्यत्वात् । तथा च संवत्सरप्रदीपे । चक्षुषा दर्शनं राहोर्यत्तद्ग्रहणमुच्यते । तत्र कर्माणि कुर्वीत
गणनामात्रतो न तु ग्रहणं । ग्रहणनिमित्तककर्म्मप्रयोजकं राहुदर्शनमपि आख्यातोपस्थापितस्नानादिकर्तुः सान्निध्यात्तन्निष्ठ
मेव लाघवात् । अन्यथा सीमंतोन्नयने चैव पुत्रादिमुखदर्शने । नांदीमुखं पितृगणं पूजयेत् प्रयतो गृहीति विष्णुपुराणे स्वपुत्र
स्यान्यकर्तृकमुखदर्शने ज्ञातेपि श्राद्धं प्रसज्येत । पूर्वलिखितमार्कंडेयवचने दृष्टे इत्यत्र क्तप्रत्ययश्रवणाच्च । हेमाद्रिस्तु यावद्दर्शनगो

१२९

तिथि०३